S. SIVAKUMAR

शिवागम-प्रयोग-चन्द्रिका



முகவுரை.

''கோயில் இல்லா ஊரில் குடியிருக்க வேண்டாம்'', என்பது தமிழகத்தில் வழக்கிலுள்ள முதுமொழி. தென் நாட்டிலுள்ள வானளாவி நிற்கும் கோபுரங்களுடனும், சிற்பச்சிறப்புகளுடனும் திகழும் தேவாலயங்களும், மற்றும் காலக்ரமத்தில் ஏற்பட்டுள்ளதான சிவ, சக்தி, விஷ்ணு, விநாயக, ஸுப்ரஹ்மண்ய சிறு ஆலயங்களும் எண்ணற்றவை. இவைகளில் பொதுவாகத் தொன்று தொட்டு ஆகமமுறைப்படி இருந்துவரும் பூஜை முறைகளே பின்பற்றப்பட்டு வருகின்றன. இம்முறைகளைத் தெளிவுபடுத்தும் நூல்கள் இக்காலத்தில் அரிதாகி வருகின்றன.

சிவாலயங்களில் ஒவ்வொரு நாளும், வேளைதோறும் நடைபெறவேண்டிய் பூஜைக்கான விதிமுறைகளையும், மற்றும் உத்ஸவகால முறைகளையும், பிரதிஷ்டை, கும்பாபிஷேகம் முதலியன பற்றிய விசேஷமுறைகளையும் தொகுத்து, சிவாகம சாஸ்திரத்தைப் பயின்று, பயன் பெற்று, ஆலயபூஜைக் கைங்கர்யத்தை ஏற்றுப் பணியாற்றக்கூடிய இளைஞர்களுக்கு உதவக்கூடிய வகையில் ஒரு சிறுநூலாக வெளியிடவேண்டிய அவச்யத்தைப்பற்றி மதுரை மாநகரில் சென்ற 1979ம் ஆண்டு மே மாதத்தில் நடந்த தமிழ்நாடு மாநில ஸம்ஸ்கிருத மஹாநாட்டில், திருச்சிராப்பள்ளி மாவட்டத்திலுள்ள அல்லூர் கிராமத்தில் பல ஆண்டுகளாக ஸ்ரீ காஞ்சி காமகோடி பீடத்தின் ஆதரவில் நடந்துவரும் சிவாகம பாடசாலையின் தலைமை ஆசிரியர் ஸ்ரீ விச்வநாதசிவாச்சார்யார் அவர்களால் வலியுறுத்தப்பட்டது. அவரது ஆலோசனையை ஏற்று, மஹாநாட்டில் அத்தகைய நூல் ஒன்றை பிரசுரிக்கத் தீர்மானம் நிறைவேற்றப்பட்டது. நூலை அச்சிட்டு வெளியிடும் முழுப்பொறுப்பும் சென்னை ஸம்ஸ்க்ருதக் கல்வி மன்றத்தினால் (Samskrit Education Society, Madras) ஏற்கப்பட்டது.

विषय-सूची

विषय संख्या		पृष्ठ संख्या
१	विघ्नेश्वरपूजा	१
२	पुण्याहवाचनम्	५
३	भूतशुद्धिः	१३
	भूतशुद्धिः (अन्या)	३६
४	पञ्चगव्यम्	३९
५	ब्राह्मणानुज्ञा	४६
६	शिवानुज्ञा	४८
७	देवी अनुज्ञा	७३
८	विघ्नेश्वरानुज्ञा	८६
९	सुब्रह्मण्य अनुज्ञा	९२
१०	वास्तुशान्तिविधिः	१०७
११	मृत्संग्रहणविधिः	१२२
१२	अङ्कुरार्पणविधिः	१३२
१३	रक्षाबन्धनक्रमः	१४०
१४	कुम्भालङ्कारविधिः	१४३
१५	वृषभप्रतिष्ठा	१५३
१६	ध्वजारोहणम्	१५९
१७	स्वामिमण्टपपूजा	१७४
१८	अग्निकार्यविधिः	२०६
१९	ध्यानश्लोकाः	२२०

ஸ்ரீ விச்வநாத சிவாசார்யார் அவர்களின் முயற்சியால், ''**சிவாகம ப்ரயோக சந்த்ரிகா**'' என்ற இந்நூல் தொகுக்கப்பட்டு, பின்பக்கங்களில் உள்ள அவரது முகவுரையில் காணப்படும் தமிழகத்தில் சிறப்புடன் திகழும் சிவாகம வல்லுனர்களால் பரிசோதிக்கப்பட்டு, சென்னை ஸம்ஸ்க்ருதக் கல்விமன்றத்தினுல் பிரசுரிக்கப்பட்டுள்ளது. இது சிவாகமப் பயிற்சிபெறும் மாணவர்களுக்கும் சிவாலயங்களில் பூஜைசெய்யும் சிவாச்சார்ய இளைஞர்களுக்கும் பெரிதும் உதவியாக இருக்குமென நம்புகின்றோம்.

இப்புத்தகத்திற்கு ஸ்ரீமுகம் அருளியுள்ள ஸ்ரீ காஞ்சீ காமகோடி பீடம் ஜகத்குரு ஸ்ரீ சங்கராசார்ய ஸ்வாமிகளுக்கு எமது அனந்த வந்தனங்கள். இந்நூலைத் தொகுத்துதவிய அல்லூர் ஸ்ரீ விச்வநாத சிவாச்சார்யார் அவர்களுக்கும், இதனைச் சோதித்து உதவிய சிவாச்சார்ய மணிகளுக்கும், விரைவில் அழகாக அச்சிட்டுக் கொடுத்த புதுக்கோட்டை சர்மாஸ் ஸானடோரியம் ப்ரஸ் உரிமையாளர், ஸ்ரீ L. தியாகராஜசர்மா அவர்களுக்கும் சென்னை ஸம்ஸ்க்ருதக் கல்வி மன்றத்தின் சார்பில் எமது மனமார்ந்த நன்றி உரித்தாகுக. இந்நூலினைப் பெற்று சிவாகமப் பயிற்சிபெறும் மாணவர்களும், இளந்தலைமுறையினைச் சேர்ந்த சிவாசார்யர்களும் பயனடைவார்களாக.

16, கிழக்கு மாடவீதி
மயிலாப்பூர், சென்னை-4
26—7—1981

ஸம்ஸ்க்ருத ஸேவாரத்னம்
T. V. விச்வநாத அய்யர்
காரியதரிசி,
ஸம்ஸ்க்ருதக் கல்வி மன்றம்

விக்ஞாபனம்

वृषाधिरूढं देवेशं सर्वलोकैककारणम् ।
ध्यायेद्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवम् ॥

ஓங்கொளியாய் அருள்ஞான மூர்த்தியாகி உலகெலாம் பாலித்தருளும் உமையம்மை காணத் தேன் மணம் கமழும் மலரிதழ், கங்கை, திங்கள் திகழ், அரவம், வளர் சடைமேல் சேரவைத்து விளங்குபவராயும், ஸகல கல்வி கலைகளுக்கும் ஈசனுயும், ஸகலஜகத் காரணமாகவும் விளங்கும், ஓங்காரத்தின் முடிந்த முடிவான நாதாந்த வடிவினனுய், நால்வருக்கு உபதேசம் கல்லாலின் கீழ் இருந்து ஆகமங்களின் தத்வங்களைத் தனது மோனப் புன்னகையினுலே உபதேசித்து அருள்பவனுன தக்ஷிணு மூர்த்தியின் திருவடித் துணைகொண்டு உலகம் உய்ய, அவன் உபதேசித்தருளிய சிவாகமங்களின் முறைகளிலே பூஜாமுறைகளைத் தொகுத்து இச்சிறியநூல் அச்சிடப்பட்டுள்ளது. சிவாகம முறைப்படி பூஜை செய்யும் பாலகர்களுக்கு, பயிற்சிக்குப் பயன்படும் என்பதைக் கருத்திலே கொண்டு ஸ்ரீவிக்நேச்வரபூஜையில் தொடங்கி. உத்ஸவம், க்ரியைகள் சேர்த்து இச்சிறு தொகுப்பு அமைந்துள்ளது.

50 ஆண்டுகளுக்கு மேல் ஆகமவல்லுனர்களாகவும், ஆசிரியர்களாகவும் ஆகம ஆராய்ச்சியில் ஈடுபட்டவர்களாகவும், அநேக திருக்கோயில்களில் கர்ஷணுதி ப்ரதிஷ்டாந்தம் நடத்தியவர்களும், மந்த்ரம், கிரியை, பாவனை என்ற மூன்று காரியங்களிலும் மனம், மெய், மொழி பூர்ணமாக ஈடுபட்டு செயல்பட்டவர்களுமான- திருவாடுதுறை ஆதீனம் சிவஸ்ரீ சுவாமிநாத சிவாசார்யார், தருமை ஆதீனம் சிவஸ்ரீ S. சுவாமிநாதசிவாசாரியார், திருஆடானை சிவஸ்ரீ M. ஐயாமணி சிவாசார்யார், மானுமதுரை சிவஸ்ரீ D. தக்ஷிணுமூர்த்தி பட்டர், கடலூர் ஸ்ரீ சம்பந்த சிவாசார்யார் முதலியவர்கள் சேர்ந்த குழு இந்நூலை பரிசீலித்து, வெளியிட

day :
si Hor
ishek
cha

nd Fri

NAMI

riday

Friday

PUJA—

IAVAL
thi-Mrith
sa Rudra

r Kavac
eda Par

m.

VARATH
DAILY PR
agya Par
a Japam.



१

॥ श्रीः ॥

मुद्रा

॥ श्री चन्द्रमौळीश्वराय नमः ॥

श्रीशङ्करभगवत्पादाचार्य परम्परागत

श्री काञ्चीकामकोटि पीठाधिपति

जगद्गुरु श्रीशङ्कराचार्य श्रीमठम्, संस्थानम् ।

मानवानां क्षेमार्थं ईश्वराराधनं विहितम् । तत्र सर्वलोकक्षेमार्थं देवालयनिर्माणम् । तत्र शैवदेवालयेषु पूजाकरणाय शिवागमप्रकारेण पूजाक्रमो विहितः । देवालयेषु पूजां कुर्वद्भिः, स्वगृहे आत्मार्थं देवताराधनं कृत्वा, तदनन्तरं सर्वलोकक्षेमार्थं देवालयेषु पूजा कार्या । तदा तत्तद्देवालयप्रधानमूर्तीनां गणेशप्रभृतीनां सर्वेषां परिवारदेवतानां च पूजाक्रमं प्रतिपादयन्ती इयं **'शिवागम-प्रयोगचन्द्रिका'** अनेकेभ्य आगमग्रन्थेभ्यो यथासंप्रदायं सङ्कलय्य मुद्रापिता । अयं ग्रन्थः अस्मदाज्ञानुसारेण प्रचाल्यमानायां तञ्जाविरापल्ली समीपस्थ-अल्लूरग्रामस्थ-शिवागमपाठशालायां प्रधानाध्यापकेन शिवागमपण्डितेन, विद्वद्वरेण्येन, श्री विश्वनाथशिवाचार्येण संकलितेति श्रुत्वा वयं मोदामहे । मद्रास् संस्कृतसेवासमितिः (सक्रृत-एजुकेषन् सोसैटि) बहोःकालात् पत्रव्यवहारद्वारा संस्कृताध्यापने, छात्राणां छात्रवृत्तिदाने, शास्त्रकाव्यग्रन्थमुद्रापणे च व्यग्रा संस्कृतसेवां करोति । अनया समित्या शिवागमचन्द्रिकाया मुद्रापणं समुचितं भवति । सर्वेषां शिवाचार्याणां पूजाक्रमनिर्देशने अयं ग्रन्थः उपकरोत्वित्याशास्महे ।

यात्रास्थान-गुरुवायूर्
दुन्मत-आषाढ-शुक्लसप्तमी

नारायणस्मृतिः

श्रीः

❀ शिवागम-प्रयोग-चन्द्रिका ❀

य: शिवो नाम रूपाभ्यां या देवी सर्वमङ्गळा ।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गळम् ॥

श्रीकान्तद्रुहिणोपमन्युतपन स्कन्देन्द्र नन्द्यादय:
प्राचीनागुरवोपि यस्य करुणा लेशाद्गदा गौरवम् ।
तं सर्वादिगुरुं मनोज्ञवपुपं मन्दस्मितालंकृतम्
चिन्मुद्राङ्कित मुद्रपाणि नलिनं चित्ते शिवं कुर्महे ॥

१ विघ्नेश्वर पूजा

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥

पर्वत इवाविचाचालि: । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्रम् धारय । अभितिष्ठ पृतन्यतः । अधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठ । सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु । सुमुहूर्तोऽस्तु ॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयन्नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ॥ दीर्घायुष्यमस्तु । सपवित्रपाणिः–

[षोडशाङ्गुलदीर्घं तु वर्तितं दर्भपञ्चकम् ।
अग्रं युग्माङ्गुलं प्रोक्तं ग्रन्थिरेकाङ्गुलं भवेत् ।
द्व्यङ्गुलं चैव वलयं पवित्रस्य तु लक्षणम् ॥]

यथा इन्द्रस्य वज्रं स्याद्यथा शूलं हरस्य च ।
यथा विष्णोश्च चक्रं स्यादाचार्यस्य पवित्रकम् ॥

(अस्त्रेण घण्टां त्रिः सन्ताड्य)

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
घण्टानादं करोम्यादौ देवताह्वानलक्षणम् ॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः पराता भगवो वप । (दर्भेष्वासीनः दर्भान् धारयमाणः)

यत्र यत्र क्रियारम्भे मुष्टिभ्यां मूर्ध्नि देशिकः ।
विनायकं नमस्कृत्य कुट्टनं पञ्चवारकम् ॥

अमृतं यत्सुषुम्नायां सरितामिव सागरम् ।
मूलाधारस्थविघ्नेशं प्राप्य कर्म शुभावहम् ॥

हस्तौ तु वामसव्यौ च मुष्टिमुद्रां प्रकल्पयेत् ।
मध्यमाङ्गुलिभिश्चैव मस्तके सम्प्रताडयेत् ॥

मस्तकस्थामृतेनैव शरीराङ्गानि सेचयेत् ।
अमृताप्लावनेनैव विघ्नराजप्रियो भवेत् ॥

एवं मुष्टिमुद्रां प्रकल्प्य, शुक्लाम्बरधरमिति प्रार्थ्य,

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

(प्राणानायम्य) ओं भूः...भूर्भुवस्सुवरोम् । ममोपात्त...श्री परमेश्वरप्रीत्यर्थं तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबल दैवबलं तदेव श्रीगौरीपते ते अंघ्रियुगं स्मरामि । अद्य करिष्यमाणस्य कर्मण: निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वरपूजां करिष्ये। इति सङ्कल्प्य, (सामान्यार्घ्यं संस्थाप्य)

सामान्यार्घ्यजलेन हरिद्राबिम्बम् अस्त्रेण संप्रोक्ष्य,

ओं गां अनन्ताय नमः ओं गां वैराग्याय नमः
ओं गां धर्माय नमः ओं गां ऐश्वर्याय नमः
ओं गां ज्ञानाय नमः ओं गां पद्माय नमः

पद्मस्योपरि ओं गां गणपत्यासनाय नमः
ओं गां गणपतिमूर्तये नमः

ध्यानम्—

एकदन्तं शूर्पकर्णं गजवक्त्रं महोदरम् ।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिः सीद सादनम् ॥

(एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ।)

ओं गं गणपतये नमः इति आवाहन-स्थापन—सन्निधान-सन्निरोधन-दिग्बन्धनावकुण्ठन—पाशमुद्राः प्रदर्श्य,

ओं गं गणपतये नमः पाद्यं समर्पयामि ।
ओं गं गणपतये स्वधा आचमनं समर्पयामि ।
ओं गं गणपतये स्वाहा अर्घ्यं समर्पयामि ।
आपो हिष्ठेति मन्त्रेण स्नानं समर्पयामि ।
स्नानानन्तरं आचमनं समर्पयामि ।

वस्त्र-यज्ञोपवीत-आभरणार्थे इमानि अक्षतानि समर्पयामि । गन्धान् धारयामि । गन्धानामुपरि हरिद्राकुङ्कुमं समर्पयामि । पुष्पमालां समर्पयामि । पुष्पैः पूजयामि ॥

1 ओं गां सुमुखाय नमः	9 ओं गां धूमकेतवे नमः
2 ओं गां एकदन्ताय नमः	10 ओं गां गणाध्यक्षाय नमः
3 ओं गां कपिलाय नमः	11 ओं गां फालचन्द्राय नमः
4 ओं गां गजकर्णकाय नमः	12 ओं गां गजाननाय नमः
5 ओं गां लम्बोदराय नमः	13 ओं गां वक्रतुण्डाय नमः
6 ओं गां विकटाय नमः	14 ओं गां शूर्पकर्णाय नमः
7 ओं गां विघ्नराजाय नमः	15 ओं गां हेरम्बाय नमः
8 ओं गां गणाधिपाय नमः	16 ओं गां स्कन्दपूर्वजाय नमः

सिद्धिविनायकमूर्तये ओं गां हरिद्रागणपतये नमः नानाविधमन्त्र-पुष्पाणि समर्पयामि । धूपमाघ्रापयामि ।

धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं प्रप्रितमं जुष्टतमं वह्नितमं देवहूतमं अह्रुतमसि हविर्धानं दृँहस्व माह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे माभेर्मा संविक्था मा त्वा हिँसिषम् ॥

दीपं दर्शयामि—

उद्दीप्यस्व जातवेदोऽपघ्नन्निरृतिं मम । पशूँश्च मह्यमावह जीवनं च दिशो दिश । मानो हिँसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातय ।

ओं भूर्भुवस्सुवः महागणपतये नमः नालिकेरखण्डद्वयं कदळीफलं च निवेदयामि । कर्पूरताम्बूलं समर्पयामि । मन्त्रपुष्पं सुवर्णपुष्पं च समर्पयामि ।

सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति । कर्पूर-नीराजनं समर्पयामि ।

मूलमन्त्रं यथाशक्ति जप्त्वा, समर्प्य, प्रार्थ्य,

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

सर्वदेवाग्रज श्रेष्ठ विघ्नेश गणनायक ।
त्वामुपास्य च यत्कर्म तत्कर्म सफलं कुरु ॥

गौरीपुत्र गणाध्यक्ष सर्वविघ्ननिवारक ।
अस्मिन् कर्मणि सर्वस्मिन् निर्विघ्नं कुरु सिद्धये ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

धूमकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः ।
वक्रतुण्डश्शूर्पकर्णो हेरम्बः स्कन्दपूर्वजः ॥

षोडशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥

संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ।
एवं सम्प्रार्थ्य विघ्नेशं कर्म सङ्कल्पयेत् गुरुः ॥

२ पुण्याहवाचनम्

कारणे—

अथातः संप्रवक्ष्यामि पुण्याहस्य विधिक्रमम् ।
पुकारं पापनाशं स्याद् ण्याकारं देहशुद्धिदम् ॥

हकारं स्थानशुद्धिः स्यात् पुण्याहं तु विधीयते ।
सर्वपापहरं चैव सर्वसिद्धिप्रदायकम् ॥

नित्ये नैमित्तिके काम्ये स्थानबिम्बादिशुद्धिषु ।
अथवा मङ्गले कार्ये पुण्याहं तु समाचरेत् ॥

सर्वमङ्गलकार्यादौ पुण्याहप्रोक्षणं शुभम् ।
सर्वेषामुपरिष्टाच्च क्रियमाणस्य कर्मणः ॥

पुण्याहं पूर्वमुद्दिष्टं क्रियासाफल्यहेतवे ।
अन्यथा शिवतुल्योऽपि विघ्नैरेवाभिभूयते ॥

पुण्याहजलसङ्कीर्णं यस्मिन् कर्मणि नास्ति हि ।
तत्कर्म विफलं प्राहुर्भूतप्रेतैः प्रबाध्यते ॥

तस्माद् विध्युक्तमार्गेण पुण्याहप्रोक्षणं हितम् ।
स्थण्डिले कर्णिकामध्ये रमां सम्पूज्य देशिकः ॥

तस्योर्ध्वे विन्यसेत्पात्रं पूजयेद्धृदयेन तु ।
पृष्ठे प्रजापतिश्चैव मध्यमे विष्णुदैवतम् ॥

अग्रं वै रुद्रदैवत्यं ओष्ठं वै स्कन्ददैवतम् ।
घ्राणं विघ्नेशं इत्युक्तं कण्ठे वै वसुदैवतम् ॥

कुक्षौ वरुणदैवत्यं पादौ भास्करदैवतम् ।
वक्त्रं तु चन्द्रदैवत्यं पार्श्वयोर्नन्दिकाळकौ ॥

मध्यमे सप्ततीर्थं स्यात्कलशे च यथाक्रमम् ।
गंगे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धुकावेरि जलेस्मिन् सन्निधिं कुरु ॥

कर्मारम्भस्य तत्काले पूर्वं सङ्कल्प्य बुद्धिमान् ।
दर्भाणां च द्वयं ग्राह्यं द्वादशाङ्गुलमायतम् ॥

आचार्यो दक्षिणे हस्तेऽनामिकायां सुयोज्य च ।
प्राणायामत्रयं कृत्वा कर्णं संस्पृश्य दक्षिणम् ॥
जानुविन्यस्तापसव्यकरे सव्यं सुयोजयेत् ॥

यावत्कर्म करिष्यामि दर्भोद्वासनमुत्तरे ।
भूसुराणां द्वयं दत्त्वा देशिको दर्भयुग्मयुक् ॥

आपः प्रयोगमाचार्यः शिवा आपश्च ऋत्विजः ।
अक्षतं देशिको ब्रूयादन्येऽक्षतमरिष्टकम् ॥

अन्वाहार्यस्तथा ब्रूयात् सौमन्वाहार्य इत्यपि ।
देशिको दक्षिणाः स्वस्ति दक्षिणाः प्रतिवाचकः ॥

बहुदेयमस्त्वाचार्यो वदेयुर्भूसुरास्तथा ।
देशिकस्तु जपं कृत्वा भूसुरेण समन्वितः ।
द्रव्यशुद्धिनिमित्ताय शुद्धिपुण्याहमाचरेत् ॥

शुक्लाम्बरधरं विष्णुं ... शान्तये ! प्राणायामत्रयं कृत्वा, ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शिवशिवः शम्भोराज्ञया प्रवर्तमानस्य अद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलौ युगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे (दण्डकारण्ये) शकाब्दे अस्मिन् वर्तमाने व्यवहारिके प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये* नामसंवत्सरे [1]अयने ...[2]...ऋतौ [3]...मासे [4]...पक्षे [5]...शुभतिथौ [6]...वासरयुक्तायां [7]...नक्षत्रयुक्तायां शुभनक्षत्र शुभयोग शुभकरण एवंगुण सकलविशेषणविशिष्टायां अस्यां [8]शुभतिथौ सपरिवार श्री अम्बासमेतपरमेश्वरस्य नवांदनमहोत्सवाख्य महामङ्गळकर्मणि पूजोपकरणशुद्ध्यर्थं शुद्धिपुण्याहवाचनं करिष्ये । इति सङ्कल्प्य, गणेशस्य पराङ्मुखार्घ्यं दत्त्वा हृदि सम्योजयेत् ।

---

*வருஷத்தின் பெயர், 1. உத்தராயணம்/தக்ஷிணாயனம்
2. ருதுவின் பெயர். 3. மாஸம், 4. சுக்ல/கிருஷ்ண பக்ஷம்.
5. திதி, 6. கிழமை, 7. நக்ஷத்திரம். 8. திதி,

भूमौ कदळीपत्रं निक्षिप्य । तदुपरि प्रस्थाष्टक तण्डुलं आपूर्य । तन्मध्ये साष्टपत्रकर्णिकपद्ममालिख्य । पद्ममध्ये लक्ष्म्यै नमः इति सम्पूज्य, तन्मध्ये त्रिसूत्रवेष्टितां आपोवा इति मन्त्रेण वारिपूरितां सकूर्चां सपिधानां सुवस्त्रां सन्नाळिकेर चूतपल्लवाद्यैरलंकृतां वर्धनीं निवेश्य, कलशपूजां विधाय ।

वरुणकुम्भमूले ओं ह्रां अनन्ताय नमः
ओं ह्रां धर्माय नमः
ओं ह्रां ज्ञानाय नमः
ओं ह्रां वैराग्याय नमः
ओं ह्रां ऐश्वर्याय नमः
ओं ह्रां पद्माय नमः
कुम्भपृष्ठे —ओं ह्रां ब्रह्मणे नमः
मध्ये —ओं ह्रां विष्णवे नमः
अग्रे —ओं ह्रां रुद्राय नमः
ओष्ठे —ओं ह्रां स्कन्दाय नमः
घ्राणे —ओं ह्रां विघ्नेशाय नमः
कण्ठे —ओं ह्रां वसुभ्यो नमः
पादयोः —ओं ह्रां भास्कराय नमः
वक्त्रे —ओं ह्रां चन्द्रमसे नमः
उभयपार्श्वयोः—ओं ह्रां नन्दिने नमः
ओं ह्रां महाकाळाय नमः
कुक्षौ —सप्तनदीभ्यो नमः

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिं कुरु ॥

मध्ये — ओं वं वरुणासनाय नमः
ओं वं वरुणमूर्तये नमः

नागपाशधरं हृष्टं रक्तौघद्युतिविग्रहम् ।
शशाङ्कधवलं ध्यायेत् वरुणं मकरासनम् ॥

ओं वं विद्यादेहाय नमः
नेत्रेभ्यो नमः
ओं वं वरुणाय नमः

इमं मे वरुणश्रुधीहवमद्या च मृडय । त्वामवस्युराचके । तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशँस मान आयुः प्रमोषीः ॥

गुलं च निवेदयामि । निवेदनानन्तरम् आचमनीयं समर्पयामि ।

फूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

वरुणाय नमः कर्पूरताम्बूलं निवेदयामि । मन्त्रपुष्पं समर्पयामि । स्वर्णपुष्पं समर्पयामि । समस्तोपचारान् समर्पयामि । अस्मिन् पुण्याहवाचनजपकर्मणि सर्वेभ्यो ब्राह्मणेभ्यो नमः (दर्भेण कुम्भं संस्पृशन्) अथ दर्भान् धारयमाणः ।

ओं भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये—ओं वाच्यताम् ।
ओम् आपः — शिवा आपः सन्तु
ओं गन्धाः — सुगन्धाः पान्तु
ओं सुमनसः— सौमनस्यमस्तु
ओम् अक्षतम्— अक्षतं चारिष्टं चास्तु
ओं अन्वाहार्यः– सौमन्वाहार्योऽस्तु
ओं दक्षिणाः — स्वस्ति दक्षिणाः पान्तु । बहुदेयमस्तु ।

इडा देवहूर्मनुर्यज्ञनीः बृहस्पतिरुक्थामदानि शँसिषद्विश्वे देवास्सूक्तवाचः पृथिवि मातर्मामाहिँसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु

वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासँ शुश्रूषेण्यां मनुष्येभ्यस्तम्मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु । (ओं शान्तिः शान्तिः शान्तिः)

ओं मनस्समाधीयताम्—समाहितमनसः स्मः ।
प्रसीदन्तु भवन्तः —प्रसन्नाः स्मः

शान्तिः — अस्तु	अविघ्नम् — अस्तु
पुष्टिः — अस्तु	आयुष्यम् — अस्तु
तुष्टिः — अस्तु	आरोग्यम्— अस्तु
ऋद्धिः — अस्तु	धनधान्यसमृद्धिः—अस्तु

गोब्राह्मणेभ्यः शुभं — भवतु
ऐशान्यां बहिर्देशे अरिष्टनिरसनम् — अस्तु
आग्नेय्यां यत्पापं तत्प्रतिहतम्—अस्तु

सर्वाः सम्पदः — सन्तु
सर्वशोभनम् — अस्तु
शुभं कर्म — अस्तु

पुण्याहकालो वाच्यताम् ।

यत्पुण्यं नक्षत्रम् । तद्बट्कुर्वीतोपव्युषम् । यदा वै सूर्य उदेति । अथ नक्षत्रन्नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत् । तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते ।

पुण्याहं भवन्तो ब्रुवन्तु — ओं पुण्याहम् ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । स्वस्ति भवन्तो ब्रुवन्तु । कर्मणे स्वस्ति ।

ऋध्या स्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नोऽस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । ओं ऋद्धि

भवन्तो ब्रुवन्तु कर्म ऋध्यताम् । ऋद्धिस्समृद्धि: अस्तु पुण्याह समृद्धि: अस्तु शुभं कर्म अस्तु श्रीमहादेव: प्रीयतां प्रीयतां भगवान् महादेव: ।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिन: । सुरभिनो मुखा-करत्प्रण आयूंषि तारिषत् । आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे । योवश्शिवतमो रसस्तस्य भाजयते ह न: । उशती-रिव मातर: । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च न: ।

हिरण्यवर्णाश्शुचय: पावका यासु जात: कश्यपो यास्विन्द्र: । अग्नि या गर्भं दधिरे विरूपास्तान आपश्शँस्योना भवन्तु । यासाँराजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतश्शुचयो या: पावका-स्तान आपश्शँस्योना भवन्तु । यासान्देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति । या: पृथिवीं पयसोन्दन्ति शुक्रास्तान आपश्शँ-स्योना भवन्तु । शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोपस्पृशत त्वचं मे । सर्वाँ अग्नीँरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त । पवमानस्सुवर्जन: । पवित्रेण विचर्षणि: । य: पोता स पुनातु मा । पुनन्तु मा देवजना: । पुनन्तु मनवो धिया । पुनन्तु विश्व आयव: । जात-वेद: पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूँरनु । यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवित: । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठा: । तया मदन्तस्सधमाद्येषु । वयँस्याम पतयो रयीणाम् । वैश्वानरो रश्मिभिर्मा पुनातु । वात: प्राणेनेषिरो मयो भू: । द्यावापृथिवी पयसा पयोभि: । ऋतावरो यज्ञियेमा पुनीताम् । वृहद्भिस्सवितस्तृभि: । वर्षिष्ठैर्देव-मन्मभि: । अग्ने दक्षै: पुनाहि मा । येन देवा अपुनत । येनापो दिव्यं कश: । तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । य: पाव-मानीरध्येति । ऋषिभिस्संभृतँरसम् । सर्वँस पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभि: सम्भृतं रसम् ।

तस्मै सरस्वती दुहे । क्षीरगँ सर्पिर्मधूदकम् । पावमानीस्स्वस्त्ययनीः । सुदुघा हि पयस्वतीः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतँ हितम् । पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् । कामान्थ्समर्धयन्तु नः । देवीर्देवैस्समाभृताः । पावमानीस्स्वस्त्ययनीः । सुदुघा हि घृतश्चुतः । ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतँ हितम् । येन देवाः पवित्रेण । आत्मान पुनते सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतोद्यामँ हिरण्मयम् । तेन ब्रह्मविदो वयम् । पूतं ब्रह्म पुनीमहे । इन्द्रस्सुनीती सह मा पुनातु । सोमस्स्वस्त्या वरुणस्समीच्या । यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु ।

भूर्भुवस्सुवः । तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे । ओं शान्तिश्शान्तिश्शान्तिः ।

वरुणाय नमः सकलाराधनैः सुवर्चितम् । तत्त्वायामि ..प्रमोषीः । अस्मात् कुम्भात् सकलतीर्थाधिपतिं वरुणं यथास्थानं प्रतिष्ठापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च,

वास्तोष्पते प्रतिजानीह्यस्मास्थ्स्वावेशो अनमीवो भवानः । यत्त्वेमहे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे । वास्तोष्पते शग्मया सँसदा ते स क्षीमहि रण्वया गातुमत्या । आवः क्षेम उत योगे वरन्ना यूयं पातस्स्वस्तिभिस्सदा नः । वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व । अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः । शिवँ शिवम् । शुभँ शुभम् ।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यस्स्मरेत् साम्बमीशानं सबाह्याभ्यन्तरश्शुचिः ॥ भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः । इति मन्त्रैः पुण्याहाम्भसा प्रोक्षणं कुर्यात् । (सर्वत्र संप्रोक्ष्य)

३ भूतशुद्धिः

आत्मशुद्धिस्तु पूर्वं स्यात् स्थानशुद्धिर्द्वितीयकम् ।
तृतीयं द्रव्यशुद्धिः स्यांच्चतुर्थं लिङ्गशोधनम् ॥

पञ्चमं मन्त्रशुद्धिः स्यादित्येताः पञ्चशुद्धयः ।
प्रारब्धं देहमेवोक्तं देहप्रारब्धमेव हि ।
देहप्रारब्धसंयोगाद् भूतशुद्धिर्दिने दिने ॥

कुड्यावेष्टितगेहमध्यकलिते पट्टादिकेच्छासने
स्वस्थः प्रागृजुपूर्वकायगलको लग्ने द्विजो रेचयेत् ।
नाडीशुद्धिषु मन्दमन्दमुदरं संपूरयेद्वामतः
सेन्दोर्बाह्यसमीरणेन मिहिरैस्तालैः क्रमात्कुम्भकम् ॥

कृत्वा शक्तिवशाद्विरेचयतु तं पिङ्गार्कवाहात्ततो
निर्गर्भस्सततं जयं च कुरुते खानां स गर्भः पुनः ।
ध्यानाज्जापयुतान्निहन्ति सकलं पापं निशोत्थं पुनः
प्रातः सायमहस्सु चैष कुरुते तत्त्वादिसाक्षात्कृतिम् ॥

(हृद्व्योमाम्बुजकर्णिकार्कशशभृद्बिम्बाग्निशक्त्यूर्ध्वगं
प्राणायामयुतो मृणालविलसत्सूत्रप्रतीकाशकम् ।
ज्योतिस्तद्गतमानसोऽपि परतः स्वद्वादशान्तस्थितं
स्वच्छाम्भःसदृशप्रभं परशिवं योगी चिता पश्यति ॥)

तत्र पूर्वं करन्यासं विधाय, पादांगुष्ठद्वयादारभ्य यावद्बस्ति द्विरूपाम् ऊर्ध्वं ब्रह्मबिलान्तम् एकरूपां हृत्कण्ठादिषु इडापिङ्गलाभ्यां संयुक्ताम् अधोमुखपद्ममुकुलयुक्तां सुषिररूपां सुषुम्नां सञ्चिन्त्य, तस्या एवान्तर्बहिः स्रवदमृतधारां परमव्योमरूपिणीं शक्तिं विभाव्य, मध्ये हूंकारं ज्वलन्तं

सञ्चिन्त्य, पूरककुम्भकं च कृत्वा, हूंकारे चित्तं निवेश्य, वायूमूर्ध्वं विरेचयेत् ।

'हूं फट्' इति सन्ततोच्चारेण पद्ममुकुलान् ऊर्ध्वमुखान् भिन्नग्रन्थींश्च विधाय, प्रतिनिवृत्त्य, दक्षिणनाड्या विरेच्य, पुनः पूरकवायुना संहृत-चैतन्यं हृत्कमलाश्रितं स्फुरत्तारकाकारं, सान्तबीजमयं जीवं हृत्सम्पुटितं हूंकारं मूर्ध्नि विन्यस्य बीजविग्रहं हूंकारशिखान्तस्थं पुर्यष्टकावच्छिन्नं पुरुषं सूक्ष्मं बिन्दुभूतं एकाकिनं निरामयं ध्यात्वा, कुम्भकं कृत्वा वायु-मूर्ध्वं प्रवर्तयन् । संहारमुद्रयादाय, ब्रह्मादिकारणत्यागक्रमेण एके-नोद्घातेन ओं हूं हां हं हां हूम् आत्मने नमः इति भोग्यकर्मोपभोगार्थं द्वादशान्ते शिवे संयोजयेत् ।

एवं बीजवृत्या शिवे लीनः सूक्ष्मदेहशुद्धये प्रातिलोम्येन स्वेषु स्वेषु कारणेषु तत्त्वानि बिन्दुपर्यन्तं लयं नयेत् । तद्यथा—

गन्धे पृथ्वी, रसे जलं, रूपे अग्निः, स्पर्शे वायुः, शब्दे व्योम, एता-स्तन्मात्रास्तामसाहंकारे, वाक्-पाणि-पाद-पायूपस्थाख्यानि राजसाहंकारे श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि मनश्च सात्विकाहङ्कारे स च बुद्धौ सा गुणेषु, गुणतत्वं प्रकृतौ, सा रागविद्ये च कलायां, पुम्स्तत्वं कालो नियतिः कला च मायायां एवं विलीनानीति विभाव्य शुद्धविद्यातत्त्वं ईश्वरतत्त्वे तत् सदाशिवतत्त्वे तच्छक्तितत्त्वे तच्छिवतत्त्वे तदपि अक्षुब्धरूपे बिन्दौ विलीनमिति भावयेत् । यद्वा–

शब्दस्पर्शौ त्यजेद्ब्राह्मे रसं वै केशवे त्यजेत् ।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहङ्कारमीश्वरे ।
मनोबिन्दू क्रमादेव तत्वज्ञानी शिवे त्यजेत् ॥

ततः स्थूलदेहं विशोधयेत् ।

पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितम् ।
पार्थिवं चतुरश्रं तु हेमाभं वज्रलाञ्छितम् ॥

लबीजं ब्रह्मदैवत्यं अजात हृदयात्मजम् ।
निवृत्याख्य कलोपेतं ह्लामित्युद्घातपञ्चकम् ॥

ह्लामिति पार्थिवबीजेनाधिनायकेन सद्योजातेनाधिष्ठितं ब्रह्मणा कारणेश्वरेण युक्तं निवृत्तिकलारूपं चतुरश्रं पादादारभ्य मूर्धान्तं विचिन्त्य "ओं ह्लां ह्लां ह्लां ह्लां ह्लां" निवृत्तिकलायै हः हुं फट् इति, पूरकपूर्वं सुषुम्नायां यावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा "प्रतिनिवृत्य" दक्षिण-नाड्या विरेच्य, इत्युद्घातपञ्चकेन गन्ध-रस-रूप-स्पर्श-शब्दगुणानुत्सार्य पृथ्वीं स्वविरुद्धवायुनाभिभूतां तदाकारान्वितां चिन्तयेत् ।

तदनु आप्यमण्डलं द्रवस्वभावम् ,

अर्धचन्द्रनिभं सौम्यं शुभ्रमम्भोजलाञ्छितम् ।
आप्यमिन्दुसिताब्जाङ्गं विष्णुदैवं वबीजकम् ॥

वामशीर्षसमायुक्तं प्रतिष्ठाकलयान्वितम् ।
युक्तं चतुर्भिरुद्घातैः ह्वीमित्युद्घातपूर्वकम् ॥

ह्वीं इति आप्यबीजेनाधिनायकेन वामदेवेनाधिष्ठितं विष्णुना कारणेश्वरेण युक्तं प्रतिष्ठाकलारूपं जान्वारभ्य मूर्धान्तं विचिन्त्य "ओं ह्वीं ह्वीं ह्वीं ह्वीं प्रतिष्ठा कलायै हः हुं फट्" इति पूरकपूर्वं सुषुम्नायां यावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा, प्रतिनिवृत्य दक्षिणनाड्या विरेच्य इत्युद्घातचतुष्टयेन रस-रूप-स्पर्श-शब्दगुणानुत्सार्य जलं स्वविरुद्धवह्निना-भिभूतं तदाकारं भावयेत् ।

ततः,

"आग्नेयं माण्डलं त्र्यश्रं रक्तं स्वस्तिकलाञ्छितम् ।"
अग्नित्र्यश्रं सप्तशिवं रक्ताभं रुद्रदैवतम् ।

राणाघोरसमायुक्तं विद्याख्यकलयान्वितम् ।
युक्तं तत्त्रिभिरुद्घातैः ह्लूमित्युद्घातपूर्वकम् ॥

ह्लूम् इति वह्निबीजेनाधिनायकेनाधिष्ठितं रुद्रेण कारणेश्वरेण युक्तं विद्याकलारूपं नाभ्या आरभ्य मूर्धान्तं विचिन्त्य, ओं ह्लूं ह्लूं ह्लूं विद्याकलायै हः हुं फट् इति पूरकपूर्वं सुषुम्नायां यावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्या विरेच्य इति उद्घातत्रयेण रूप-स्पर्श-शब्द-गुणानुत्सार्य, वह्निं स्वविरुद्धजलेनाभिभूतं तदाकारं भावयेत् ।

पश्चात्

"षडश्रं मण्डलं वायोः बिन्दुभिष्षड्भिरङ्कितम् ।"
वायव्यं रसकोणन्तु बिन्दुषट्कमधासितम् ॥

ईशाधिपत्यं यार्णं तत्पुरुषकवचान्वितम् ।
शान्त्या युक्तं द्विरुद्घातैः ह्यैमित्युद्घातपूर्वकम् ॥

कृष्णं ह्यैमिति वायुबीजेनाधिनायकेन तत्पुरुषेणाधिष्ठितं ईश्वरेण कारणेश्वरेणान्वितं शान्तिकलारूपं हृदयादारभ्य मूर्धान्तं विचिन्त्य ओं ह्यैं ह्यैं शान्तिकलायै हः हुं फट् इति पूरकपूर्वं सुषुम्नायां यावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा, प्रतिनिवृत्य, दक्षिणनाड्या विरेच्य इत्युद्घातद्वयेन स्पर्श-शब्द-गुणानुत्सार्य, वायुं स्वविरुद्ध पृथिव्याभिभूतस्वरूपं तदाकारं चिन्तयेत् ।

तदनु नभोमण्डलं व्योमाकारं शुद्धस्फटिकसन्निभं शून्यं बिन्दुशक्त्या विभूषितम्,

आकाशं वर्तुलं त्यक्तलाञ्छनं धूम्रवर्णकम् ।
सदेशाधिष्ठितं हार्णमीशनेत्रास्त्रसम्युतम् ।
एकोद्घातेन हौमुक्त्वा यथातीतं नियोजयेत् ॥

हौमिति नभोबीजेनाधिनायकेन ईशानेनाधिष्ठितं कारणेशेन सदाशिवे-नोपेतं शान्त्यतीतकलामयं कण्ठादारभ्य मूर्धान्तं विचिन्त्य ओं हौं शान्त्यतीतकलायै हः हुं फट् इति पूरकपूर्वं सुषुम्नायां यावत् द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्त्य दक्षिणनाड्या विरेच्य इत्येकेनोद्घातेन शब्दगुणमुत्सार्य अनित्यत्व - अव्यापकत्व - अशुद्धत्वादिम्वस्वरूपं विमुच्य नित्यत्वव्यापकत्व-शुद्धत्वादियुक्तपरमाकाशाभिभूतस्वरूपं भावयेत् ।

ततः अस्त्रेण पादाङ्गुष्ठोत्थितेन अग्निना आरब्धशरीरगतभूतदोषान् दग्ध्वा आप्लावयेत् ।

ततः बन्धकरूपं सर्वशून्यमिति विभाव्य । वौषडन्तमूलेन शिखा-न्तस्थाधोमुखस्रवदमृतधाराभिः सकलनाडीमुखं प्रविष्टाभिः स्वबाह्या-भ्यन्तरं सर्वशरीरमाप्लाव्य, हृदये नाळपत्रकर्णिकारूपं पद्मं अकारादि-मात्रात्रययुक्तेन प्रणवेन अवतीर्णं शुद्धविद्यात्मकं आसनं विन्यस्य, तत्कर्णिकायां पुर्यष्टकं चतुष्कलेन प्रणवेन अवतीर्णं भावयित्वा तस्मिन् द्वादशान्तस्थं बीजरूपं शिवमयमात्मानं पञ्चकलेन प्रणवेन सह आत्म-मन्त्रेण पूरकेण सृष्ट्या समानीय ज्योतीरूपं संस्थाप्य, वौषडन्तशक्ति-मन्त्रोच्चारेण क्षुब्धशक्तिबहुलामृतप्रवाहेणाभिषिञ्चेत् ।

तदनु पूर्ववदङ्गन्यासं विधाय, दण्डभङ्गि-मुण्डभङ्गि-वक्त्रभङ्ग्या-दीनि च विन्यस्य,

दण्डभङ्गिन्यासः

ओं होम ईशानमूर्धाय नमः (मूर्ध्नि)
ओं हें तत्पुरुषवक्त्राय नमः (वक्त्रे)
ओं हुम् अघोरहृदयाय नमः (हृदये)
ओं हिं वामदेवगुह्याय नमः (गुह्ये)
ओं हं सद्योजातमूर्तये नमः (पादयोः)

इति दण्डभङ्गिन्यासः

अथ मुण्डभङ्गिन्यासः

तर्जनीयुक्त-अङ्गुष्ठाभ्यां—

ओं होम् ईशानमूर्धाय नमः (ऊर्ध्वमूर्ध्नि)
ओं हें तत्पुरुषमूर्धाय नमः (पूर्वमूर्ध्नि)
ओं हुम् अघोरमूर्धाय नमः (दक्षिणमूर्ध्नि)
ओं हिं वामदेवमूर्धाय नमः (उत्तरमूर्ध्नि)
ओं हं सद्योजातमूर्धाय नमः (पश्चिममूर्ध्नि)

इति मुण्डभङ्गिन्यासः

अथ वक्त्रभङ्गिन्यासः

ओं होम् ईशानवक्त्राय नमः (ऊर्ध्ववक्त्रे)
ओं हें तत्पुरुषवक्त्राय नमः (पूर्ववक्त्रे)
ओं हुम् अघोरवक्त्राय नमः (दक्षिणवक्त्रे)
ओं हिं वामदेववक्त्राय नमः (उत्तरवक्त्रे)
ओं हं सद्योजातवक्त्राय नमः (पश्चिमवक्त्रे)

इति वक्त्रभङ्गिन्यासः

अथ कलाभङ्गिन्यासः

ओं हौं शान्त्यतीतकलायै नमः (मूर्ध्नि)
ओं ह्यैं शान्तिकलायै नमः (वक्त्रे)
ओं हूं विद्याकलायै नमः (हृदये)
ओं ह्वीं प्रतिष्ठाकलायै नमः (गुह्ये)
ओं ह्लां निवृत्तिकलायै नमः (पादयोः)

इति कलाभङ्गिन्यासः

अनन्तरम् अष्टत्रिंशत्कलान्यासः । अङ्गुष्ठेन

ओम् हों ईशानस्सर्वविद्यानां शशिन्यै नमः (ऊर्ध्वमूर्ध्नि)
ओम् हों ईश्वरस्सर्वभूतानां अङ्गदायै नमः (पूर्वमूर्ध्नि)
ओम् हों ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मेष्टायै नमः (दक्षिणमूर्ध्नि)
ओम् हों शिवो मे अस्तु मरीच्यै नमः (उत्तरमूर्ध्नि)
ओम् हों सदाशिवों ज्वालिन्यै नमः (पश्चिममूर्ध्नि)

एवम् ईशानकलापञ्चकम्

ओं हेम् अव्यक्तकलायै शान्त्यतीतकलायै नमः (ऊर्ध्ववक्त्रे)
ओं हें तत्पुरुषाय विद्महे शान्त्यै नमः (पूर्ववक्त्रे)
ओं हें महादेवाय धीमहि विद्यायै नमः (दक्षिणवक्त्रे)
ओं हें तन्नो रुद्र प्रतिष्ठायै नमः (उत्तरवक्त्रे)
ओं हें प्रचोदयान्निवृत्त्यै नमः (पश्चिमवक्त्र)

इति तत्पुरुषकलाश्चतस्रः

अंगुष्ठयुक्तमध्यमया—

ओं हुम् अघोरेभ्यस्तमायै नमः (हृदये)
ओं हुम् अथ घोरेभ्यो मोहायै नमः (ग्रीवायाम्)
ओं हुं घोररक्षायै नमः (दक्षिणांसे)
ओं हुं घोरतरेभ्यश्च निष्ठायै नमः (वामांसे)
ओं हुं सर्वेभ्यः सर्वमृत्यवे नमः (नाभौ)
ओं हुं शर्वेभ्यो मायायै नमः (जठरे)
ओं हुं नमस्तेऽस्तु रुद्रभयायै नमः (पृष्ठे)
ओं हुं रूपेभ्यो जरायै नमः (उरसि)

इति बहुरूपकलाष्टकम्

अंगुष्ठयुक्तानामिकया—

ओं हिं वामदेवाय नमो रजायै नमः (गुह्ये)
ओं हिं ज्येष्ठाय नमो रक्षायै नमः (लिङ्गे)
ओं हिं रुद्राय नमो रत्यै नमः (दक्षिणोरौ)
ओं हिं कालाय नमः पाल्यै नम. (वामोरौ)
ओं हिं कलकामायै नमः (दक्षिणजानुनि)
ओं हिं विकरणाय नमः संयमिन्यै नमः (वामजानुनि)
ओं हिं बलक्रियायै नमः (दक्षिणजङ्घायाम्)
ओं हिं विकरणाय नमो बुद्धयै नमः (वामजङ्घायाम्)
ओं हिं बलकार्यै नमः (दक्षिणस्फिचि)
ओं हिं बलप्रमथनाय नमो धात्र्यै नमः (वामस्फिचि)
ओं हिं सर्वभूतदमनाय नमो भ्रामिण्यै नमः (कट्याम्)
ओं हिं मनो मोहिन्यै नमः (दक्षिणपार्श्वे)
ओं हिम् उन्मनाय नमो भयायै नमः (वामपार्श्वे)

इति वामदेवकलास्त्रयोदश

ओं हं सद्योजातं प्रपद्यामि सिद्धयै नमः (दक्षिणपादे)
ओं हं सद्योजाताय वै नमो ऋद्धयै नमः (वामपादे)
ओं हं भवे द्युत्यै नमः (दक्षिणपाणौ)
ओं हं अभवे लक्ष्म्यै नमः (वामपाणौ)
ओं हम् अनादिभवे मेधायै नमः (नासिकायाम्)
ओं हं भवस्व मां कान्त्यै नमः (शिरसि)
ओं हं भव स्वधायै नमः (दक्षिणबाहौ)
ओं हम् उद्भवाय नमो धृत्यै नमः (वामबाहौ)

इति सद्योजातकलाष्टकम्

अन्तर्मातृकान्यासः

मूलाधारस्थ वीणादण्डमूले चतुर्दळपद्मे ओं गं गणपत्यासनाय नमः । ओं गं गणपतिमूर्तये नमः । ध्यानम् —

वशषसदळयुक्ते सौम्यमाधारपद्मे
तरुणमरुणगात्रं वारणास्यं गणेशम् ।
अभयवरदहस्तं चारुपाशाङ्कुशोद्यत्
करयुगळमनन्यं चिन्तयेद्विघ्नराजम् ॥

गणानां त्वा ... सादनम् । एकदन्ताय ... प्रचोदयात् । ओं वं शं षं सं चतुर्दळपद्मनिवासिने सिद्धलक्ष्मी–वल्लभा–समेताय श्रीगणपतये हंसस्सोहं हंसस्स्वाहा ॥

स्वाधिष्ठानस्य वीणादण्डोर्ध्वे षड्दळपद्मे ओं ह्रां ब्रह्मासनाय नमः । ओं ह्रां ब्रह्ममूर्तये नमः । ध्यानम् —

बभमयरलसंज्ञैः अक्षरैः क्लृप्तपत्रे
सुखकरमुपविष्टं पङ्कजे पद्मयोनिम् ।
अभयवरदहस्तं गण्डिकां चाक्षमाला
करयुगळमनन्यं चिन्तयेद्विश्वयोनिम् ॥

ब्रह्मजज्ञानं प्रथमं पुरस्तात् । विसीमतस्सुरुचोवेन आवः । स-बुध्निया उपमा अस्य विष्ठाः । सतश्च योनिमसतश्च विवः ॥

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि ।
तन्नो ब्रह्म प्रचोदयात् ॥

ओं वं भं मं यं रं लं षड्दळपद्मनिवासिने सावित्री–गायत्री–समेताय श्री ब्रह्मणे हंसस्सोहं हंसस्स्वाहा ॥

मणिपूरके नाभौ—

डाद्यैः फान्तगतैः प्रकल्पितदळैः पद्मे निविष्टं हरिं
मार्तण्डद्युतिमादिपूरुषमजं नारायणं शार्ङ्गिणम् ।
हस्ताम्भोजगदारशङ्खममलं पीताम्बरं कौस्तुभं
श्रीवत्साङ्कितमब्धिजासहचरं ध्यायेज्जगन्मोहनम् ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाँसुरे ।

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ओं डं ढं णं तं थं दं धं नं पं फं दशदळपद्मनिवासिने गरुडवाहनाय धरालक्ष्मीसमेताय श्रीविष्णवे हंसस्सोहं हंसस्स्वाहा ।

अनाहतस्य हृदये—

काद्यैष्ठान्तगतैः प्रकल्पितदले पंकेरुहे पार्वती-
कान्तं कान्तिशशाङ्ककोटिसदृशं प्रख्यं कपर्दोज्ज्वलम् ।
शान्तं टङ्कमृगाभयेष्टवरदं युक्तं करैः कङ्कणैः
ध्यायेदीश्वरमीप्सितार्थफलदं हृत्पुण्डरीके स्थितम् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ।

ओं कं खं गं घं ङं चं छं जं झं ञं टं ठं द्वादशदळपद्मनिवासिने गौर्यम्बिकासमेताय श्री रुद्रेश्वराय हंसस्सोहं हंसस्स्वाहा ॥

विशुद्धस्य तालुमूले—

मूर्त्यंगेषु निविष्टमङ्गरहितं शान्तं तुषारप्रभं
व्याप्ताशेषचराचरैर्गुणगणैः भावेन संवेष्टितम् ।
मूर्तामूर्तमनेकमूर्तममलं ज्योतिः प्रदीपोपमं
साक्षात् षोडशपत्रयुक्तकमले जीवं परं चिन्तयेत् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि ।
तन्नश्शिवः प्रचोदयात् ॥

ओं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति षोडशदळपद्मनिवासिने उन्मनीवाग्वादिनीसमेताय श्रीमहेश्वराय हंसस्सोहं हंसस्स्वाहा ॥

आज्ञायां भ्रुवोर्मध्ये

हक्षाभ्यां परिवृत्तपत्रकमले दिव्ये जगत्कारणं
विश्वोत्तीर्णमनेकदेहममलं स्वच्छन्दमात्मेच्छया ।
तत्तद्योगतया स्वदेशिकतनुं भावेन दीपांकुरं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतम् ॥

ईशानस्सर्वविद्यानां...सदाशिवोम् ॥

हंसहंसाय विद्महे परमहंसाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥

ओं हं क्षं द्विदळपद्मनिवासिने मनोन्मनी-धर्मशक्ति-समेताय सदाशिवाय श्रीगुरवे हंसस्सोहं हंसस्स्वाहा ॥

ब्रह्मरन्ध्रे

विश्वव्यापिनमादिदेवममलं सत्यं परं निष्कलं
नित्यं युक्तसहस्रपत्रकमले व्याप्ताक्षरैर्मण्डितम् ।
नित्यानन्दमनन्तपूर्णभरितं शब्दस्तुषारैर्युतं
शब्दब्रह्ममयं परात्परमहं भक्त्या परं भावये ॥

मूर्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् ।
कविँसम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः ॥

निरञ्जनाय विद्महे निराभासाय धीमहि ।
तन्नः सूक्ष्मः प्रचोदयात् ॥

सहस्रदळपद्मनिवासिने पराशक्तिसमेताय परशिवाय परात्पराय हंसस्सोहं हंसस्स्वाहा ॥

॥ इति अन्तर्मातृकान्यासः ॥

बहिर्मातृकान्यासः

शिरसि — ओम् अं नमः
मुखमण्डले — ओम् आं नमः
दक्षिणचक्षुषि— ओम् इं नमः
वामचक्षुषि — ओम् ईं नमः
दक्षिणकर्णे — ओम् उं नमः
वामकर्णे — ओम् ऊं नमः
दक्षिणकपोले— ओम् ऋं नमः
वामकपोले — ओम् ॠं नमः
दक्षिणनासापुटे– ओम् ऌं नमः
वामनासापुटे— ओम् ॡं नमः

ऊर्ध्वोष्ठे-ओम् एं नमः
अधरोष्ठे-ओम् ऐं नमः
ऊर्ध्वदन्तपंक्तौ-ओम् ओं नमः
अधोदन्तपंक्तौ-ओम् औं नमः
जिह्वायाम्-ओम् अं नमः
आस्ये-ओम् अः नमः
दक्षिणबाहौ-ओं कं नमः
दक्षिणकोर्परे-ओं खं नमः
दक्षिणमणिबन्धे-ओं गं नमः
दक्षिणहस्ततले-ओं घं नमः
दक्षिणहस्तांगुल्यग्रे-ओं ङं नमः
वामबाहौ-ओं चं नमः
वामकोर्परे-ओं छं नमः
वाममणिबन्धे-ओं जं नमः
वामहस्ततले-ओं झं नमः
वामहस्तांगुल्यग्रे-ओं ञं नमः
दक्षिणपादे-ओं टं नमः
दक्षिणोरुमूले-ओं ठं नमः
दक्षिणजानुनि-ओं डं नमः
दक्षिणजङ्घायाम्-ओं ढं नमः
दक्षिणपादांगुल्यग्रे-ओं णं नमः

वामपादे-ओं तं नमः
वामोरुमूले-ओं थं नमः
वामजानुनि-ओं दं नमः
वामजङ्घायाम्-ओं धं नमः
वामपादांगुल्यग्रे-ओं नं नमः
दक्षिणपार्श्वे-ओं पं नमः
वामपार्श्वे-ओं फं नमः
पृष्ठे-ओं बं नमः
नाभौ-ओं भं नमः
जठरे-ओं मं नमः
हृदये-ओं यं नमः
दक्षिणांसे-ओं रं नमः
वामांसे-ओं लं नमः
स्कन्धे-ओं वं नमः
दक्षिणकक्षे-ओं शं नमः
वामकक्षे-ओं षं नमः
दक्षिणपाणिपादान्ते-ओं सं नमः
वामपाणिपादान्ते-ओं हं नमः
हृदयादिमूर्धान्ते-ओं ळं नमः
हृदयादिपादान्ते-ओं क्षं नमः

इति बहिर्मातृकान्यासः ।

अन्तर्यागलक्षणम्

अन्तर्यागं पुरा कृत्वा बहिर्यागमथाचरेत् ।
पूजाहोमसमाधीनां स्थानानि परिकल्पयेत् ॥

अकृत्वा मानसं यागं यो बहिर्यागमाचरेत् ।
वृथा परिश्रमस्तस्य शास्त्रस्यान्ते विनिश्चितम् ॥

कन्दस्थानं मनुष्याणां देहमध्यं नवाङ्गुलम् ।
अण्डाकृतिसमाकारं भूषितं तत्त्वगादिभिः ॥

तत्कन्दादुत्थितं ज्ञेयं हृत्सरोजं सकर्णिकम् ।
कदलीपुष्पसङ्काशं हृदयं सर्वदेहिनाम् ॥

द्वादशाङ्गुलविस्तीर्णं अब्जं विकसितं सितम् ।
नालमष्टाङ्गुलं ह्येवं नाभिकन्दसमुद्भवम् ॥

पद्मनालं नवद्वारं समन्तात्कण्टकान्वितम् ।
अङ्गुष्ठपर्वतुल्या तु कर्णिका सा सकेसरा ॥

कर्णिकायां भवेत्सूर्यस्तस्य मध्ये तु चन्द्रमाः ।
चन्द्रमध्ये भवेद्वह्निस्तस्य मध्ये महेश्वरः ॥

हृदयेऽर्चाविधानं तु नाभौ होमं प्रकल्पयेत् ।
ललाटे चेश्वरं ध्यायेद्वरदं सर्वतोमुखम् ॥

ज्ञेयं मन्त्री क्रमात्तत्र नाभिदेशेऽग्निमण्डलम् ।
हृदये मण्डलं चान्द्रं भ्रूमध्ये रविमण्डलम् ॥

सदाशिवो महेशः स्यात्तस्यापि परमेश्वरः ।
इति ज्ञात्वा समभ्यर्च्य मानसैरुपचारकैः ॥

पद्मपत्राष्टकं ज्ञेयं अणिमादिगुणाष्टकम् ।
कर्णिकाकेसरे ज्ञानं नालं वैराग्यमेव हि ॥

धर्मज्ञानं च वैराग्यमैश्वर्यादिसमन्वितम् ।
ध्यात्वा पद्मासनं देवं सर्वपापहरं परम् ॥

तत्पद्मकर्णिकामध्ये शिवमावाह्य पूजयेत् ।
संचिन्त्य चाधारमाधेयं पीठमूर्ति शिवं स्मरेत् ॥

अधूमनिर्मलं दिव्यमादित्योदयसन्निभम् ।
ईशादिपञ्चवदनं ज्वलत्कमलसन्निभम् ॥

सदाशिवं महात्मानं तदूर्ध्वे तु परात्परम् ।
संस्थितं परमं दिव्यमावाह्य परमं शिवम् ॥

आवाहनादिसंस्कारान्मूलमन्त्रैः समाचरेत् ।
अर्चयेदष्टपुष्पैस्तु शिवमोंकाररूपिणम् ॥

अहिंसा प्रथमं पुष्पं क्षमापुष्पं द्वितीयकम् ।
तृतीयं तु दयापुष्पं चतुर्थं क्रोधवर्जनम् ॥

पञ्चमं ज्ञानपुष्पं तु षष्ठं वै भावपुष्पकम् ।
सप्तमं ध्यानपुष्पं च समाधिश्चाष्टमं भवेत् ॥

पार्थिवं सकलं गन्धो भवत्यापोऽभिषेचनम् ।
ता एव पाननैवेद्यं तैजसं दीपमालिका ॥

वायव्यं तालवृन्ताद्यं गानाद्यं व्योमसम्भवम् ।
एवं चेतरतत्त्वानि यथायोग्यं निवेद्य च ॥

मूर्ति-विद्यातनुं कल्प्य समावाह्य शिवं ततः ।
कर्णिकायां यजेद्देवं ब्रह्माङ्गैश्च समावृतम् ॥

गणेशलोकपालैश्च हेतिभिर्वज्रपूर्वकैः ।
विद्येशावृतौ चैव गुरोरावरणे तथा ॥

लोकपालावृतौ चैव रुद्रादीनामथावृतौ ।
प्राणवृत्तिनिरोधेन यजनं कुरुते यथा ॥

सदाशिवं महेशं च शिवमिष्ट्वानुरेचयेत् ।
रेचयित्वाथ भूयोऽपि यजेदावरणं प्रति ॥

चन्द्रार्कौ दधतः पूजा वृथा क्लेशो भविष्यति ।
चन्द्रार्कनाशने पूजा साधयेदीप्सितं फलम् ॥

सुषुम्नामध्यमे प्राणे पूजयेत्सर्वदेवताः ।
अग्निः प्राणो मनः पात्रं गर्वो धूमशिखाकुलः ॥

नाभिकुण्डे स्वतःसिद्धे अर्पयेत्परमामृतैः ।
उद्दीप्य च निजं वह्नि संरुद्धापानवृत्तितः ॥

स्वस्थाने च स्मरेल्लिङ्गं स्फटिकाभं महोज्ज्वलम् ।
तन्मध्यगं शिवं ध्यात्वा तदेकीभावमाश्रितः ॥

इडयापूर्य जुहुयान्मन्त्री पिङ्गलयामृतम् ।
पूरकाकृष्टपीयूषहविषं च शिवाणुभिः ॥

आधारे प्राणमावेश्य बध्वा ग्रन्थि समूलकम् ।
देवनाड्या समापूर्य कोदण्डे ध्यानमभ्यसेत् ॥

निर्भासितशरच्चन्द्रं बिन्दुरूपं महेश्वरम् ।
ललाटपट्टमध्यस्थं चिन्तयेच्छुद्धविग्रहम् ॥

स्वतन्त्रः क्रीडति प्रीतः सततानन्दचेतनः ।
प्रत्यक्षं भवति क्षिप्रं हृदि तस्य न संशयः ॥

चित्तेन जनितश्चैव दर्पणे प्रतिबिम्बवत् ।
तस्मात्सर्वप्रयत्नेन ध्याननिष्ठः सदा भवेत् ।
अन्तर्याग इति प्रोक्तः स्थानशुद्धिक्रमो द्विजाः ॥

अन्तर्यागः

हृत्पद्मे मनसा विभावितमहामायोपरिस्थासने
ध्येयो दीपशिखाकृतिः सुकुसुमं भावक्षमाध्य [illegible] ।
लेपो धीरवसायिनी परशिवे प्राणोऽनलो मानसे
पात्रेऽहंकृतिरेष एव परमो धूपोऽथ मानात्मकः ॥

दीपः सद्विषयाः सुतृप्तिकरणा गन्धादयः क्षमादिकाः
पानीयादिकदर्पणव्यजनकस्तोत्रादिकावेदनम् ।
नैवेद्यं स्वयमुद्यता समनया सूक्ष्माङ्गहीनो यदा
युक्तस्य स्वयमेव नादमनुना जापः स नाभ्युत्थितः ॥

वह्नावेवमपि प्रपूज्य जुहुयात्पूर्वोक्तयोगेन तत्-
स्थानस्थामिडया स्रुवेण च सुधामन्ते सुषुम्नास्रुचा ।
पूर्णान्तं हवनं समर्प्य कृतवानीशं क्षमाप्यादरात्
अन्ते भावविवर्जिते परपदे लीनः समाधिं व्रजेत् ॥

हृन्नाभिबिन्दुस्थानानि पूजाहोमसमाधीनां स्थानानि सङ्कल्प्य, वक्ष्यमाणक्रमेण भावोपनीतपुष्पाद्यैः, अन्तर्हृत्पद्मे शिवं सर्वोपचारैर्मनसा संपूज्य, नाभिकुण्डे स्वतः सिद्धेऽग्नौ–

ज्ञानानलं न्यसेत्तत्र सूर्यायुतसमप्रभम् ।
हृत्पुण्डरीकमध्यात्तु सौषुम्नेन पथानलम् ॥

द्वादशान्तपदे योज्य तत्तेजःपुञ्जपिञ्जरम् ।
तेन विन्यस्तमार्गेण सर्वकर्मार्हको भवेत् ॥

इत्युक्तवत् ज्ञानानलं विन्यस्य, शिवं सम्पूज्य, पूरकाकृष्टेन बिन्दु-प्रसृतामृतरूपेण आज्येन होमं च कृत्वा, अन्तः पूजितदेवाय समर्प्य,

अथ माध्यन्दिनं यावत्समाधिस्थो भवेद्यथा ।
ज्ञानज्योतिर्मयं लिङ्गं शरच्चन्द्रवदुज्ज्वलम् ॥

भ्रूमध्ये संस्थितं तत्र मनः प्राणं च योजयेत् ।
तल्लीनस्तन्मयो योगी चित्तं शून्यं नयेच्छनैः ॥

नष्टे चित्ते चिदानन्दं स्वयमुद्योतते परम् ।
समाधिः कथितो ह्येवं अणिमादिगुणालयः ॥

बिन्दौ सर्वतोमुखं स्फुरत्तारकाकारम् ईश्वरं ध्यात्वा, बहिः पूजयामीति प्रार्थ्य, लब्धानुज्ञः स्थानशुद्धिमाचरेत् ।

अस्त्रेण तालत्रयं दत्त्वा छोटिकाभिः तत्स्थानाद् विघ्नानुच्चाट्य अस्त्रेण परितो ज्वलदग्निवर्णप्राकारं कवचेन दक्षिणतर्जनीभ्रमणेन परिधात्रयं च सञ्चिन्त्य धेनुमुद्रया ओं हां हौं शक्तये वौषट् इति शक्तिजालम् ऊर्ध्वाधो विभाव्य, सर्वत्र कृतरक्षां भावयेत् ।

इति स्थानशुद्धिः ।

भूमौ—

ओं हां पृथिव्यासनाय नमः

ओं हां पृथिवीमूर्तये नमः

ध्यानम् —

द्विभुजां च द्विनेत्रां च करण्डमकुटान्विताम् ।
हेमयज्ञोपवीतां च पीतनेत्रां सुयौवनाम् ॥

पीताभां पीतवस्त्रां च पुण्डरीकदलेक्षणाम् ।
सर्वाभरणसम्युक्तां स्तनभारसमन्विताम् ॥

विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रवासो अस्य कीरयो जनासः । उरु क्षितिं सुजनिमाचकार ।

धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि ।
तन्नो धरा प्रचोदयात् ॥

ओं लं पृथिव्यै नमः

विशेषार्घ्यम्

ततः स्वर्णादिनिर्मितम् अर्घ्यपात्रम् अस्त्रेण प्रक्षाल्य, बिन्दुप्रसृतामृत-धारामयेन शुद्धाम्बुना वौषडन्तहृदयेनापूर्य, गन्धपुष्पदूर्वाक्षतानि निक्षिप्य,

आपः क्षीरकुशाग्राणि तण्डुलाः सुमनास्तिलाः ।
अर्घ्योऽष्टाङ्ग इति प्रोक्तो यवैः सिद्धार्थकैः सह ॥

तस्मिन् आसनमूर्ति-ब्रह्मपञ्चक-विद्यादेह-नेत्र-मूलाङ्गैः पुनर्मूलेन च सम्पूज्य,

शिवासनेन तन्मूर्त्या ब्रह्मभिर्विद्यया दृशा ।
मूलेनाङ्गैर्विना नेत्रं पुनर्मूलेन चार्चयेत् ॥

ओं हां शिवासनाय नमः
ओं हां शिवमूर्तये नमः
ओं होम् ईशानमूर्धाय नमः
ओं हें तत्पुरुषवक्त्राय नमः
ओं हुम् अघोरहृदयाय नमः
ओं हिं वामदेवगुह्याय नमः
ओं हं सद्योजातमूर्तये नमः
ओं हां विद्यादेहाय नमः
ओं हौं नेत्रेभ्यो नमः
ओं हां हृदयाय नमः
ओं हीं शिरसे नमः
ओं हूं शिखायै नमः
ओं हैं कवचाय नमः
ओं हः अस्त्राय नमः
ओं हां हौं शिवाय नमः

इति सम्पूज्य, संहितया अभिमन्त्र्य, अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य धेनुमुद्रया वौषडन्तमूलेन प्ररोचयेत् । ततः तज्जलेन आत्मानम् अस्त्रेण सम्प्रोक्ष्य,

द्रव्यशुद्धिः

पुष्पादिपूजोपकरणद्रव्यजातम् अस्त्रेण सम्प्रोक्ष्य, कवचेनावकुण्ठ्य धेनुमुद्रया अमृतीकुर्यात् ।

आत्मपूजा

स्वासने ओं हां शिवासनाय नमः
हृदि ओं हां शिवमूर्तये नमः

चन्दनेन ललाटे तिलकं कृत्वा, मूलेन शिरसि पुष्पं दद्यात् । इत्थम् आत्मपूजां विधाय,

मन्त्रशुद्धिः

मन्त्रान् ह्रस्वदीर्घप्लुतक्रमेण ओंकारादिमन्त्रान् उच्चार्य मन्त्रशुद्धि कुर्यात् ।

दन्तताल्वोष्ठसंचारान्मन्त्रस्याशौच निर्हणात् ।
नादान्तोच्चारणेनैव मन्त्रशुद्धिरुदीरिता ॥

शिवहस्तः

स्वदक्षिणहस्ततले वामांगुष्ठेन गन्धलेपिते तन्मध्ये त्रिकोणमालिख्य, तन्मध्ये प्रणवं लिखित्वा, आसनमूर्ति विन्यस्य, कनिष्ठादिषु हृदयादि-मन्त्रान् विन्यस्य, परमीकृत्य, अञ्जलिं बध्वा,

अंगुष्ठादिकनिष्ठान्तेषु—

ओं होम् ईशानमूर्धाय नमः
ओं हें तत्पुरुषवक्त्राय नमः
ओं हुम् अघोरहृदयाय नमः
ओं हिं वामदेवगुह्याय नमः

ओं हं सद्योजातमूर्तये नमः
ओं हां विद्यादेहाय नमः
ओं हौं नेत्रेभ्यो नमः
ओं हां हौं शिवाय नमः

कनिष्ठादिषु—

ओं ह्रां हृदयाय नमः
ओं [illegible] शिरसे नमः
ओं ह्रूं शिखायै नमः
ओं ह्रैं कवचाय नमः
ओं ह्रः अस्त्राय नमः

तेजोरूपं ध्यात्वा, स्वशिरसि अधिरोप्य, ब्रह्मरन्ध्रप्रविष्टेन तेजसा बाह्याभ्यन्तरं तमःपटलमाधूय प्रद्योदितदिगन्तरं सम्भाव्य शिवोऽहमिति भावयेत् ।

त्रिणेत्रं च चतुर्बाहुं अव्यक्तोमार्ध विग्रहम् ।
अन्तर्गतललाटाक्षं अन्तर्गतभुजद्वयम् ॥
अन्तर्गतपराशक्तिं वन्दे देशिकविग्रहम् ॥

(यागोपकरणं दिव्यदृष्ट्या विलोक्य)
हृत्पद्मे मनसा ... धूपोऽथ मानात्मकः ।
दीपः सद्विषयाः ... जापः स नाभ्युत्थितः ।
वह्नावेवमपि ... व्रजेत् ।

अन्तर्हृदयावकाशे दिव्यरत्नमयं शिवार्चनामण्डपं मनसा सङ्कल्प्य, तत्र शिवार्चनोपयुक्तानि सर्वाणि द्रव्याणि मनसा उपनीय, विशोध्य, द्वादशान्तस्थितचन्द्रमण्डलगलदमृतधारया अर्घ्यपात्रादिपूरणं तत्संस्कारं च कृत्वा, द्वारपालार्चनं विधाय, वक्ष्यमाणप्रकारेण गणेशगुरुवन्दनानुज्ञा-प्रार्थनापूर्वकं माणिक्यवर्णनाभिकन्दसमुत्थितनीलवर्णनालाञ्चितातिधवल-वर्णाष्टदलकमलपीतवर्ण [illegible]र्णिकाकारसंस्थित कुण्डलिनीशक्ति[illegible]त्मके पीठे श्रवणांगुष्ठसंयोगाधिगम्यनादरूपं दीपशिखाकारलिङ्गं विचिन्त्य, पीठे वक्ष्यमाणक्रमेण शक्त्यादिशक्तिपर्यन्तं शिवासनम् अभ्यर्च्य, लिंगे शिवमूर्तिं विद्यादेहं चाभ्यर्च्य, तत्र परमशिवम् आवाहनादिक्रमेण ध्यात्वा, अन्तःसंस्कारैः अभ्यर्च्य, द्वादशान्तच्युतबहुलामृतधारया अभिषिच्य,

वस्त्राभरणादिभिः वैराग्यचन्दनेन चालंकृत्य, ओं (भवाय इत्यादिक्रमेण) अहिंसा - इन्द्रियनिग्रह-क्षमा-दान-ज्ञान-तपः-सत्य-भावरूपैः अष्टभिः पुष्पैः अभ्यर्चयेत् ।

ततो मनसि पात्रे प्राणमग्निम् अहङ्कारधूपशिखां च सङ्कल्प्य, धूपं दद्यात् । शिवज्ञानमेव दीपं सङ्कल्प्य दीपं दद्यात् । विषयेभ्यः प्रत्याहृतं मनः नैवेद्यमिति भावयित्वा समर्पयेत् । सुषुम्नामार्गेण प्राणस्य गमनागमनमेव जपत्वेन भावयेत् । पार्थिवादि पञ्चधारणास्थिरीकृतसदाशिवावयवजातध्यानकल्पितैस्तत्तदवयवोचितैः भूषणैश्च भूषयेत् ।

शिवोऽहमिति शिवसाम्यभावनारूपम् आत्मनिवेदनं च कुर्यात् ।

यद्वा

अभिषेकानन्तरं गन्ध-शब्द-स्पर्श-रूप-रसतन्मात्राः, चन्दन-पुष्प-धूप-दीप-नैवेद्यानि आत्मना समर्पयेत् ।

तत्रायं क्रमः—मूलमन्त्रोच्चारणपूर्वकम्

ओं ह्लां सद्योजाताय शिवाय गन्धतन्मात्रात्मकं चन्दनं समर्पयामि ।
ओं हों ईशानाय शिवाय शब्दतन्मात्रात्मकं पुष्पं समर्पयामि ।
ओं हें तत्पुरुषाय शिवाय स्पर्शतन्मात्रात्मकं धूपं समर्पयामि ।
ओं हुं अघोराय शिवाय रूपतन्मात्रात्मकं दीपं समर्पयामि ।
ओं हिं वामदेवाय शिवाय रसतन्मात्रात्मकं नैवेद्यं समर्पयामि ।

इति भावयेत्

ततो हस्तप्रक्षालनमुखवासदानानन्तरं सत्त्वरजस्तमोगुणात्मकं तांबूलं समर्पयामीति भावयेत् । ततो नीराजनं परिकल्प्य,

बुद्धिस्थवायुना क्लृप्तं दर्पणं मङ्गलानि च ।
मनोवृत्तिविचित्रा ते नृत्तरूपेण कल्पिता ॥

ध्वनयो गीतरूपेण शब्दवाद्यप्रभेदतः ।
सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरात्मना ॥

अहङ्कारो गजत्वेन क्लृप्तो देहो रथात्मना ।
मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥
सर्वमन्यन्मया क्लृप्तं तवोपकरणात्मना ॥

सर्वम् आत्मीयं बुद्धिमनःप्राणादिकं शिवपूजोपकरणत्वेन समर्पयेत् । आवरणपूजामपि वक्ष्यमाणरूपां तत्समये कुर्यात् । ततः प्रदक्षिण-नमस्कारान् प्रसादाभिमुखं विधाय, तदाज्ञया अग्निकार्यं कुर्यात् ।

वह्नावेवमपि ... व्रजेत् ।

नाभौ त्रिमेखलं कुण्डं तत्राग्निं च स्वतः सिद्धं विभाव्य, तम् अग्निम् अस्त्रेण प्रज्वाल्य, तत्राग्नौ किंचिदङ्गारं क्रव्यादांशत्वेन भावयित्वा, तं निर्ऋतिकोणे परित्यज्य, कुण्डस्थमग्निं निरीक्षणादिभिः संशोध्य, तस्य शिवाग्नित्वसिद्ध्यर्थं रेचकेन वायुना तं चैतन्यात्मना हृदयं नीत्वा तत्रत्येन ज्ञानाग्निना संयोज्य, ततः सुषुम्नया द्वादशान्तं नीत्वा, तत्र परमशिवे संयोज्य, तत्तेजःपुञ्जपिञ्जरं सूर्यायुतसमप्रभं भावयित्वा, तं ज्ञानाग्निरूपं प्रत्यानीय, नाभिकुण्डे स्थापयेत् । एवं कृते संस्कारान्तर-मनपेक्ष्य शिवाग्निर्भवति । तत्र शिवाग्निं रक्तवर्णं पञ्चवक्त्रं दशभुजं सदाशिवसमानायुधं ध्यात्वा,

तस्य हृदयकमले आसनमूर्तिविद्यादेहविन्यासपुरःसरं शिवम् आवाह्य, सुषुम्नास्रुवेण द्वादशान्तस्थितामृतधारामयाज्यं मूलेनाष्टोत्तर-शतम् अष्टाविंशतिवारम् अष्टवारं वा हुत्वा शाक्तामृतघृतपरिपूर्णनाभि-कन्दकलां हृदयकमलाङ्कितसुषुम्नाम् अन्तःस्रुचं विभाव्य तथा 'हां शक्तये वौषट्' इति पूर्णाहुतिं हुत्वा, होमसमर्पितं शिवं नाडी मार्गेण हृत्पद्मपूजिते शिवे सम्योज्य, अष्टपुष्पिकयाभ्यर्च्य, पूजां समापयेत् । तदनन्तरं भ्रूमध्ये

सर्वावयवसम्पूर्णं शुद्धदीपसमाकृतिं च शिवं सकलनिष्कलरूपेण ध्यात्वा शिवं सम्पूज्य, पूज्यपूजकभावेन द्विधावस्थितः शिवोऽहमेवेति मनः समाधीयताम् ॥

इति आत्मशुद्धिः ।

इति अन्तर्यागः ।

भूतशुद्धिः (अन्या)

तत्र पूर्वकरन्यासं विधाय प्राणायामत्रयं कुर्यात् । भूतशुद्धिं कुर्यात्, अथ आत्मशुद्धिं कुर्यात्, सा द्विविधा । पूजकजीवस्य शिवभावत्वापादनात्मिका, जीवशुद्धिरूपा, पूजकदेहस्य शिवदेहत्वापादनात्मिका, देहशुद्धिरूपा, तत्र जीवशुद्धिप्रकारः ।

देहान्तर्गतं अशुद्धवायुं रेचकप्राणायामेन अस्त्रमन्त्रेण उत्सार्य, बाह्यवायुना उदरं प्रपूर्य, पादांगुष्ठद्वयादारभ्य यावत् मूलाधारं द्विधा भूतां तदूर्ध्वं आब्रह्मरन्ध्रं एकीभूतां अधोमुखैः पद्ममुकुलैर्युक्तां शरीरान्तराळे अतिसूक्ष्मां विद्युल्लेखामिव भास्वरां अन्तस्सुषिरयुक्तां सुषुम्नानाडीं सञ्चिन्त्य, तन्मध्ये हूं इति शिखाबीजं ज्वलन्तं सञ्चिन्त्य, हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु अधोमुखतया स्थितानि पद्ममुकुळानि पूरककुम्भकरेचकैः विकसितोत्तंभितोर्ध्वमुखीकृतानि भावयित्वा मूलाधारप्रदेशे दीपशिखावत् ज्वलन्तं हूङ्कारं हुं फट् इति सन्ततोच्चारणेन ऊर्ध्वमुद्गच्छन्तं ध्यायन्, तेन पश्चापि ब्रह्मादिग्रन्थीन् पद्मनाळग्रन्थीन् भिन्नान् भावयित्वा हुङ्कारं प्रतिनिवृत्य वायुं विरेचयेत्, पुनरपि हुङ्कारं मूलाधारे ध्यायन्, पूरकवायुनोपहृतसर्वशरीरव्यापकचैतन्यं हृत्पङ्कजाश्रितपुर्यष्टकरूपसूक्ष्मदेहान्वितजीवं पुर्यष्टद्वारादादाय स्फुरत्तारकाकारं अतिसूक्ष्मं एकाकिनं हां इति हृदयबीजसम्पुटितं कृत्वा, हूंकारं मूर्ध्नि निवेश्य कुम्भकं कृत्वा, वायुमूर्ध्वं प्रवर्तयन्, संहारमुद्रया तं आदाय द्वादशान्तपर्यन्तं नीत्वा, तदुपरिस्थिते परमशिवे योजयेत्, इत्येवं जीवः स्थूलसूक्ष्म-अशुद्धदेहोपाधि-

विनिर्मुक्तः शिवसायुज्यं प्राप्तः निर्मलज्ञानक्रियाशक्तियुक्तः शुद्धो भवति । इत्येवं द्वादशान्तपर्यन्तं उन्नयनाशक्तः हृदयकमल एव शक्तिमण्डलसम्पुटित कृत्वा भूतशुद्धिसमये कर्तव्यदेहदाहतो रक्षेत्–तत्र अयं क्रमः–गन्धे पृथ्वी, रसे जलं–रूपे अग्निः–स्पर्शे वायुः–शब्दे व्योम–एताः तन्मात्राः तामसाहङ्कारे, वाक्पादपाणिपायूपस्थाख्यानि-राजसाहङ्कारे, श्रोत्रत्वचक्षुर्जिह्वाघ्राणाख्यानि मनश्च सात्विकाहङ्कारे, स च बुद्धौ, सा गुणेषु, गुणतत्त्वं प्रकृतौ, सा रागविद्ये च कलायां, पुंस्तत्वं कालो नियतिः कला च मायायां, मायातत्वं शुद्धविद्यातत्वे, शुद्धविद्यातत्वं ईश्वरतत्वे, ईश्वरतत्वं सदाशिवतत्वे, सदाशिवतत्वं शक्तितत्वे, शक्तितत्वं शिवतत्वे, शिवतत्वं तदपि अक्षुब्धरूपे बिन्दौ विलीनानीति भावयेत् । ततः स्थूलशरीरशुद्धचर्थं स्वशरीरे पादादि द्वादशान्तपर्यन्तस्थानेषु स्थितानि वक्ष्यमाणस्थानाकृतिरूपाणि पञ्चमहाभूतानि ध्यायेत् । तदनु स्थूलदेहं विशोधयेत् ॥

पादादिजानुपर्यन्तं पृथिवीमण्डलं ध्यायेत्

पार्थिवं मण्डलं पीतं वेदाश्रं वज्रलाञ्छितम् ।
लंबीजं ब्रह्मदेवत्यं अजातहृदयान्वितम् ।
निवृत्यात्मकलोपेतं ह्लामित्युद्घातपञ्चकम् ॥

ओं ह्लां ह्लां ह्लां ह्लां ह्लां निवृत्तिकलायं हः हुं फट्, इति मन्त्रेण पञ्चभिरुद्घातैः पृथिव्याः गन्ध-रस-रूप-स्पर्श-शब्द-गुणानुत्सार्य इति पृथिवीतत्वं शोधयामि ।

जान्वादि नाभिपर्यन्तं अम्मण्डलं ध्यायेत् ।

आप्यमिन्दुसिताब्जाङ्कं विष्णुदैवं वबीजकम् ।
वामशीर्षसमायुक्तं प्रतिष्ठाकलयान्वितम् ॥
युक्तं चतुर्भिरुद्घातैः ह्वीमित्युच्चारपूर्वकम् ॥

ओं ह्वीं ह्वीं ह्वीं ह्वीं प्रतिष्ठाकलायै हः हुं फट् । इति मन्त्रेण चतुर्भिरुद्घातैः अपां रस-रूप-स्पर्शशब्दगुणानुत्सारयेत् ।

नाभ्यादि हृदयान्तं वह्निमण्डलं ध्यायेत् ।

वह्निं त्र्यश्रं सप्तशिखं रक्ताभं रुद्रदैवतम् ।
रार्णाघोरशिखायुक्तं विद्याख्यकलयान्वितम् ॥
युक्तं तन्त्रिभिरुद्घातैः ह्रूमित्युच्चारपूर्वकम् ॥

ओं ह्रूं ह्रूं ह्रूं विद्याकलायै हुं फट् । इति मन्त्रेण त्रिभिरुद्घातैः अग्निगतान् रूप-स्पर्श-शब्दगुणानुत्सारयेत् ।

हृदयादि भ्रूमध्यपर्यन्तं वायुमण्डलं ध्यायेत् ।

वायव्यं रसकोणन्तु बिन्दुषट्कमभासितम् ।
ईशाधिपत्यं यार्णोक्तं वर्मणा पुरुषान्वितम् ॥
शान्त्या युक्तं द्विरुद्घातैः ह्यैमित्युच्चारपूर्वकम् ॥

ओं ह्यें ह्यैं शान्तिकलायै हः हुं फट् । इति मन्त्रेण द्वाभ्यामुद्घाताभ्यां वायुगत शब्द-स्पर्शगुणावुत्सारयेत् ।

भ्रूमध्यादि द्वादशान्तपर्यन्तं आकाशमण्डलं ध्यायेत् —

आकाशं वर्तुलं व्यक्तं लाञ्छितं धूम्रवर्णकम् ।
सदेशाधिष्ठितं हार्णं ईशनेत्रास्त्रसम्युतम् ।
एकोद्घातं च कृत्वाथ हौमित्युच्चारपूर्वकम् ॥

ओं हौं शान्त्यतीतकलायै हः हुं फट् । इति मन्त्रेण एकेनोद्घातेन आकाशगतशब्दगुणमुत्सारयेत् ।

इत्थं पञ्चमहाभूतानां प्रत्येकशोधनेन परस्परशोधनेन वा गुणक्षयात् क्षीणशक्तिकस्य भूतसमुदायात्मकस्य शरीरस्य शोषं विभाव्य,

पादाङ्गुष्ठोत्थितेन शिवशक्त्यधिष्ठितेन कालाग्निना ओं हः अस्त्राय हुं फट् इति मन्त्रेण शरीरं दग्धं निरवशेषं निवृत्यादिकलामात्रशेषं शरीरगतदोषमात्रं वा दग्धं भावयित्वा, द्वादशान्तस्थितशक्तिमण्डलस्रवदमृत-

धारया प्लावयेत्, ओं ह्रौं शान्त्यतीतकलायै नमः । इत्यादिमन्त्रैः सूक्ष्म-पञ्चकलामयस्य शुद्धस्य सूक्ष्मशरीरस्य सृष्टिं पञ्चकलामन्त्रैरेव स्थूलपञ्च-कलामयस्य स्थूलदेहस्य सृष्टिं च विभाव्य । ओं हां शक्तये वौषडिति शक्तिमण्डलसृत अमृतधारया प्लावयेत्, ततः हृत्कमलकर्णिकायां ओं हां अनन्ताय नमः ... पद्माय नमः । इति मध्याग्नेयादि कोणचतुष्टय मध्येषु षडुत्थासनं विन्यस्य, तत्र सूक्ष्मदेहात्मिकां अविभक्त करचरणादिरूपां मूर्तिं हां हं हां आत्ममूर्तये नमः । इति विन्यस्य, ओं हां विद्यादेहाय नमः इत्यष्टत्रिंशत्कलामयं सदाशिवरूपं ध्यात्वा ओं हां ह्रौं शिवाय नमः, इति द्वादशान्तस्थित परमशिवसायुज्यं विभाव्य निर्मलज्ञानक्रियाशक्तिकं यजमानमूर्तिरूपं जीवात्मानं तत्रावाह्य, हृदयादिस्थानेषु हृदयादिमन्त्रान् विन्यस्य, मूलेन परमीकृत्य, वौषडन्तशक्तिमन्त्रेण द्वादशान्तस्थितशक्ति-मण्डलसृतबहुळामृतधारया अभिषिञ्चेत् — ततः दण्ड–मुण्ड–वक्त्र-कलाभङ्ग्यादिन्यासान् न्यसेत् ॥

अन्यत् सर्वं पूर्वमेव लिखितम् ॥

—:O:—

४ पञ्चगव्यम्

कारणे—

पकारं पापनाशं स्यात् चकारं आत्मशुद्धिदम् ।
गकारं जन्मनाशं स्यात् व्यकारं मोक्षहेतुकम् ॥

पञ्चगव्यस्य शब्दस्य प्रोक्तं निर्वचनाक्षरम् ।
नित्ये नैमित्तिके काम्ये दृष्टदोषे महाभये ॥

ज्व रोगादिपीडायां परराष्ट्रभयेऽपि वा ।
दुर्नि त्ते दिशां दाहे महामारीप्रकोपने ॥

क्षामक्षोभसमुत्पन्ने महावातप्रभेदने ।
भूमिकम्पेऽप्यनावृष्टौ संक्रान्तिग्रहणादिके ॥

अन्यपुण्यदिने वापि संस्थाप्य पञ्चगव्यकम् ।
अभिषेकं प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ॥

मातृहा पितृहा चैव गोघ्नश्चैव कृतघ्नकः ।
भ्रूणहा च गुरुद्रोही पातको गुरुतल्पगः ॥

मुच्यते तत्क्षणेनैव पञ्चगव्याभिषेचनात् ।
पञ्चगव्यविहीनं च पूजनं क्रियते यदि ॥

न देवतायास्सान्निध्यमित्थं तत्र प्रजायते ।
एवं क्रमेण विधिवत्पञ्चगव्यपुरस्सरम् ॥

अभिषेकं प्रकर्तव्यं यथाविभवविस्तरम् ।
इहैव धनवान् श्रीमान् सोऽन्ते रुद्रपदं लभेत् ॥

कोष्ठपूजाक्रमः

कारणे—

मध्यमे शिवतत्त्वं तु पूर्वकोष्ठे सदाशिवम् ।
विद्यातत्त्वं दक्षिणे च पुरुषं तु तथोत्तरे ॥

पश्चिमे कालतत्त्वं तु पृथ्वीतत्त्वं तु पावके ।
अप्तत्त्वं नैरृते देशे वायुकोष्ठे मरुत्क्रमात् ।
ईशाने प्रकृतिं कोष्ठे कोष्ठपूजा विधीयते ॥

——

पात्रपूजाक्रमः

कारणे—

मध्यमे सुप्रतिष्ठं च सुशान्तं पूर्वमेव च ।
तेजोवद्दक्षिणे चैव रत्नोदकमुदग्दिशि ॥
अमृतोदं पश्चिमायां अव्यक्तं चैशकोणके ।
अथवा त्वेकपात्रे च सुप्रतिष्ठादि पूजयेत् ॥
आग्नेय्यां व्यक्तपात्रं स्यान्नैर्ऋते सूर्यपात्रकम् ।
वायौ संज्योतिपात्रं स्यात्पात्रपूजा विधीयते ॥

स्थापनक्रमः

क्षीरं विन्यस्य मध्ये तु दधि पूर्वे तु विन्यसेत् ।
दक्षिणे तु घृतं न्यस्य गोमूत्रं चोत्तरे तथा ॥
गोमयं पश्चिमे चैव आग्नेय्यां पिष्टमेव च ।
आमलकं च नैर्ऋत्यां वायव्यां रजनीं तथा ।
कुशोदकं तथैशान्यां तत्तत्स्थाने समाचरेत् ॥

कारणे—

नवपदकृतमध्ये दुग्धमैन्द्रे दधि स्याद्
यमदिशि घृतमिन्दौ वारुणे गोमये द्वे ।
अनलनिर्ऋतिवायावीशकोणे च पिष्टा-
मलकरजनितोयं पञ्चगव्यक्रमश्च ॥

गोमयं गोजले क्षिप्य गोजलं तु घृते न्यसेत् ।
घृतं वै दधिनि क्षिप्य दधि क्षीरे सुयोजयेत् ॥
पञ्चगव्यमिति प्रोक्तं महापातकनाशनम् ।
पञ्चगव्याभिषेकं तु देवसान्निध्यमेव च ॥

कारणे—

शिवाग्रे भूतले रम्ये गोमयालेपनं कुरु ।
तन्मध्यतः परिस्तीर्य ताराभैर्द्रोणतण्डुलैः ॥

सूत्रात्सूत्रान्तरं तालं नवकोष्ठं तु लेखयेत् ।
लाजैर्दर्भैरक्षतैश्च तिलैः पुष्पैः परिस्तरेत् ॥

वातुले—

प्राक्सूत्रं युगसूत्रं च उदक्सूत्रं तथैव च ।
सूत्रात्सूत्रान्तरं तालं हालार्धं वा प्रकल्पयेत् ।
नवकोष्ठं समालिख्य पञ्चगव्यं प्रकल्पयेत् ॥

उक्तविधिना नैर्ऋत्यां पञ्चगव्यं साधयेत् । तण्डुलं परिस्तीर्य तदुपरि नवकोष्ठं विलिख्य लाजदर्भाक्षततिलान् परिस्तीर्य पात्राणि निदध्यात् ।

गोवर्णः

गोमयं कृष्णवर्णाया नीलाया गोजलं स्मृतम् ।
कपिलाया घृतं विद्धि शुक्लाया दधि चेष्यते ॥

पयश्च रक्तवर्णाया गवां वर्णः प्रकीर्तितः ।
अलाभे कपिलायास्तु सर्वं संग्राहयेद्बुधः ॥

आचार्यः सङ्कल्प्य, सकलीकृत्य,

मध्ये — ओं हां शिवतत्त्वकोष्ठाय नमः
पूर्वे — ओं हां सदाशिवतत्त्वकोष्ठाय नमः
दक्षिणे —ओं हां विद्यातत्त्वकोष्ठाय नमः
उत्तरे—ओं हां पुरुषतत्त्वकोष्ठाय नमः
पश्चिमे—ओं हां कालतत्त्वकोष्ठाय नमः
आग्नेय्यां —ओं हां पृथ्वीतत्त्वकोष्ठाय नमः
नैर्ऋत्यां —ओं हाम् अप्तत्त्वकोष्ठाय नमः

वायव्यां—ओं हां वायुतत्त्वकोष्ठाय नमः
ऐशान्यां - ओं हां प्रकृतितत्त्वकोष्ठाय नमः

इति कोष्ठान् सम्पूज्य,

अथ पात्रपूजा

मध्ये — ओं हां सुप्रतिष्ठपात्राय नमः
पूर्वे — ओं हां सुशान्तपात्राय नमः
दक्षिणे—ओं हां तेजोवत्पात्राय नमः
उत्तरे—ओं हां रत्नोदकपात्राय नमः
पश्चिमे—ओं हां अमृतात्मकपात्राय नमः
आग्नेय्याम्—ओं हां व्यक्तपात्राय नमः
नैर्ऋत्याम्—ओं हां सूर्यपात्राय नमः
वायव्याम् —ओं हां अव्यक्तपात्राय नमः

इति पात्राणि सम्पूज्य,

मध्ये—'आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य सङ्गथे' इति मन्त्रेण कृष्णगोक्षीरेण पूरयित्वा, तदुपरि कूर्चं निधाय,

ओं हां भारद्वाजाय नमः
ओं हां रुद्रदेवाय नमः

'ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्' इति मन्त्रेणाभिमन्त्र्य, ओं हाम् ईशानाय नमः इति सम्पूज्य,

पूर्वे—

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः : सुरभि नो मुखाकरत् प्रण आयूंषि तारिषत्' ।

इति मन्त्रेण सितगोदध्ना पूरयित्वा, तदुपरि कूर्चं निधाय,

ओं हां कौशिकऋषये नमः
ओं हां सोमदेवाय नमः

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

इति मन्त्रेणाभिमन्त्र्य, ओं हां तत्पुरुषाय नमः इति सम्पूज्य,

दक्षिणे—

'शुक्रमसि ज्योतिरसि तेजोसि । देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ।'

इति मन्त्रेण धूम्रगोघृतेन पूरयित्वा कूर्चं निधाय,

ओं हां काश्यपऋषये नमः
ओं हां ईशानदेवाय नमः

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।' इति मन्त्रेणाभिमन्त्र्य, ओं हां अघोराय नमः इति सम्पूज्य,

उत्तरे—

'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।' इति मन्त्रेण कपिलागोजलेन पूरयित्वा, कूर्चं निधाय,

ओं हाम् अगस्त्य ऋषये नमः
ओं हां वायुदेवाय नमः

'वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः' इति मन्त्रेणाभिमन्त्र्य, ओं हां वामदेवाय नमः इति सम्पूज्य,

पश्चिमे—

'गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।' इति मन्त्रेण रक्तधेनुगोमयं निक्षिप्य कूर्चं निधाय,

ओं हां गौतमऋषये नमः
ओं हां वह्निदेवाय नमः

'सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ।' इति मन्त्रेणाभिमन्त्र्य, ओं हां सद्योजाताय नमः इति सम्पूज्य,

आग्नेय्याम् —

'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।' इति मन्त्रेण पिष्टेन पूरयित्वा, कूर्चं निधाय,

ओं हां विष्णुदेवाय नमः
ओं हां हृदयाय नमः इति सम्पूज्य

नैर्ऋत्ते—

'इषे त्वोर्जे त्वा वायवस्थोपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' । इति मन्त्रेणामलकेन पूरयित्वा कूर्चं निधाय,

ओं हां श्रीदेव्यै नमः
ओं हीं शिरसे नमः इति सम्पूज्य,

वायव्यो—

'अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि' इति मन्त्रेण रजनीं पूरयित्वा, कूर्चं निधाय,

ओं हां चन्द्राय नमः
ओं हैं कवचाय नमः इति सम्पूज्य,

ईशाने—

'देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम्' । इति मन्त्रेण कुशोदकेन पूरयित्वा, कूर्चं निधाय,

ओं हां ब्रह्मणे नमः
ओं हूं शिखायै नमः इति सम्पूज्य,

संरक्ष्य, अवकुण्ठ्य, मूलेन धेनुमुद्रां प्रदर्शयेत् ।

गोमयं गोजले क्षिप्य गोजलन्तु घृते न्यसेत् ।
घृतं वै दधिनि क्षिप्य दधि क्षीरे सुयोजयेत् ॥

मथित्वा त्र्यम्बकेनैव विधाय दर्भखण्डकान् ।
दिग्बन्धं चास्त्रमन्त्रेण कवचेनावकुण्ठनम् ॥

ब्रह्माङ्गैरर्चयेत्पश्चान्मूलमन्त्रं शतं जपेत् ।
दर्शयेद्धेनुमुद्रां च नैवेद्यं धूपदीपकम् ।
अस्त्रमन्त्रेण संप्रोक्ष्य पूजाकालेऽभिषेचयेत् ॥

---

५ ब्राह्मणानुज्ञा

उक्त लक्षणः आचार्यः भूसुरैः सह कृतनित्याह्निकद्वयः परित्यक्त-भोजनः । स्वात्मानमलङ्कृत्य पादौ हस्तौ च प्रक्षाळ्य, आचम्य, आस्थानमण्टपं प्रविश्य, ध्रुवन्ते राजा इति मन्त्रेण उत्तराभिमुखः स्थित्वा सकलीकृत्य, सामान्यार्घ्यं साधयित्वा, सुवर्णादिपात्रं निधाय, तदुपरि प्रक्षाळित-हरिद्राविलेपित-सलक्षण-नाळिकेरद्वय-तण्डुल-फल-गुळ-ताम्बूल हिरण्य-गन्ध-पुष्पाक्षत-पत्र-दर्भ-पवित्रकूर्च-हरिद्रादुकूल-धूप-दीप-द्रव्याणि निधाय, अर्घ्यजलेन अस्त्रेण सम्प्रोक्ष्य, पात्रपूजामारभेत ।

पात्रे ओं हां आधारशक्तये नमः
तण्डुले ओं हां नक्षत्रेभ्यो नमः
नाळिकेरे ओं हां रुद्राय नमः
ताम्बूले ओं हां गणपतये नमः
गुळे ओं हां अमृतेश्वराय नमः
चन्दने ओं हां शिवाय नमः
रजन्यां ओं हां चन्द्राय नमः
सुवर्णपुष्पेषु ओं हां हिरण्यगर्भाय नमः
चूतपल्लवेषु ओं हां विष्णवे नमः

दर्भेषु ओं हां सर्वतीर्थेभ्यो नमः
पत्रेषु ओं हां सोमाय नमः
पुष्पेषु ओं हां ईश्वराय नमः
पवित्रे ओं हीं भोगिन्यै नमः
कूर्चे ओं हीं गङ्गायै नमः
हरिद्रायां ओं हीं वसुन्धरायै नमः
दुकूले ओं हीं श्रियै नमः
धूपे ओं हां वह्नये नमः
दीपे ओं हां सूर्याय नमः

इति सम्पूज्य, अक्षतैस्सह हस्ताभ्यां पात्रमादाय,

यदग्नि पूर्वं हरत्यथाऽग्निहोत्रम् । भागधेयेनैवैनं प्रणयति । ब्राह्मण आर्षेय उद्धरेत् । ब्राह्मणो वै सर्वा देवताः । सर्वाभिरेवैनं देवताभिरुद्धरति ।।

नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै,

सर्वेभ्यो ब्राह्मणेभ्यो नमः । तत्पात्रं भूमौ संस्थाप्य, नमस्कृत्य, आदाय,

अशेषे हे परिषद् भवत्पादमूले मया समर्पितां इमां सौवर्णीं यत्किञ्चित् दक्षिणां यथोक्तदक्षिणामिव ताम्बूलञ्च स्वीकृत्य,

अस्य देवदेवस्य महादेवस्य अखिलाण्डकोटिब्रह्माण्डनायकस्य सृष्टि–स्थिति–संहार–तिरोभावानुग्रहकारकस्य परमेश्वरस्य अनुग्रहात् अस्मिन् नगरे विद्यमानानां सर्वेषां महाजनानां क्षेम-स्थैर्य-वीर्य-विजय-शौर्य–आयुरारोग्य-ऐश्वर्य-सत्सन्तान-सौभाग्य-धर्मार्थ-काममोक्ष- चतुर्विधफल–पुरुषार्थसिध्यर्थं परमेश्वरस्य पादारविन्दद्वन्द्वे अचञ्चलभक्तिसिध्यर्थं ………अम्बासमेत परमेश्वरस्य नवदिनमहोत्सवाख्य महामङ्गलकर्म कर्तुं योग्यतासिद्धि अनुगृहाण,

आचार्य–साधक–भूसुरान् दक्षिणाताम्बूलैश्च सन्तोष्य,

---

६ शिवानुज्ञा

द्वाराग्रं प्रविश्य, द्वारं अर्घ्यजलेन सम्प्रोक्ष्य,

द्वारदक्षिणपार्श्वे	ओं हां दण्डिने नमः
उत्तरपार्श्वे	ओं हां मुण्डिने नमः
द्वारोर्ध्वे दक्षिणे	ओं गं गणपतये नमः
उत्तरे	ओं ह्रीं सरस्वत्यै नमः
मध्ये	ओं ह्रीं महालक्ष्म्यै नमः
द्वारस्य दक्षिणभागे	ओं हां नन्दिने नमः
	ओं ह्रीं गङ्गायै नमः
तदुत्तरे	ओं हां महाकाळाय नमः
	ओं ह्रीं यमुनायै नमः
ऊर्ध्वदेहल्यां	ओं हां पतङ्गाय नमः
अधोदेहल्यां	ओं हां भुवङ्गाय नमः
दक्षिणस्तम्भे	ओं हां नित्याय नमः
उत्तरस्तम्भे	ओं हां अकम्पनाय नमः
दक्षिणकवाटे	ओं हां विमलाय नमः
उत्तरकवाटे	ओं हां सुबाहवे नमः
पट्टिकासु	ओं हां स्कन्दाय नमः
दक्षिणवलये	ओं हां सूर्याय नमः
उत्तरवलये	ओं हां सोमाय नमः

सुषिरे नवशक्तिभ्यो नमः । ओं ह्रीं क्षोभिण्यै नमः ।
ओं ह्रीं द्राविण्यै नमः । ओं ह्रीं कर्षिण्यै नमः ।
ओं ह्रीं शङ्कर्यै नमः । ओं ह्रीं उन्मादिन्यै नमः ।
ओं ह्रीं अङ्कुशाय नमः । ओं ह्रीं शक्तये नमः ।
ओं ह्रीं खेचर्यै नमः । ओं ह्रीं बीजयोनिकाय नमः ।

द्रोणाग्रे	ओं हां शिवाय नमः
आधारे	ओं हां अस्त्राय नमः

दक्षिणभित्तिपार्श्वे अस्त्रद्वारपालाय
ओं ह्रां दण्ड्यासनाय नमः
ओं ह्रां दण्डिमूर्तये नमः

ध्यानम्—अरुणकिरणरूपं पञ्चास्यभीमं त्रिणेत्रम्
जटिमृगवदनोर्ध्वं अन्यपादोर्ध्ववक्त्रम् ।
विकसितकरयुग्मं विस्मयं दण्डमन्यं
जयमणिमालिकाढ्यं दण्डिरूपं भजामि ॥

इति ध्यात्वा—अभ्यर्च्य,

उत्तरभित्तिपार्श्वे अस्त्रद्वारपालाय ओं ह्रां मुण्डिने नमः ।
ओं ह्रां मुण्ड्यासनाय नमः । ओं ह्रां मुण्डिमूर्तये नमः ।

ध्यानम्—अनलतनुनिभाङ्गं भीमवक्त्रं त्रिणेत्रं
जटिमृगवदनोर्ध्वं वास्तुमुद्राग्रहस्तम् ।
कटितटबद्धपाशं कङ्कणं नागभूष्यं
मुनिवरनरसेव्यं मुण्डिरूपं भजामि ॥

इति ध्यात्वा—अभ्यर्च्य,

द्वाराग्रे ओं ह्रां वृषभासनाय नमः ।
ओं ह्रां वृषभमूर्तये नमः ।

ध्यानम्—रजतगिरिशरीरं वेदपादं मुखोर्ध्वे
तरुणमुदितशृङ्गं चाग्निवर्णं त्रिणेत्रम् ।
चलमणिगळभूपं किङ्किणीदामभूषम्
हरधरवररूपं चादिदेवं वृषेशम् ॥

तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि ।
तन्नो वृषभः प्रचोदयात् ॥

ओं हां वृषभाय नमः । इति सम्पूज्य,
सर्वेषां नैवेद्य–धूपदीपार्घ्याणि दत्वा,
सर्वाभ्यो द्वारपालदेवताभ्यः स्वाहा, इति अर्घ्यं दत्वा,
भूमौ ओं हां विघ्नाध्यक्षाय नमः
अन्तरिक्षे ओं हां विघ्नराजाय नमः ।
स्वर्गे ओं हां विघ्नेश्वराय नमः ।

आकाशे दिव्यदृष्ट्या विलोक्य, अन्तरिक्षे नाराचमुद्रया, "ओं हः अस्त्राय हुं फट्", इति पुष्पं क्षिप्त्वा, अन्तरिक्षविघ्नान् निरस्य, सव्यपादतलेन भूमिं त्रिवारं स्पृष्ट्वा,

ओं श्लीं पं शुं हुं फट् पाशुपतास्त्राय नमः । इति भूमिष्ठान् विघ्नान्निरस्य, त्रिविधविघ्नान् निरस्य, धूपदीपौ दत्वा, सव्यपादपुरस्सरं सद्योजातमन्त्रेण अन्तःप्रविश्य, अस्त्रेण घण्टां त्रिस्संताड्य तिरस्करिण्यां ओं हां स्थाणवे नमः ।

ध्यानम्—नीलवाजिसमारूढां वस्त्रमाल्यविभूषणाम् ।
निद्राच्छादितत्रैलोक्यां भजे खट्वाङ्गधारिणीम् ॥

ओं हां निरोधशक्तये नमः । इति सम्पूज्य,
ओं हां हृदयाय नमः । इति प्रच्छन्नपटं विसृज्य,
भोगशक्तिं सम्पूज्य, गर्भगृहं प्रविश्य,

अथ गर्भावरणपूजा

निरृतिपूर्वे ओं हां वास्त्वधिपतये ब्रह्मणे नमः

हंसस्थं तुन्दिलं गौरं सश्मश्रुचतुराननम् ।
दधानं दक्षिणे वामे दण्डाक्षस्रुक्कमण्डलुम् ॥

वारुणे ओं गं गणपतये नमः

ध्यानम्—लम्बोदरं त्रिणयनं पाशमङ्कुशधारिणम् ।
वरदाभयहस्तं च चलत्कर्णं सुचामरम् ।

वायव्ये--ओं ह्रीं सरस्वत्यासनाय नमः ।
ओं ह्रीं सरस्वतीमूर्तये नमः ।

ध्यानम्—शुक्लाम्बरधरामक्षमालापुस्तकधारिणीम् ।
सव्यवामकराभ्यां च सुप्रसन्नां गिरं भजे ॥

उत्तरे—ओं ह्रीं महालक्ष्म्यासनाय नमः ।
ओं ह्रीं महामक्ष्मीमूर्तये नमः

ध्यानम्—वामदक्षिणहस्ताभ्यां दधतीं श्रीफलाम्बुजे ।
हेमाभां सघटेभाभ्यां प्लाव्यमानां महाश्रियम् ॥.

गोमुखे—ओं ह्रीं वामादिनवशक्तिभ्यो नमः ।
ओं ह्रीं वामायै नमः । ओं ह्रीं ज्येष्ठायै नमः ।
ओं ह्रीं रौद्र्यै नमः । ओं ह्रीं काल्यै नमः ।
ओं ह्रीं कलविकरण्यै नमः । ओं ह्रीं बलविकरण्यै नमः ।
ओं ह्रीं बलप्रमथिन्यै नमः । ओं ह्रीं सर्वभूतदमन्यै नमः ।
ओं ह्रीं मनोन्मन्यै नमः ।

ध्यानम्—एकाननां द्विनेत्रां च करण्डमकुटान्विताम् ।
कृताञ्जलिपुटां नौमि वरदामरुणप्रभाम् ॥

इति ध्यात्वा,

ऐशान्ये — ओं हां सदाशिवादिसप्तगुरुभ्यो नमः ।
ओं हां सदाशिवगुरवे नमः ।
ओं हां अनन्तगुरवे नमः ।
ओं हां श्रीकण्ठगुरवे नमः ।
ओं हां अम्बिकागुरवे नमः ।
ओं हां गुहगुरवे नमः ।
ओं हां विष्णुगुरवे नमः ।
ओं हां धातृगुरवे नमः ।

ध्यानम्—सदाशिवस्तु श्वेताभो अनन्तश्यामलाकृतिः ।
श्रीकण्ठश्शुक्लवर्णश्च अम्बिका नीलवर्णका ॥

गुहः पीतनिभो विष्णुः कृष्णो रक्तस्ततो विधिः ।
पद्मासनस्थितास्सर्वे भस्मरुद्राक्षधारिणः ॥
कृताञ्जलिपुटा रम्याः करण्डमकुटान्विताः ॥

इति ध्यात्वा,

ओं ह्रीं आधारशक्तये नमः ।

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम् ।
मौलौ बीजाङ्कुराकारां वरदामभयप्रदाम् ॥
पाशांकुशधरां शक्तिं क्रियामाधाररूपिणीम् ॥

कुन्देन्दुवर्णां वरदां त्रिणेत्रां
कोटीरभारां वरदामभयं स्यात् ।
पाशांकुशौ दक्षिणवामहस्ते
आधारशक्तिं रविचन्द्रमौळीम् ॥

ब्रह्मशिलायां पूर्वादिचतुर्दिक्षु—
ओं हां अनन्ताय नमः । ओं हां वासुकये नमः ।
ओं हां तक्षकाय नमः । ओं हां कार्कोटकाय नमः ।

आग्नेयादिषु—
ओं हां शङ्खपालाय नमः । ओं हां गुळिकाय नमः ।
ओं हां पद्माय नमः । ओं हां महापद्माय नमः ।
मध्ये—ओं हां अनन्तासनाय नमः ।

आग्नेयादीशानान्तम्
ओं हां धर्माय नमः । ओं हा ज्ञानाय नमः
ओं हां वैराग्याय नमः । ओं हां ऐश्वर्याय नमः ।

पूर्वादुत्तरान्तम्

ओं हां अधर्माय नमः । ओं हां अज्ञानाय नमः ।

ओं हां अवैराग्याय नमः । ओं हां अनैश्वर्याय नमः ।

दक्षिणोत्तरमध्ये

ओं हां राजसाय नमः । ओं हां तामसाय नमः ।

ओं हां सात्विकाय नमः । मध्ये ओं हां सिंहासनाय नमः ।

पुनः आग्नेयादि चतुर्दिक्षु

ओं हां कृतयुगाय नमः । ओं हां त्रेतायुगाय नमः ।

ओं हां द्वापरयुगाय नमः । ओं हां कलियुगाय नमः ।

ईशानपूर्वयोर्मध्ये ओं हां अव्यक्ताय नमः ।

दक्षिणाग्न्योर्मध्ये ओं हां नियतिनिष्कलाय नमः ।

निर्ऋतिवरुणयोर्मध्ये ओं हां कालाय नमः ।

वायुसोमयोर्मध्ये ओं हां कलायै नमः ।

मध्ये केशवाय नमः

निर्ऋतौ ओं हां अधश्छदनाय नमः ।

ऐशान्ये ओं हां ऊर्ध्वच्छदनाय नमः ।

॥ ओं हां योगासनाय नमः ॥

ऊर्ध्वपट्टिकोपरि विकसितपद्मं विभाव्य,

माणिक्कसदृशं कन्दं नालं नीलसमप्रभम् ।
अङ्कुरं तु प्रवाळाभं दळं रजतसन्निभम् ।
केसरं हेमवर्णाभं अग्रे मुक्तावळीयुतम् ॥

एवं संचिन्त्य, पट्टिकामूले मूलाधारदेशे पूर्वादीशानान्तम्

ओं हां कन्दाय नमः । ओं हां बीजाय नमः ।

ओं हां अङ्कुराय नमः । ओं हां नाळाय नमः ।

ओं हां कण्टकेभ्यो नमः । ओं हां दळेभ्यो नमः ।

ओं हां केसरेभ्यो नमः । ओं हां कर्णिकायै नमः ।

ध्यानम्—तप्तचामीकरच्छायां पञ्चाशत् बीजगर्भिताम् ।
केसराणां चतुष्षष्टया कर्णिकां पूजयेत्ततः ॥

(लिङ्गमूले) ओं हां कर्णिकायै नमः ।

पूर्वाद्यष्टदलेषु—

ओं ह्रीं वामायै नमः । ओं ह्रीं ज्येष्ठायै नमः ।
ओं ह्रीं रौद्र्यै नमः । ओं ह्रीं काळ्यै नमः ।
ओं ह्रीं कलविकरिण्यै नमः । ओं ह्रीं बलविकरिण्यै नमः ।
ओं ह्रीं बलप्रमथिन्यै नमः । ओं ह्रीं सर्वभूतदमन्यै नमः ।

कर्णिकामूले—ओं ह्रीं मनोन्मन्यै नमः (नमस्कारमुद्रां प्रदर्श्य)

दक्षिणे—ओं हां आत्मतत्वाय नमः ।
ओं हां आत्मतत्वाधिपतये ब्रह्मणे नमः ।

उत्तरे—ओं हां विद्यातत्वाय नमः ।
ओं हां विद्यातत्वाधिपतये विष्णवे नमः ।

मध्ये — ओं हां शिवतत्वाय नमः ।
ओं हां शिवतत्वाधिपतये रुद्राय नमः ।

मध्ये कर्णिकां विभाव्य,

दळाग्रवृत्ते—ओं हां सूर्यमण्डलाय नमः ।
ओं हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः ।

ध्यानम्—ब्रह्मा चतुर्मुखः पीतश्चतुर्दोर्दण्डमण्डितः ।
स्रुक्दण्डाक्षकुशोपेतः सूर्यमण्डलमध्यगः ॥

केसराग्रवृत्ते—ओं हां सोममण्डलाय नमः
ओं हां सोममण्डलाधिपतये विष्णवे नमः

ध्यानम्—विष्णुश्चतुर्भुजो मौळी शङ्खचक्रगदाब्जधृक् ।
नीलाम्बुदप्रतीकाशः सोममण्डलमध्यगः ॥

कर्णिकाग्रवृत्ते—ओं हां अग्निमण्डलाय नमः ।
ओं हां अग्निमण्डलाधिपतये रुद्राय नमः ।

ध्यानम् अग्निमध्ये स्थितं रुद्रं नीलकण्ठं त्रिलोचनम् ।
व्याख्यामुद्रानलज्ञान शूलहस्तं चतुर्भुजम् ।
सर्वालङ्कारसम्युक्तं नागयज्ञोपवीतिनम् ॥

इति ध्यात्वा

कर्णिकामध्ये—
कुटिलात्मकां क्षीरोदनिभां शक्तिमण्डलं विचिन्त्य,
ओं हां शक्तिमण्डलाय नमः ।
ओं हां शक्तिमण्डलाधिपतये ईश्वराय नमः ।

ध्यानम् शवश्च मण्डलासीनं व्याळयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम् ॥

खड्गत्रिशूलबाणाक्षमालाभयकरान्वितम् ।
कमण्डलुधरं देवं वराम्बुरुहधारिणम् ॥
दक्षवामक्रमात् सिंहगजचर्मपरिच्छदम् ॥

ओं हां शक्तिमण्डलाधिपतये ईश्वराय नमः ।
ओं हां विमलासनाय नमः ।
ओं हां शिवासनाय नमः । ओं हां शिवमूर्तये नमः ।

क्षित्यादिकुटिलप्रान्तं एवं व्याप्तिकमासनम् ।
शक्तौ शिवासनं ध्यायेत् सूर्यकोटिसमप्रभम् ॥

ओं हां शिवासनाय नमः ।
ओं हां हं हां शिवमूर्तये नमः ।

इति तेजोरूपां दण्डाकारां अविभक्तावयवां शिवतत्वात्मिकां परबिन्दु-व्याप्तिकां विभाव्य—लिङ्गवेष्टने निवेशयेत् ॥ अस्यां मूर्तौ मूर्ध-मुख-हृद्गुह्यपादादि-सर्वांगेषु दण्डभङ्ग्यादिकं विधाय,

दण्डभङ्गिन्यासः

ओं हों ईशानमूर्धाय नमः मूर्ध्नि...
ओं हं सद्योजातमूर्तये नमः । पादयोः
इति दण्डभङ्गिन्यासः

अथ मुण्डभङ्गिन्यासः

ओं हों ईशानमूर्धाय नमः ऊर्ध्वमूर्ध्नि...
ओं हों सद्योजातमूर्धाय नमः पश्चिममूर्ध्नि ।
इति मुण्डभङ्गिन्यासः

अथ वक्त्रभङ्गिन्यासः

ओं हें ईशानवक्त्राय नमः ऊर्ध्ववक्त्रे...
ओं हें सद्योजातवक्त्राय नमः पश्चिमवक्त्रे ॥
इति वक्त्रभङ्गिन्यासः

अथ कलाभङ्गिन्यासः

ओं हों शान्त्यतीतकलायै नमः मूर्ध्नि...
ओं ह्लां निवृत्तिकलायै नमः पादयोः ॥
इति कलाभङ्गिन्यासः

ओं हों ईशानस्सर्वविद्यानां शशिन्यै नमः ऊर्ध्वमूर्ध्नि...
ओं हों सदाशिवों ज्वालिन्यै नमः पश्चिममूर्ध्नि ।
एवं ईशानकलापञ्चकम्

ओं हें अव्यक्तकलायै शान्त्यतीतकलायै नमः ऊर्ध्ववक्त्रे ..
ओं हें प्रचोदयान्निवृत्यै नमः पश्चिमवक्त्रे ॥
इति तत्पुरुषकलाश्चतस्रः

ओं हुं अघोरेभ्यस्तमायै नमः हृदये...
ओं हुं रूपेभ्यो ज्वरायै नमः उरसि ॥

इति बहुरूपकलाष्टकम् ।

ओं हिं वामदेवाय नमो रजायै गुह्ये...
ओं हिं उन्मनाय नमो भयायै नमः वामपार्श्वे ॥

इति वामदेवकलास्त्रयोदश ।

ओं हं सद्योजातं प्रपद्यामि सिद्ध्यै नमः दक्षिणपादे...
ओं हं उद्भवाय नमो धृत्यै नमः वामबाहौ ॥

इति सद्योजातकलाष्टकम् ।

अन्तर्मातृकान्यासः

मूलाधारस्य वीणादण्डमूले चतुर्दळपद्मे ओं गं गणपत्यासनाय नमः । ओं गं गणपतिमूर्तये नमः ।

ध्यानम्—वशषसदळयुक्ते सौम्यमाधारपद्मे
तरुणमरुणगात्रं वारणास्यं गणेशम् ।
अभयवरदहस्तं चारुपाशांकुशोद्यत्
करयुगळमनन्यश्चिन्तयेद् विघ्नराजम् ॥

गणानां त्वा...सादनम् । एकदन्ताय...प्रचोदयात् ॥

ओं वं शं षं सं चतुर्दळपद्मनिवासिने सिद्धलक्ष्मीवल्लभासमेताय श्री गणपतये हंसस्सोऽहं हंसस्स्वाहा ॥

स्वाधिष्ठानस्य वीणादण्डोर्ध्वे षड्दळपद्मे,
ओं ह्रां ब्रह्मासनाय नमः ।
ओं ह्रां ब्रह्ममूर्तये नमः ॥

ध्यानम्—बभमयरलसंज्ञैः अक्षरैः क्लृप्तपत्रे
सुखकरमुपविष्टं पङ्कजे पद्मयोनिम् ।
अभयवरदहस्तं गण्डिकाचाक्षमाला-
करयुगळमनन्यं चिन्तयेद्विश्वयोनिम् ॥

ब्रह्मजज्ञानं प्रथमं पुरस्तात् । विसीमतस्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठाः । सतश्च योनिमसतश्च विवः ॥

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि ।
तन्नो ब्रह्म प्रचोदयात् ॥

ओं बं भं मं यं रं लं षड्दळपद्मनिवासिने सावित्री गायत्री समेताय श्रीब्रह्मणे हंसस्सोहं हंसस्स्वाहा ॥

मणिपूरके नाभौ—

डाद्यैः फान्तगतैः प्रकल्पितदळैः पद्मे निविष्टं हरिं
मार्तण्डद्युतिमादिपूरुषमजं नारायणं शार्ङ्गिणम् ।
मूर्तामूर्तमनेकमूर्तममलं पीताम्बरं कौस्तुभं
श्रीवत्साङ्कितमब्धिजासहचरं ध्यायेज्जगन्मोहनम् ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपांसुरे ।

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ओं डं, ढं, णं, तं, थं, दं, धं, नं, पं, फं दशदळपद्मनिवासिने गरुडवाहनाय धरालक्ष्मीसमेताय श्रीविष्णवे हंसस्सोहं हंसस्स्वाहा ॥

अनाहतस्य हृदये –

काद्यैष्ठान्तगतैः प्रकल्पितदले पङ्केरुहे पार्वती-
कान्तं कान्तिशशाङ्ककोटिसदृशप्रख्यं कपर्दोज्ज्वलम् ।

शान्तं टङ्कमृगाभयेष्टवरदं युक्तं करैः कङ्कणैः
ध्यायेदीश्वरमीप्सितार्थफलदं हृत्पुण्डरीके स्थितम् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ओं कं, खं, गं, घं, ङं, चं, छं, जं, झं, ञं, टं, ठं द्वादशदळपद्म-निवासिने गौर्याम्बिकासमेताय श्रीरुद्रेश्वराय हंसस्सोहं हंसस्स्वाहा ।

विशुद्धस्य तालुमूले—

मूर्त्यङ्गेषु निविष्टमङ्गरहितं शान्तं तुषारप्रभं
व्याप्ताशेषचराचरैर्गुणगणभावेन संवेष्टितम् ।
मूर्तामूर्तमनेकमूर्तममलं ज्योतिःप्रदीपोपममं
साक्षात्षोडशपत्रयुक्तकमले जीवं परं चिन्तयेत् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि ।
तन्नश्शिवः प्रचोदयात् ॥

ओं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति षोडशदळपद्मनिवासिने उन्मनी-वाग्वादिनी समेताय श्रीमहेश्वराय हंसस्सोहं हंसस्स्वाहा ।

आज्ञायां भ्रुवोर्मध्ये—

हक्षाभ्यां परिवृत्तिपत्रकमले दिव्ये जगत्कारणम्
विश्वोत्तीर्णमनेकदेहममलं स्वच्छन्दमात्मेच्छया ।

तत्तद्योगतया स्वदेशिकतनुं भावेन दीपांकुरं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतम् ॥

ईशानस्सर्वविद्यानां ... सदाशिवोम् ।

हंसहंसाय विद्महे परमहंसाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥

ओं हं क्षं द्विदळपद्मनिवासिने मनोन्मनीधर्मशक्तिसमेताय सदाशिवाय श्रीगुरवे हंसस्सोहं हंसस्स्वाहा ॥

ब्रह्मरन्ध्रे—

विश्वव्यापिनमादिदेवममलं सत्यं परं निष्कळं
नित्यं युक्तसहस्रपत्रकमले व्याप्ताक्षरैर्मण्डितम् ।
नित्यानन्दमनन्तपूर्णभरितं शब्दस्तुषारैर्युतं
शब्दब्रह्ममयं परात्परमहं भक्त्या परं भावये ॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नापात्रञ्जनयन्त देवाः ॥

निरञ्जनाय विद्महे निराभासाय धीमहि ।
तन्नस्सूक्ष्मः प्रचोदयात् ॥

सहस्रदळपद्मनिवासिने पराशक्तिसमेताय परशिवाय परात्पराय हंसस्सोहं हंसस्स्वाहा ॥

इति अन्तर्मातृकान्यासः

अनन्तरं बहिर्मातृकान्यासः

ओं अं नमः शिरसि... ओं अः नमः आस्ये इति षोडशस्वराः ॥

ओं कं नमः दक्षिणबाहौ ... ओं क्षं नमः हृदयादिपादान्ते ।
॥ इति बहिर्मातृकान्यासः ॥

पुष्पैः अञ्जलिमापूर्य,

क्षित्यादि कुटिलाप्रान्त मन्त्रसिंहासनस्थितम् ।
शुद्धस्फटिकसङ्काशं द्वात्रिंशल्लक्षणान्वितम् ॥
पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम् ।
दृक्क्रियेच्छा विशालाक्षं ज्ञानचन्द्रकलान्वितम् ॥
धवलेशानवदनं पीततत्पुरुषाननम् ।
कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम् ॥
सुश्वेतपश्चिमास्यैकं सद्योजातं समूर्तिनम् ।
नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम् ॥
शक्त्यसीशूलखट्वाङ्गवरव्यग्रकराम्बुजम् ।
दक्षिणे चाथ वामे तु डमरुं बीजपूरकम् ॥
नागाक्षसूत्रनीलाब्जं बिभ्राणं पञ्चभिः करैः ।
हारकङ्कणकेयूरैः मुद्रिकाभिरलंकृतम् ॥
संचिन्त्य मूर्तेरुपरि शक्तिमातृविजृम्भणम् ।
लिङ्गाकारोपमर्देन भावने लिङ्गतां त्यजेत् ॥

ओं हां विद्यादेहाय नमः । इति ब्रह्मरन्ध्रान्तव्यापकं प्रासादमुच्चार्य, शिवतत्वान्तव्याप्तिकं सौदामिनीसन्निभं पुष्पाञ्जलिभूतं ध्यात्वा,

विद्यादेहं समुदितरूपं विन्यस्य

ओं हौं नेत्रेभ्यो नमः । इति नेत्रं सर्वज्ञताबीजं मुखपञ्चकनेत्रेषु विन्यस्य पुष्पैः अञ्जलिमापूर्य,

आत्वा वहन्तु हरयस्सचेतसः श्वेतैरश्वैस्सह केतुमद्भिः । वाताजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् ॥

मूलमन्त्रं मेधादिकलोपेतं प्रचण्डमार्तण्डोपमं पूरकपूर्वं ब्रह्मादिकारणत्यागक्रमेण लयान्तमुच्चरन्, सर्वकर्तारं निष्कळं विभुं ज्ञानानन्दमयं स्वरूपप्रकाशं संचिन्त्य.

…न्मयीभूतः सृष्टिक्रमेण द्वादशान्तात् पतङ्गपिङ्गाभं ललाटे अवतार्य, …कोटिसदृशं निर्यत्सुधापिण्डपाण्डुरितदिङ्मण्डलं ध्यात्वा, प्राणप्रवाह-…विनिर्गत्य, अञ्जलिगतं विचिन्त्य, लक्ष्यमूर्तौ आवाहिन्या सद्यो-…आवाह्य, स्थापिन्या वामदेवेन पद्मासने सम्स्थाप्य, सन्निधान्या …सन्निधाप्य, निष्ठुरया तत्पुरुषेण निरुद्धय, तर्जनीभ्यां ईशानेन …ज्य, मूलेन धेनुमुद्रां प्रदर्श्य, 'स्वागतं ते महादेव' इति विज्ञाप्य …गुस्वागतमिति दवेनोक्तं विभाव्य,

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत् त्वं प्रीतिभावेन लिंगेऽस्मिन् सन्निधीभव ॥

…विज्ञाप्य, सुप्रसन्नो भव, वरदो भव, स्वामिन् प्रसीद प्रसीद इति …य, स्वागतार्घ्यं दत्वा हृदयादिकरान्तस्थानेषु, ओं हां हृदयाय नमः …अस्त्राय फट्, इति अङ्गानि विन्यस्य, मूलेन एकत्वं विधाय, …ेण संरक्ष्य, कवचेनावकुण्ठ्य, मूलेन अमृतमुद्रां दर्शयित्वा, वौषडन्त-…न महामुद्रया परमीकृत्य, पञ्चमुखीमुद्रां दत्वा, सहृदा नमोन्तमूलेन …ोः पाद्यं, स्वधान्तमूलेन ईशानादिमुखपञ्चकेषु आचमनं, स्वाहान्त-…न तथैव शिरःपञ्चकेषु अर्घ्यं दत्वा, वौषडन्तमूलेन पुष्पदूर्वाक्षतादीन् …ान् । सहृदा स्वाहान्तमूलेन धूपदीपौ दत्वा, अभ्यङ्गोद्वर्तननिर्मज्जना-…नि स्नपनाङ्गानि विभाव्य, अर्घ्योदकबिन्दुना संस्नाप्य, सूक्ष्मवाससा …पृज्य, पाद्याचमनार्घ्याणि दत्वा,

चन्दन-अक्षत-दूर्वा-पुष्प-हेमकौपीन-मेखलोपवीत- विचित्रवस्त्राणि …डलाभरणानि मनसा भक्त्या च निवेद्य, पुष्पाञ्जलित्रयेण—

ओं हां हौं आत्मतत्वाधिपतये शिवाय नमः
ओं हां हौं विद्यातत्वाधिपतये शिवाय नमः
ओं हां हौं शिवतत्वाधिपतये शिवाय नमः

…न अभ्यर्च्य, दण्डादिभिः पुष्पदामादिभिः अलंकृत्य अस्त्रेण घण्टां …दयन्, धूपदीप-आचमनार्घ्याणि दत्वा, मनोरथमुद्रां दर्शयित्वा,

तद्वामे —

ओं ह्रीं मनोन्मन्यासनाय नमः ।

ओं ह्रीं मनोन्मनीमूर्तये नमः ।

ध्यानम्—

ध्यायेद्देवीं त्रिणेत्रां शशिनिभवदनां वेदहस्तान् दधानां
सव्ये पद्मं वरदमपरे चाभयं चाक्षमालाम् ।
दिव्यैराभरणैर्विभूषिततनुं ब्रह्मादिभिः पूजितां
देवैरेव मनोन्मनीं प्रतिदिनं कामार्थदात्रीं शुभाम् ॥

-ों ह्रीं मनोन्मन्यै नमः । विद्यादेहाय नमः । नेत्रेभ्यो नमः ।
ायेति मन्त्रेण ओं ह्रीं मनोन्मन्यै नमः आवाहनादियानि-
र्शयित्वा, गन्धादिभिः अभ्यर्च्य,

ाषु

ह्रां हृदयाय वामिन्यै नमः ।
ह्रीं शिरसे नीलिन्यै नमः ।
ह्रूं शिखायै चक्रिण्यै नमः ।
ह्रैं कवचाय खड्गिन्यै नमः ।
ह्रौं नेत्रेभ्यः पाशाङ्कुशे नमः ।
ह्रः अस्त्राय गांभिन्यै नमः ।

ा, आवरणपूजार्थं अभ्येष्य, प्रार्थ्य, भोगाङ्ग पूजयेत् ॥

ां—

पञ्चव ्यः ईशानमादाय
ों ईशानमू र्ये नमः इति ईशानदळे

व ्यः तत्पुरुषवक्त्रमादाय
ओं हें तत्पुरुषवक्त्राय नमः इति पूर्वदळे

हृत्प्रदेशात् अघोरमादाय
ओं हुं अघोरहृदयाय नमः इति दक्षिणदळे

गुह्यमण्डलात् वामदेवमादाय
ओं हिं वामदेवगुह्याय नमः इति उत्तरदळे

पादाद्यङ्गात् सद्योजातमादाय
ओं हं सद्योजातमूर्तये नमः इति पश्चिमदळे

नेत्रेभ्यो नेत्रमादाय
ओं हौं नेत्रेभ्यो नमः इति ईशानस्योत्तरभागे ।

सद्भावात्मकं हृदयं हृदयादादाय
ओं हां हृदयाय नमः इति आग्नेयदळे ।

सर्वेशित्वलक्षणं शिरः शिरोदेशादादाय
ओं ह्रीं शिरसे नमः इतीशानदळे नेत्रस्योत्तरे ।

अनन्याधीन वशित्वरूप शिखां शिखादेशादादाय
ओं हूं शिखायै नमः इति नैऋतदळे ।

परैरभेद्यं तेजोरूपं कवचं सर्वाङ्गादादाय
ओं हैं कवचाय नमः इति वायव्यदळे ।

प्रतापरूपं अस्त्रं हस्तेभ्यः आहृत्य
पूर्वादि चतुर्दळेषु ओं हः अस्त्राय नमः ।

शिवासनपद्मदळमध्ये

द्वितीयावरणे पूर्वादि

ओं हां अनन्तासनाय नमः ।
ओं हां अनन्तमूर्तये नमः ।
ओं हां अनन्ताय नमः ।

ओं हां सूक्ष्मासनाय नमः ।
ओं हां सूक्ष्ममूर्तये नमः ।
ओं हां सूक्ष्माय नमः ।

ओं ह्रां शिवोत्तमासनाय नमः ।
ओं ह्रां शिवोत्तममूर्तये नमः ।
ओं ह्रां शिवोत्तमाय नमः ।

ओं ह्रां एकनेत्रासनाय नमः ।
ओं ह्रां एकनेत्रमूर्तये नमः ।
ओं ह्रां एकनेत्राय नमः ।

ओं ह्रां एकरुद्रासनाय नमः ।
ओं ह्रां एकरुद्रमूर्तये नमः ।
ओं ह्रां एकरुद्राय नमः ।

ओं ह्रां त्रिमूर्त्यासनाय नमः ।
ओं ह्रां त्रिमूर्तिमूर्तये नमः ।
ओं ह्रां त्रिमूर्तये नमः ।

ओं ह्रां श्रीकण्ठासनाय नमः ।
ओं ह्रां श्रीकण्ठमूर्तये नमः ।
ओं ह्रां श्रीकण्ठाय नमः ।

ओं ह्रां शिखण्ड्यासनाय नमः ।
ओं ह्रां शिखण्डिमूर्तये नमः ।
ओं ह्रां शिखण्डिने नमः ।

तृतीयावरणे –

पीठकण्ठे पूर्वाद्यष्टदिक्षु

ओं ह्रां नन्दिने नमः ।
ओं ह्रां भृङ्गिणे नमः ।
ओं ह्रां वृषभाय नमः ।
ओं ह्रां देव्यै नमः ।
ओं ह्रां महाकाळाय नमः ।
ओं ह्रां विनायकाय नमः ।
ओं ह्रां स्कन्दाय नमः ।
ओं ह्रां चण्डेश्वराय नमः ।

चतुर्थावरणे—

अधःपट्टिकायां पूर्वाद्यष्टदिक्षु

ओं ह्रां इन्द्राय नमः । ओं ह्रां अग्नये नमः ।
ओं ह्रां यमाय नमः । ओं ह्रां निरृतये नमः ।
ओं ह्रां वरुणाय नमः । ओं ह्रां वायवे नमः ।
ओं ह्रां कुबेराय नमः । ओं ह्रां ईशानाय नमः ।
ईशानदक्षिणे ओं ह्रां ब्रह्मणे नमः ।
नैरृत्युत्तरे ओं ह्रां विष्णवे नमः ।

पञ्चमावरणे—

आधारशिलयां पूर्वाद्यष्टदिक्षु

ओं ह्रां वज्राय नमः । ओं ह्रां शक्तये नमः ।
ओं ह्रां दण्डाय नमः । ओं ह्रां खड्गाय नमः ।
ओं ह्रां पाशाय नमः । ओं ह्रां अङ्कुशाय नमः ।
ओं ह्रां गदायै नमः । ओं ह्रां त्रिशूलाय नमः ।
ईशानदक्षिणे ओं ह्रां पद्माय नमः ।
नैरृत्युत्तरे ओं ह्रां चक्राय नमः । इत्यभ्यर्च्य

सर्वेषां नैवेद्यधूपदीपार्घ्यं दत्वा, स्वर्णपुष्पं दत्वा, अनुज्ञाप्रार्थनमादाय,

त्वमग्ने रुद्रा असुरो महोदिवस्त्वं शर्द्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नुत्मना ॥ ओवो राजान-मध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः । अग्निं पुरातनयित्नोरचित्ता-द्धिरण्यरूपमवसे कृणुध्वम् ॥ इत्युच्चरन् प्रार्थयेत् ।

देवदेव जगन्नाथ जगदानन्दकारण ।
महोत्सवस्य कार्यार्थं अनुज्ञां देहि मे प्रभो ॥

इति प्रार्थ्य, साष्टाङ्गं प्रणम्य,

साङ्ग्रहण्येष्ट्या यजते । इमां जनतां संगृह्णानीति । द्वादशारत्नो-रशना भवति । द्वादशमासास्संवत्सरः । संवत्सरमेवावरुन्धे । मौञ्जी भवति । ऊर्वै मुञ्जाः । ऊर्जमेवावरुन्धे । चित्रा नक्षत्र भवति । चित्रं वा एतत्कर्म । यदश्वमेधस्समृद्धय ।

इत्युच्चरन् स्थालिकामादाय,

स्वस्तिमङ्गळवाचकैस्सह प्रदक्षिणक्रमेण देवालयं प्रविश्य, क्रमेण देवीसमीपं गत्वा, अनुज्ञां कुर्यात् ॥

अथ पञ्चासनपूजा

अधःकूर्मशिलासीनां क्षीरोदसितविग्रहाम् ।
मौलौ वीजांकुराकारां वरदामभयप्रदाम् ।
पाशांकुशधरा शक्ति क्रियामाधाररूपिणीम् ॥

ओं ह्रीं आधारशक्तये नमः ।

पृथ्वीकन्दं कलान्त्यैकनाळकं भावकण्टकम् ।
शुद्धमायामहापद्मं अनेकदळसंकुलम् ।
अनन्ताख्यमिदं प्रोक्तं हरितालसमप्रभम् ॥

पूर्वाद्यष्टदिक्षु—

ओं हां अनन्ताय नमः   ओं हां वासुकये नमः
ओं हां तक्षकाय नमः   ओं हां कार्कोटकाय नमः
ओं हां पद्माय नमः   ओं हां महापद्माय नमः
ओं हां शङ्खपालाय नमः   ओं हां गुळिकाय नमः इत्यभ्यर्च्य.

तन्मध्यगमनन्तेशं विभुं व्याप्य स्थितं त्वधः ।
श्वेतं चतुर्मुखं चाष्टभुजद्वादशलोचनम् ।
चतुर्धमण्डलोपेतं भूषणाद्यैर्युतं स्मरेत् ॥

ओं हां अनन्तासनाय नमः ।

तदुपरि सिंहासने पूर्वपट्टिकाद्यनुकण्ठान्तम्,

विचित्रकेसरिप्रख्यान् अन्योन्यं पृष्ठदर्शिनः ।
कृतत्रेतादिरूपेण शिवस्यासनपादुकान् ॥
सितकाश्मीररक्ताराळी चार्यसिंहाकृतीन् स्मरेत् ।

आग्नेयादि दिक्षु—

ओं हां धर्माय नमः ओं हां ज्ञानाय नमः
ओं हां वैराग्याय नमः ओं हां ऐश्वर्याय नमः ।

इति संपूज्य

गात्रकान्स्फटिकप्रख्यान्त्र्यक्षान् सिंहशिरोधृतान् ।
स्तब्धकायशिरोग्रीवान् पादुकासक्तमस्तकान् ॥

अग्रगात्रकपादस्थमस्तकान् नररूपिणः ।
ध्यायन् बुद्धिगुणाधर्ममुखाधिष्ठायकान्यजेत् ॥

ओं हां अधर्माय नमः ओं हां अज्ञानाय नमः
ओं हां अवैराग्याय नमः ओं हां अनैश्वर्याय नमः

ऊर्ध्वं कण्ठावृतदक्षिणोत्तरमध्येषु

ओं हां राजसाय नमः ओं हां तामसाय नमः
ओं हां सात्त्विकाय नमः मध्ये सिंहासनाय नमः

इति सिह्मासनं सम्पूज्य, तदुपरि योगासने ऊर्ध्वकण्ठादि ऊर्ध्वपट्टिकाद्यनु-
कण्ठान्तम्

अव्यक्तो नियतिः कालः कला चेति चतुष्टयः ।
अव्यक्तस्स्फटिकाभासो नियतिश्चाञ्जनद्युतिः ॥
कालो डाडिमपुष्पाभः कला भिन्नाञ्जनप्रभा ।

ईशानपूर्वयोः मध्ये ओं हां अव्यक्ताय नमः
दक्षिणाग्न्योः मध्ये ओं हां नियतये नमः
नैर्ऋतिवरुणयोः मध्ये ओं हां कालाय नमः
वायुसोमयोः मध्ये ओं हां कलायै नमः
मध्ये ओं हां केशवाय नमः

पीठोर्ध्वमेखलाधोभागे शुद्धमायान्तं विभाव्य,
नैर्ऋतौ ओं हां अधश्छदनाय नमः
तदूर्ध्वे ओं हां ऊर्ध्वच्छदनाय नमः
मध्ये योगासनाय नमः, इति योगासनं सम्पूज्य,

एवं योगासनं प्रोक्तं ततः पद्मासनं भवेत् ।
मायातत्वं बृहत्कन्दं शुद्धविद्याब्जशोभितम् ॥

विद्येश्वरदळच्छन्नं शक्तिकेसरसम्युतम् ।
विद्यातत्वमयं तत्र कर्णिकां सम्प्रकल्पयेत् ॥

माणिक्यसदृशं कन्दं नाळं नीलसमप्रभम् ।
अङ्कुरन्तु प्रवाळाभं दळं रजतशोभितम् ॥
केसरं हेमवर्णाभं अग्रे मुक्तावळीयुतम् ।

ओं हां कन्दाय नमः ओं हां बीजाय नमः
ओं हां अङ्कुराय नमः ओं हां नाळाय नमः
ओं हां कण्टकेभ्यो नमः ओं हां दळेभ्यो नमः
ओं हां उपदळेभ्यो नमः

इति विद्येश्वराष्टकरूपाणि दळानि विचिन्त्य, अभ्यर्च्य, तन्मूलपीठोपरि
ओं हां केसरेभ्यो नमः । पीठोन्नतभागमध्ये,

तप्तचामीकरच्छायां पञ्चाशद्बीजगर्भिताम् ।
केसराणां चतुष्षष्ट्याः कर्णिकां पूजयेत्ततः ॥

ओं हां कर्णिकायै नमः ओं हां बीजेभ्यो नमः

इत्येवं समुदितरूपं पद्मं विभाव्य,

केसराग्रवृत्ते—

सोमस्य मण्डलं श्वेतं कलाषोडशसम्युतम् ।
प्राणिनां ह्लादनं प्रोक्तं सोममण्डलमुच्यते ॥

ओं हां सोममण्डलाय नमः सोममण्डलाधिपतये

तन्मध्ये चापि विष्णुं नीलजीमूतसमप्रभम् ।
भस्मोद्धूलितसर्वाङ्गं सर्वाभरणभूषितम् ॥

एकवक्त्रं द्विनेत्रं च कर्णवेष्टितकुण्डलम् ।
चतुर्भुजं शङ्खचक्रनमस्कारसमन्वितम् ॥

पीताम्बरधरं विष्णुं स्थितिकारणकारणम् ।
किरीटमकुटोपेतं विद्यातत्वस्वरूपिणम् ॥

ओं हां विष्णवे नमः

कर्णिकाग्रवृत्ते—

वह्निमण्डलमेवं स्यात् प्राणिसन्तापकारकम् ।
अनेकाग्निप्रतीकाशं कलादशसमन्वितम् ॥

ओं हां अग्निमण्डलाय नमः ओं हां अग्निमण्डलाधिपतये

रुद्रं माणिक्यवर्णाभं एकास्यं च त्रिलोचनम् ।
चतुर्भुजं जटाजटं इन्दुरेखाप्रसूतकम् ॥

भस्मोद्धूळितसर्वांगं त्रिपुण्ड्रेण विराजितम् ।
नमोमुद्रान्वितं देवं लयकारणकारणम् ।
इति ध्यात्वा च तं रुद्रं शिवतत्वस्वरूपिणम् ॥

ओं हां रुद्राय नमः

कर्णिकामध्ये—

क्षीराश्रयनिभां शक्तिं कर्णिकां कुटिलात्मिकाम् ।
गौरीगायत्रीसम्युक्तां इच्छाज्ञानस्वरूपिणीम् ॥

शक्तिमण्डलाय नमः ।

शक्तिमण्डलाधिपतये,

शक्तेश्च मण्डलासीनं व्याळयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम् ॥

खड्गत्रिशूलबाणाक्षमालाऽभयकरान्वितम् ।
कमण्डलुधरं देवं वराम्बुरुहधारिणम् ॥

ओं हां पद्माय नमः । इति सम्पूज्य,

ततः पूर्वादीशान्तदळकेसरेषु, विद्येश्वराधिष्ठात्रीः वामाद्यष्टौ शिवशक्तीः, कर्णिकायां मनोन्मनीं च ध्यायेत् ।

वरप्रदेशाङ्गवामहस्ताः
सव्यद्विहस्तोभयचामराश्च ।
रक्ता जडाजूटशशाङ्करेखाः
विभूषणैर्भूषितविश्वगात्राः ॥

एवं वामाद्यष्टौ शक्तीः सम्पूज्य,

ओं हां वामायै नमः ओं हां ज्येष्ठायै नमः
ओं हां रौद्र्यै नमः ओं हां काळ्यै नमः
ओं हां कलविकरिण्यै नमः ओं हां बलविकरिण्यै नमः
ओं हां बलप्रमथिन्यै नमः ओं हां सर्वभूतदमन्यै नमः

कर्णिकायमीशाने—

उद्यद्दिनकराभासां त्रिणेत्रां च चतुर्भुजाम् ।
जटामकुटखण्डेन्दुमण्डितां धृतचामराम् ॥

वरदाभयसम्युक्तां शिवासक्तकराम्बुजाम् ।
गोक्षीरधवळां शक्तिं कर्णिकायां मनोन्मनीम् ॥

इति ध्यात्वा ओं हां मनोन्मन्यै नमः ।

एवं पद्मासनं प्रोक्तं तदूर्ध्वे विमलासनम् ।
मण्डलत्रयमत्रैव कल्पयेद्विमलासनम् ॥

आत्मतत्वं न्यसेत् सव्ये विद्यातत्वं तु वामके ।
मध्यमे शिवतत्वं स्यात् कल्पयेत् कल्पवित्तमः ॥

दळाग्रवृत्ते—

कोट्यादित्यप्रतीकाशं शिवसूर्यस्य मण्डलम् ।
सहस्रकिरणोपेतं सूर्यमण्डलमुच्यते ॥

ओं हां सूर्यमण्डलाय नमः ओं हां सूर्यमण्डलाधिपतये,

सूर्यमण्डलमध्यस्थं आत्मतत्वस्वरूपिणम् ।
चतुर्वक्त्रं चतुर्बाहुं प्रतिवक्त्रं द्विलोचनम् ॥

तप्तचामीकराभासं सर्वाभरणभूषितम् ।
नमोमुद्रान्वितं देवं सृष्टिकारणकारणम् ॥

इति ध्यात्वा च ब्रह्माणं आत्मतत्त्वस्वरूपिणम् ।

ओं हां ब्रह्मणे

दक्षवामक्रमासिंहगजचर्मपरिच्छदम् ॥

ओं हां ईश्वराय नमः । ओं हां विमलासनाय नमः ।

तदुपरि,

क्षित्यादिकुटिलाप्रान्तमेवं व्याप्तिकमासनम् ।
शक्तौ शिवासनं ध्यायेत् सूर्यकोटिसमप्रभम् ॥

ओं ह्रां कुटिलाशक्तये नमः । तदुपरि

ओं ह्रां शिवासनाय नमः ।

ओं ह्रां शिवमूर्तये नमः ।

इति मूर्ति तेजोरूपां दण्डाकारां अविभक्तावयवां शिवतत्वात्मक परबिन्दु-व्याप्तिकां विभाव्य, लिङ्गवेष्ठने निवेशयेत् ॥

अस्यां मूर्तौ मूर्ध-मुख-हृद्-गुह्य-पादादि सर्वांगेषु दण्डभङ्ग्यादिकं विधाय,

---

७ देवी अनुज्ञा

द्वारम् अस्त्रेण सम्प्रोक्ष्य, ऊर्ध्वपदवामे

ओं ह्रीं भूमिदेव्यासनाय नमः ।

ओं ह्रीं भूमिदेवीमूर्तये नमः ।

ध्यानम्—पीतवर्णां एकवक्त्रां सर्वावयवशोभिनीम् ।
वराभयसमायुक्तां भूमिमावाहयेद्गुरुः ॥

इति ध्यात्वा, ओं भूं भूमिदेव्यै नमः ।

तद्दक्षिणे ओं सां सरस्वत्यासनाय नमः ।

ओं सां सरस्वतीमूर्तये नमः ।

ध्यानम्—धवलां पुस्तकैर्युक्तां किरीटमकुटान्विताम् ।
वरदाभयसम्युक्तां सर्वाभरणशोभिताम् ॥

ओं सां सरस्वत्यै नमः ।

तयोर्मध्ये ओं मं महालक्ष्म्यासनाय नमः ।

ओं मं महालक्ष्मीमूर्तये नमः ।

ध्यानम्—चतुर्भुजधरां देवीं किरीटमकुटान्विताम् ।
सर्वालङ्कारसम्युक्तां सितपद्मधरां शुभाम् ॥

इति ध्यात्वा ओं मं महालक्ष्म्यै नमः

वामपार्श्वे ओं गं गङ्गासनाय नमः ।

ओं गं गङ्गामूर्तये नमः ।

ध्यानम्—काञ्चनाभां महाशक्तिं करण्डमकुटान्विताम् ।
वरदाभयसम्युक्तां बिभ्रतीं धवलाम्शुकाम् ॥

इति ध्यात्वा ओं गं गङ्गायै नमः ।

तद्दक्षिणे ओं शां शार्ङ्गिण्यासनाय नमः ।

ओं शां शार्ङ्गिणीमूर्तये नमः ।

ध्यानम्—शुद्धस्फटिकसङ्काशा शार्ङ्गिणी मकरस्थिता ।
वराक्षमालां दक्षे तु वामे चक्रं च बिभ्रती ॥

इति ध्यात्वा, ओं शां शार्ङ्गिण्यै नमः ।

वामपार्श्वे ओं नं नर्मदासनाय नमः ।

ओं नं नर्मदामूर्तये नमः ।

ध्यानम्—त्रिशूलं डमरुं हस्ते सितवर्णां स्मिताननाम् ।
किरीटमकुटोपेतां सर्वालङ्कारशोभिनीम् ॥

इति ध्यात्वा ओं नं नर्मदायै नमः

तद्दक्षिणे ओं गं गोदावर्यासनाय नमः ।

ओं गं गोदावरीमूर्तये नमः ।

ध्यानम्—कुङ्कुमाभां महायोगां किरीटमकुटान्विताम् ।
त्रिशूलाभयसम्युक्तां देवीमावाहयेद्धृदा ॥

इति ध्यात्वा, ओं गं गोदावर्यै नमः ।

दक्षिणकवाटे ओं ह्लीं कावेय नमः ।

वामकवाटे ओं ह्लीं सिन्धवे नमः ।

द्वाराग्रे ओं ह्रां सिंहाय नमः । सर्वेषां नैवेद्यधूपदीपार्घ्याणि दत्वा ओं ह्लीं अक्षद्वारपालिकाभ्यां नमः । नैवेद्यं दत्वा, त्रिविधविघ्नान्निरस्य सव्यप... रस्सरमन्तः प्रविश्य, प्रच्छन्नपटे ओं ह्लीं तिरस्करिण्यै नमः । देवीसमीपं गत्वा विशेषार्घ्यजलेन बिम्बम् अस्त्रेण सम्प्रोक्ष्य,

ओं ह्लीं आधारशक्तये नमः ।

अधःकूर्मशिलासीनां...ओं ह्लीं आधारशक्तये नमः । इत्येवं समस्तरूपं पद्मं विभाव्य, ओं ह्लीं पद्माय नमः । इति सम्पूज्य,

पूर्वादीशान्तकेसरेषु,

ओं ह्लां इच्छायै नमः । ओं ह्लीं ज्ञान्यै नमः ।
ओं ह्लूं क्रियायै नमः । ओं ह्रें वाचे नमः ।
ओं ह्रें वागीश्वर्यै नमः । ओं ह्लों ज्वालिन्यै नमः ।
ओं ह्लौं वामायै नमः । ओं ह्लं ज्येष्ठायै नमः ।
ओं ह्लः रौद्र्यै नमः । इत्यभ्यर्च्य अर्घ्यं दत्वा,

दळाग्रवृत्ते–ओं ह्लीं सूर्यमण्डलाय नमः ।
ओं ह्लीं सूर्यमण्डलाधिपत्यै सरस्वत्यै नमः ।

ध्यानम्—चतुर्भुजां त्रिणेत्रां च श्वेतवर्णां तथैव च ।
अक्षमालां च सव्ये तु पुस्तकं वामपार्श्वके ॥
अभयं वरदं चैव गण्डिकां वामहस्तके ।
सव्ये पद्मसमायुक्तां अधश्चैव तु धारयेत् ॥
सर्वलक्षणसम्युक्तां सरस्वतीं प्रपूजयेत् ।

ओं ह्लीं सूर्यमण्डलाधिपत्यै सरस्वत्यै नमः ।

केसराग्रवृत्ते–ओं ह्लीं सोममण्डलाय नमः ।
ओं ह्लीं सोममण्डलाधिपत्यै महालक्ष्म्यै नमः ।

द्विभुजां च द्विनेत्रां च सुरत्नमकुटान्विताम् ।
पीतवर्णसमायुक्तां सर्वावयवसुन्दरीम् ॥
पङ्कजं दक्षिणे हस्ते श्रीफलं वामहस्तके ।
पद्ममध्ये स्थितां देवीं हस्तिद्वयद्विपार्श्वकाम् ॥
ऊर्ध्वे हस्तिघटोपेतः अभिषेकस्रवः स्मृतः ।
श्वेतहस्तिसमायुक्तां श्रीदेवीं सम्प्रपूजयेत् ॥

ओं ह्लीं सोममण्डलाधिपत्यै महालक्ष्म्यै नमः ।

कर्णिकाग्रवृत्ते–ओं ह्लीं अग्निमण्डलाय नमः ।
ओं ह्लीं अग्निमण्डलाधिपत्यै पार्वत्यै नमः ।

द्विभुजां च द्विनेत्रां च सुस्तनां च सुयौवनाम् ।
शान्तां किंचित्प्रहसितां देवीमाननशोभिताम् ॥
सर्वाभरणसम्युक्तां पार्वतीं सम्प्रपूजयेत् ॥

ओं ह्लीं अग्निमण्डलाधिपत्यै पार्वत्यै नमः ।

कर्णिकामध्ये–ओं ह्लीं शक्तिमण्डलाय नमः ।
ओं ह्लीं शक्तिमण्डलाधिपत्यै ईश्वर्यै नमः ।

उद्यद्दिनकराभासां त्रिणेत्रां च चतुर्भुजाम् ।
जटामकुटखण्डेन्दुमण्डितां धृतचामराम् ॥
वरदाभयहस्तां च शिवासक्तकराम्बुजाम् ।
गोक्षीरधवळां शक्तिं कर्णिकायां यजेद्गुरुः ॥

इति ध्यात्वा, ओं ह्लीं शक्तिमण्डलाधिपत्यै ईश्वर्यै नमः ।

तदुपरि ओं ह्लीं मनोन्मन्यासनाय नमः ।
ओं ह्लीं मनोन्मनीमूर्तये नमः ।

इति मूर्ति तेजोरूपां दण्डाकारां अविभक्तावयवां विभाव्य बिम्बवेष्टने निवेशयेत् ।

अस्यां मूर्तौ मूर्ध-मुख-हृद्-गुह्य-पादादि सर्वाङ्गेषु दण्डभङ्ग्यादि गौरीकलान्यासादिकं विधाय,

दण्डभङ्गिन्यासः

ओं सों ईशानमूर्धाय नमः । ...
ओं सं सद्योजातमूर्तये नमः ।

मुण्डभङ्गिन्यासः

ओं सों ईशानमूर्धाय नमः ऊर्ध्वमूर्ध्नि ...
ओं सों सद्योजातमूर्धाय नमः पश्चिममूर्ध्नि ।

वक्त्रभङ्गिन्यासः

ओं सें ईशानवक्त्राय नमः ऊर्ध्ववक्त्रे —
ओं सें सद्योजातवक्त्राय नमः पश्चिमवक्त्रे ।

कलाभङ्गिन्यासः

ओं सौं शान्त्यतीतकलायै नमः मूर्ध्नि ...
ओं सां निवृत्तिकलायै नमः पादयोः ।

गौरीकलान्यासः

ओं ह्लीं तारायै नमः मूर्ध्नि
,, ,, विद्यायै नमः वक्त्रे
,, ,, मुनिन्यै नमः हृदये
,, ,, श्रद्धायै नमः गळे
,, ,, जरायै नमः वामबाहौ
,, ,, मेधायै नमः दक्षिणबाहौ
,, ,, स्वधायै नमः जठरे
,, ,, स्वस्त्यै नमः नाभौ
,, ,, वर्मिण्यै नमः योनौ
,, ,, पालिन्यै नमः गुह्ये

ओं ह्रौं ज्वालिन्यै नमः वामोरौ
,, ,, तृष्णायै नमः दक्षिणोरौ
,, ,, स्मृत्यै नमः वामजानुनि
,, ,, कामायै नमः दक्षिणजानुनि
,, ,, उन्मन्यै नमः वामजङ्घायां
,, ,, प्रजायै नमः दक्षिणजङ्घायां
,, ,, चिन्तायै नमः पृष्ठे
,, ,, क्रियायै नमः वामपार्श्वे
,, ,, क्षान्त्यै नमः दक्षिणपार्श्वे
,, ,, शान्त्यै नमः वामपादे
,, ,, दान्त्यै नमः दक्षिणपादे
,, ,, दयायै नमः वामहस्ते
,, ,, वाराह्यै नमः दक्षिणहस्ते
,, ,, दूत्यै नमः वामस्तने
,, ,, सद्यायै नमः दक्षिणस्तने

इति गौरीकलान्यासः ॥

क्षित्यादिकुटिलाप्रान्त मन्त्रसिंहासनस्थिताम् ।
इन्द्रनीलमणिप्रख्यां द्वात्रिंशल्लक्षणान्विताम् ॥
पद्मासनस्थितां देवीं एकवक्त्रसरोरुहाम् ।
मनोन्मनीं चतुर्हस्तां दधानां दक्षहस्तयोः ॥
अभयं चाक्षमालां च वामहस्तद्वये तथा ।
कमलं च वरं यद्वा चोरुहस्तं च कुण्डिकाम् ॥
दधतीं वामभागेषु ध्यायेद्देवीं मनोन्मनीम् ॥

अथवा

सिन्दूराभां त्रिणेत्रां अमृतकलधरां शेखरीं रक्तवस्त्रां
पीनोत्तुङ्गप्रवृत्तस्तनभरनमितां यौवनारम्भरूढाम् ।

नानालङ्कारयुक्तां सरसिजनिलयां बीजसंक्रान्तमूर्तिं
देवीं पाशांकुशाढ्यां अभयवरकरां विश्वयोनिं नमामि ॥

ओं ह्रीं सौं मनोन्मनीविद्य'देहाय नमः । इति नादान्तमुच्चार्यं शक्तितत्वान्तव्यापकं सौदामिनीसन्निभं पुष्पाञ्जलिभूतं ध्यात्वा,

ओं सौं नेत्रेभ्यो नमः ।

इति नेत्रेषु विन्यस्य, पुष्पैः अञ्जलिमापूर्यं,

गौरीमिमाय सलिला नितक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।

मूलमन्त्रं मेधादिकलोपेतं प्रचण्डमार्तण्डोपमं पूरकपूर्वं ब्रह्मादि–कारणत्यागक्रमेण द्वादशान्तमुच्चार्य, द्वादशान्तात् पतङ्गपिङ्गाभं ललाटे अवतार्यं, चन्द्रकोटिसदृशं ... तर्जनीभ्यां ईशानेनावकुण्ठ्य, मूलेन धेनु–मुद्रया अमृतीकृत्य " स्वागतं ते महादेवि " इति विज्ञाप्य,

वत्स सुस्वागतमिति देव्योक्तं विभाव्य,

देवि सर्वजगन्मातः यावच्चन्द्रदिवाकरौ ।
तावत् त्वं प्रीतिभावेन बिम्बेऽस्मिन् सन्निधीभव ॥

सुप्रसन्ना भव, वरदा भव, देवि प्रसीद प्रसीद इति–विज्ञाप्य, स्वागतार्घ्यं दत्वा, हृदयादि करान्तस्थानेषु

ओं ह्रां हृदयाय वामिन्यै नमः ।
ओं ह्रीं शिरसे नीलिन्यै नमः ।
ओं ह्रूं शिखायै चक्रिण्यै नमः ।
ओं ह्रैं कवचाय खड्गिन्यै नमः ।
ओं ह्रौं नेत्रेभ्यः पाशाङ्कयै नमः ।
ओं ह्रः अस्त्राय गाम्भिन्यै नमः ।

इति सम्पूज्य, पाद्याचमनार्घ्याणि दत्वा, स्नानाद्युपचारान् विधाय. गन्धपुष्पादिभिरभ्यर्च्य, तद्वाह्ये

ओं ह्रीं पीठशक्त्यासनाय नमः ।
ओं ह्रीं पीठशक्तिमूर्तये नमः ।

ध्यानम्—रक्तवर्णां ज्वलत्केशीं खड्गखेटकधारिणीम् ।
ध्यात्वा पीठेश्वरीं देवीं गन्धपुष्पादिनार्चयेत् ॥

ओं ह्रीं पीठशक्त्यै नमः । आवाहनादिकं विधाय, लयाङ्गमभ्यर्च्य, भोगाङ्गं पूजयेत् ॥

प्रथमावरणे—

मूर्ध्नि देशात् ईशानशक्तिमादाय

ओं सों ईशानमूर्धाय उमायै नमः	इतीशा दळे
ओं सें तत्पुरुषवक्त्राय गौर्यै नमः	इति पूर्व दळे
ओं सुं अघोरहृदयाय गङ्गायै नमः	इति दक्षिणदळे
ओं सिं वामदेवगुह्याय अम्बिकायै नमः	इति उत्तर दळे
ओं सं सद्योजातमूर्तये गणांबिकायै नमः	इति पश्चिम दळे
ओं सौं नेत्रेभ्यः पाशाङ्कुचे नमः	इति ईशानस्योत्तरे
ओं सां हृदयाय वामिन्यै नमः	इति आग्नेयदळे
ओं सीं शिरसे नीलिन्यै नमः	इति नेत्रस्योत्तरे
ओं सूं शिखायै चक्रिण्यै नमः	इति नैरृतदळे
ओं सैं कवचाय खड्गिन्यै नमः	इति वायव्यदळे
ओं सः अस्त्राय गांभिन्यै नमः	इति पूर्वादिचतुर्दळेषु

आवाहनादिकं विधाय पुष्पदामादिभिः अष्टभिः संस्कारैः संस्कृत्य । धेनु-पद्म-मुकुल-मकर-नमस्कारमुद्राः प्रदर्शयेत् ।

द्वितीयावरणे पूर्वादि दिक्षु—

पूर्वे	ओं ह्रीं वामायै नमः
आग्नेय्यां	ओं ह्रीं ज्येष्ठायै नमः
दक्षिणे	ओं ह्रीं रौद्र्यै नमः

निर्ऋतौ ओं ह्रीं काल्यै नमः ।
पश्चिमे ओं ह्रीं कलविकरिण्यै नमः ।
वायौ ओं ह्रीं बलविकरिण्यै नमः ।
उत्तरे ओं ह्रीं बलप्रमथिन्यै नमः ।
ईशाने ओं ह्रीं सर्वभूतदमन्यै नमः ।

तृतीयावरणे—

ओं ह्रीं भद्रिण्यासनाय नमः ।
ओं ह्रीं भद्रिणीमूर्तये नमः ।

ध्यानम्—भद्रिणीमेकवक्त्रां च बद्धकेशीं महोज्ज्वलाम् ।
वरदाभयशूलं च टङ्कं च दधतीं करैः ॥

ओं ह्रीं भद्रिण्यै नमः । आवाहनादिकं विधाय । नैवेद्य-धूप-दीपार्घ्यं दत्वा,

ओं ह्रीं दीप्तादेव्यासनाय नमः ।
ओं ह्रीं दीप्तादेवीमूर्तये नमः ।

ध्यानम्—दंष्ट्राकराळवदनां दीप्तादेवीं चतुर्भजाम् ।
वराभयकरोपेतां शूलटङ्कसमायुताम् ॥

ओं ह्रीं दीप्तादेव्यै नमः । आ...विधाय, नै...धू...दत्वा,

ओं ह्रीं कुन्तिन्यासनाय नमः ।
ओं ह्रीं कुन्तिनीमूर्तये नमः ।

ध्यानम्—हेमाभां कुन्तिनीं देवीं मुक्ताहारैः सुशोभिताम् ।
वरदाभयशूलं च टङ्कश्च दधती करैः ॥

ओं ह्रीं कुन्तिन्यै नमः । आ...विधाय, नै...धू...दत्वा,

ओं ह्रीं कालिन्यासनाय नमः ।
ओं ह्रीं कालिनीमूर्तये नमः ।

ध्यानम्—काळिनीं कृष्णवर्णाभां कराळवदनान्विताम् ।
बिभ्रतीं टङ्कशूलं च वरदं अभयं तथा ॥

ओं ह्रीं कालिन्यै नमः । आ...विधाय, नै धू...दत्वा,

ओं ह्रीं मन्त्रिण्यासनाय नमः ।
ओं ह्रीं मन्त्रिणीमूर्तये नमः ।

ध्यानम्—चतुर्भुजां मन्त्रिणीं च सर्वावयवशोभिताम् ।
टङ्कं वामे च वरदं शूलाभयं च दक्षिणे ॥

ओं ह्रीं मन्त्रिण्यै नमः । आ...विधाय, नै धू दत्वा,

ओं ह्रीं मालिन्यासनाय नमः ।
ओं ह्रीं मालिनीमूर्तये नमः ।

ध्यानम्—मालिनीं च महाशक्तिं दिव्यकान्तिसमायुताम् ।
वरदाभयशूलं च टङ्कं च दधतीं क्रमात् ॥

ओं ह्रीं मालिन्यै नमः । आ...विधाय, नै...धू...दत्वा,

ओं ह्रीं उन्मदासनाय नमः ।
ओं ह्रीं उन्मदामूर्तये नमः ।

ध्यानम्—चन्द्रबिंबाभवदनां उन्मदां च चतुर्भुजाम् ।
शूलटङ्कसमायुक्तां वरदामभयप्रदाम् ॥

ओं ह्रीं उन्मदायै नमः । आ...विधाय, नै...धू...दत्वा,

ओं ह्रीं मुनिन्यासनाय नमः ।
ओं ह्रीं मुनिनीमूर्तये नमः ।

ध्यानम्—मुनिनीमरुणाभां च दंष्ट्राळवदनान्विताम् ।
शूलं वामे च वरदं टङ्कं चाभयमन्यके ॥

ओं ह्रीं मुनिन्यै नमः । आ...विधाय, नै धू...दत्वा,

चतुर्थावरणे—

ओं ह्रीं शचीदेव्यासनाय नमः ।
ओं ह्रीं शचीदेवीमूर्तये नमः ।

ध्यानम्—हेमवर्णां शचीदेवीं चापपुस्तकधारिणीम् ।
कृताञ्जलिं शुकारूढां एवमावाहयेद्बुधः ॥

ओं ह्रीं शचीदेव्यै नमः । आ...विधाय, नै...धू...दत्वा,

ओं ह्रीं स्वाहादेव्यासनाय नमः ।
ओं ह्रीं स्वाहादेवीमूर्तये नमः ।

ध्यानम्—स्वाहां च रक्तवर्णाभां अजारूढां सुयौवनाम् ।
स्रुक् स्रुवौ धारयन्तीं तां करण्डमकुटान्विताम् ॥

ओं ह्रीं स्वाहादेव्यै नमः । आ...दत्वा,

ओं ह्रीं स्वर्गादेव्यासनाय नमः ।
ओं ह्रीं स्वर्गादेवीमूर्तये नमः ।

ध्यानम्—स्वर्गां च महिषारूढां कृष्णवर्णां सुयौवनाम् ।
दधतीं खड्गखेटं च ध्यायेद्दक्षिणदिक्स्थिताम् ॥

ओं ह्रीं स्वर्गादेव्यै नमः । आ...दत्वा,

ओं ह्रीं वर्गादेव्यासनाय नमः ।
ओं ह्रीं वर्गादेवीमूर्तये नमः ।

ध्यानम्—वर्गां च पाण्डुवर्णाभां वाहने गवये स्थिताम् ।
क्रूरदंष्ट्राकराळां च घण्टाहस्तां च शोभिनीम् ॥

ओं ह्रीं वर्गादेव्यै नमः । आ...दत्वा ।

ओं ह्रीं कालकण्ठ्यासनाय नमः ।
ओं ह्रीं कालकण्ठीमूर्तये नमः ।

ध्यानम्—कङ्कालरूपां शुक्लाभां इक्षुचापधरान्विताम् ।
नक्रारूढां कालकण्ठीं ध्यायेत् पश्चिमदिक् स्थिताम् ॥

ओं ह्रीं कालकण्ठ्यै नमः । आ...दत्वा,

ओं ह्रीं निर्मिण्यासनाय नमः ।
ओं ह्रीं निर्मिणीमूर्तये नमः ।

ध्यानम्—निर्मिणीं कुङ्कुमाभां च मृगारूढां सुयौवनाम् ।
कुन्तलद्वयसंयुक्तां ध्यायेद्देवीं वराननाम् ॥

ओं ह्रीं निर्मिण्यै नमः । आ...दत्वा,

ओं ह्रीं नारिण्यासनाय नमः ।
ओं ह्रीं नारिणीमूर्तये नमः ।

ध्यानम्—सिंहारूढां नारिणीं च कनकाभरणोज्ज्वलाम् ।
दधतीं पुष्पबाणां च नानागन्धैरलंकृताम् ॥

ओं ह्रीं नारिण्यै नमः । आ...दत्वा ।

ओं ह्रीं सुसुकेतिन्यासनाय नमः ।
ओं ह्रीं सुसुकेतिनीमूर्तये नमः ।

ध्यानम्—श्वेतवर्णां महाबालां श्वेताङ्गीं वामनस्थिताम् ।
शूलाभयकरोपेतां भजेच्च सुसुकेतिनीम् ॥

ओं ह्रीं सुसुकेतिन्यै नमः । आ...दत्वा,

ओं ह्रीं सरस्वत्यासनाय नमः ।
ओं ह्रीं सरस्वतीमूर्तये नमः ।

ध्यानम्—हंसारूढां शोभनाङ्गीं हस्ते पुस्तकसंयुताम् ।
विमलां देवसंयुक्तां विधिपत्नीं यजेत् क्रमात् ॥

ओं ह्रीं सरस्वत्यै नमः । आ...दत्वा,

ओं ह्रीं महालक्ष्म्यासनाय नमः ।

ओं ह्रीं महालक्ष्मीमूर्तये नमः ।

ध्यानम्—पद्मासनां पद्महस्तां किरीटमकुटान्विताम् ।

वासुकीवाहनोपेतां लक्ष्मीं वन्दे सुखप्रदाम् ॥

ओं ह्रीं महालक्ष्म्यै नमः । आ ... दत्वा,

पञ्चमावरणे तद्बहिः पूर्वादीशानान्तं

ओं ह्रीं खड्गाय हुं फण्णमः	ओं ह्रीं ध्वजाय हुं फण्णमः
,, ,, कपालाय ,, ,,	,, ,, वेताळाय ,, ,,
,, ,, घण्टायै ,, ,,	,, ,, क्षुरिकायै ,, ,,
,, ,, नाराचाय ,, ,,	,, ,, पाशाय ,, ,,
,, ,, डमरुकाय ,, ,,	,, ,, वज्राय ,, ,,

नैवेद्यादिकं दत्वा, मूलमन्त्रं यथाशक्ति जप्त्वा, देव्याः वरदहस्ते निवेदयेत् । आचार्यः स्थालिकामादाय,

सांग्रहण्ये ... समृध्यै । इत्युच्चार्य, गौरीमिमाय...परमेव्योमन्

देवी सर्वजगन्मातः ईश्वरप्रियवल्लभे ।

महोत्सवस्य कार्यार्थं अनुज्ञां देहि मे शिवे ॥

देवि गौरि जगन्मातः ईश्वरप्रियकारिणी ।

कर्मारम्भसमाप्त्यर्थं अनुज्ञां देहि मे शिवे ॥

इति त्रिवारं प्रार्थयेत् । स्थालिकां परिचारकमूर्ध्नि निधाय, स्वस्तिमङ्गलवाचकैः सह विघ्नेश्वरालयं गत्वा, अनुज्ञां कुर्यात् ।

(पाठान्तरं) तृतीयावरणे पूर्वादिः—

ओं ह्रीं अम्बिकायै नमः	ओं ह्रीं गौर्यै नमः	ओं ह्रीं मनोन्मन्यै नमः
,, ,, गणाम्बिकायै ,,	,, ,, उमायै ,,	,, ,, धारिकायै ,,
,, ,, गङ्गायै ,,	,, ,, ईश्वर्यै ,,	

चतुर्थावरणे —

ओं ह्रीं ब्राह्म्यै नमः	ओं ह्रीं वैष्णव्यै नमः	ओं ह्रीं चामुण्डायै नमः
,, ,, माहेश्वर्यै ,,	,, ,, वाराह्यै ,,	,, ,, दुर्गायै ,,
,, ,, कौमार्यै ,,	,, ,, माहेन्द्र्यै ,,	

ईशानदक्षिणे-ओं ह्रीं सरस्वत्यै नमः नैरृत्युत्तरे ओं ह्रीं महालक्ष्म्यै नमः।

८ विघ्नेश्वरानुज्ञा

अथ विघ्नेश्वरालयं गोमयेनोपलिप्य, वितानध्वजतोरणपूगकदलीस्तम्भ-रङ्गवल्ल्यादिभिः अलंकृत्य, अथ आचार्यः अस्त्रदेवसहितः गणेशालयं गत्वा, विघ्नेश्वरस्य पुरोभागे पीठस्योपरि गणेशस्य अभिमुख अस्त्रदेवं संस्थाप्य, तदग्रे अनुज्ञापात्रं निधाय, आचार्यः उत्तराभिमुखो रुचिरासने स्थित्वा सकलीकृत्य,

अस्य देवदेवस्य महादेवस्य अम्बिकासमेतपरमेश्वरस्य अष्टाविंशत्यागमोक्तप्रकारेण मया करिष्यमाणमहोत्सवकर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वरानुज्ञां करिष्ये, इति सङ्कल्प्य, स्वस्तिवाचकैः सह पुण्याहप्रोक्षणं कृत्वा, स्वस्वरूपं गणेश इति विभाव्य, अर्घ्यादीन् विधिवत् कृत्वा, पञ्चगव्यपञ्चामृतस्नपनपूजाहोमादिकं च कृत्वा,

द्वारम् अस्त्रेण सम्प्रोक्ष्य

दक्षिणे ओं गां गणपतये नमः । उत्तरे ह्रीं सरस्वत्यै नमः । मध्ये ओं ह्रीं महालक्ष्म्यै नमः । दक्षिणे ओं गां भुवङ्गाय नमः । उत्तरे ओं गां पतङ्गाय नमः । दक्षिणोत्तरे ओं गां कूश्माण्डगणद्वारपालाय नमः । अग्रे ओं गां महासुरमूषिकाय नमः इति अभ्यर्च्य, नैवेद्यधूपदीपार्घ्यं दत्वा अन्तः प्रविश्य, नैरृत्यादीशानान्तं ओं गां वास्तवधिपतये ब्रह्मणे नमः । वारुणे ओं गां गणपतये नमः । वायव्ये ओं ह्रीं सरस्वत्यै नमः । उत्तरे ओं ह्रीं महालक्ष्म्यै नमः । गोमुखे ओं गां समृद्धये नमः । ओं गां विजयाय नमः । चिन्तामणिपीठे ओं गां पद्मासनाय नमः । इत्यभ्यर्च्य,

ओं गां आधारशक्तये नमः ।	तदुपरि पूर्वादि-चतुर्दिक्षु,
ओं गां अनन्ताय नमः ।	ओं गां शङ्खपालाय नमः ।
ओं गां वासुकये नमः ।	ओं गां गुलिकाय नमः ।
ओं गां तक्षकाय नमः ।	ओं गां पद्माय नमः ।
ओं गां कार्कोटकाय नमः ।	

ओं गां महापद्माय नमः   ओं गां अनन्तासनाय नमः

तदुपरि आग्नेयादिकोणेषु,

ओं गां धर्माय नमः   ओं गां ज्ञानाय नमः
ओं गां वैराग्याय नमः   ओं गां ऐश्वर्याय नमः

पूर्वादिदिक्षु

ओं गां अधर्माय नमः । ओं गां अज्ञानाय नमः ।
ओं गां अवैराग्याय नमः । ओं गां अनैश्वर्याय नमः ।
दक्षिणोत्तरमध्ये—दक्षिणे ओं गां राजसाय नमः ।
उत्तरे—ओं गां तामसाय नमः । मध्ये- ओं गां सात्विकाय नमः
ओं गां सिंहासनाय नमः ।

तदुपरि आग्नेयादिकोणेषु,

ओं गां कृतयुगाय नमः । ओं गां त्रेतायुगाय नमः ।
ओं गां द्वापरयुगाय नमः । ओं गां कलियुगाय नमः ।

पूर्वादिदिक्षु,

ओं गां अव्यक्ताय नमः । ओं गां नियतये नमः ।
ओं गां कालाय नमः । ओं गां कलायै नमः ।

नैर्ऋतईशानकोणयोः,

ओं गां अधश्छदनाय नमः । ओं गां ऊर्ध्वच्छदनाय नमः ।
तन्मध्ये ओं गां योगासनाय नमः । तदुपरि,

ओं गां कन्दाय नमः   ओं गां दळेभ्यो नमः
ओं गां बीजाय नमः   ओं गां केसरेभ्यो नमः
ओं गां अङ्कुराय नमः   ओं गां कर्णिकायै नमः
ओं गां नालाय नमः   ओं गां बीजेभ्यो नमः
ओं गां कण्टकेभ्यो नमः

पूर्वादिदळमूलेषु,

ओं गां तीव्रायै नमः	ओं गां कामरूपिण्यै नमः
,, ,, ज्वालिन्यै नमः	,, ,, उग्रायै नमः
,, ,, नन्दायै नमः	,, ,, तेजोवत्यै नमः
,, ,, भोगदायै नमः	,, ,, सत्यायै नमः

कर्णिका मध्ये—ओं ह्रीं विघ्नविनाशिन्यै नमः ।
ओं गां पद्माय नमः । तदुपरि ओं गां विमलासनाय नमः
दळाग्रवृत्ते-ओं गां सूर्यमण्डलाय नमः
ओं गां सूर्यमण्डलाधिपतये ब्रह्मणे नमः
केसराग्रवृत्ते—ओं गां सोममण्डलाय नमः
ओं गां सोममण्डलाधिपतये विष्णवे नमः
कर्णिका मध्ये—ओं गां अग्निमण्डलाय नमः
ओं गां अग्निमण्डलाधिपतये रुद्राय नमः
ओं गां शक्तिमण्डलाय नमः
ओं गां शक्तिमण्डलाधिपतये प्रकृत्यै नमः

क्षित्यादि प्रकृतिः प्रोक्तं तत्त्वरूपं स्थिरासनम् ।
गणपत्यासनं दिव्यं तस्योपरि यजेद्बुधः ॥

ओं गां गणपत्यासनाय नमः । ओं गां गणपतिमूर्तये नमः

इति मूर्तिं तेजोरूपां बिम्बाकाराम् अविभक्तावयवां सदाशिव-तत्त्वात्मिकां परबिन्दुव्याप्तिकां विभाव्य, बिम्बवेष्टने निवेशयेत् शिरो-वदन-गुह्य-जानुपादादिषु न्यासं कुर्यात् ।

गणपतिगायत्री न्यासः

ओं गं तत्पुरुषाय नमः मुखे	ओं गं तन्नो नमः ऊर्वोः
ओं गं विद्महे नमः कर्णयोः	ओं गं दन्तिः नमः जान्वोः
ओं गं वक्रतुण्डाय नमः हृदये	ओं गं प्रचोदयात् नमः पादयोः
ओं गं धीमहि नमः नाभौ	

गणपति-सप्तदश-मन्त्रन्यासः

ओं गं गणानां नमः शिरसि
ओं गं त्वा नमः मुखे
ओं गं गणपतिं नमः कण्ठे
ओं गं हवामहे नमः हृदये
ओं गं कविं नमः दक्षिणांसे
ओं गं कवीनां नमः वामांसे
ओं गं उपमश्रवस्तमं नमः नाभौ
ओं गं ज्येष्ठराजं नमः पृष्ठे
ओं गं ब्रह्मणां नमः गुह्ये
ओं गं ब्रह्मणो नमः दक्षिणोरौ
ओं गं पते नमः वामोरौ
ओं गं आं नमः दक्षिणजानुनि
ओं गं नो नमः वामजानुनि
ओं गं शृण्वन्नमः दक्षिणजङ्घायां
ओं गं ऊतिभिर्नमः वामजङ्घायां
ओं गं सीद नमः दक्षिणपादे
ओं गं सादनं नमः वामपादे

गणपतिमूलमन्त्रन्यासः

ओं ओं नमः मूर्ध्नि
ओं श्रीं नमः ललाटे
ओं ह्रीं नमः भ्रूमध्ये
ओं क्लीं नमः आस्ये
ओं ग्लौं नमः चुबुके
ओं गं नमः गळे
ओं गणपतये नमः उरसि
ओं वरवरदाय नमः हृदये
ओं सर्वजनं मे नमः नाभौ
ओं वशमानय स्वाहा जठरे

इति विन्यस्य ध्यानं कुर्यात ॥

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थितम् ।
सहस्रदलपद्मस्थकर्णिकामध्यवासिनम् ॥

रक्ताङ्गं भस्मलिप्ताङ्गं त्रिणेत्रं मकुटान्वितम् ।
पाशाङ्कुशधरं देवं नागयज्ञोपवीतिनम् ॥

दन्तं च मोदकं चैव तुण्डहस्तेन धारिणम् ।
लम्बोदरं बृहत्कायं ध्यात्वा मन्त्रेण पूजयेत् ॥

ओं ग्लां ग्लौं विद्यादेहाय नमः । ओं ग्लौं नेत्रेभ्यो नमः ।

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिः सीद सादनम् ।।

ओं ग्लां ग्लौं गं गणपतये नमः इत्यावाह्य, आवाहन-स्थापन-सन्निधान-सन्निरोधन-दिग्बन्धन-अवकुण्ठन-पाश-अंकुश-त्रिखण्ड-नमस्कार-मुद्राः प्रदर्श्य, पाद्याचमनार्घ्याणि दत्वा,

ओं ह्रीं पीठशक्त्यासनाय नमः । ओं ह्रीं पीठशक्तिमूर्तये नमः ।
ध्यानम्—

श्यामवर्णां द्विनेत्रां च करण्डमकुटान्विताम् ।
उत्पलं दक्षिणे हस्ते वामे लम्बकरान्विताम् ।।

इति सम्पूज्य, नैवेद्यधूपदीपार्घ्याणि दत्वा, इति लयाङ्गमभ्यर्च्य, निर्माल्यं विसृज्य, तैल-पञ्चामृतैः अभिषिच्य, वस्त्रगन्धपुष्पादिभिः अलङ्कृत्य, भोगाङ्गं सम्पूज्य,

प्रथमावरणे—

ओं गों ईशानमूर्धाय नमः । ओं गें तत्पुरुषवक्त्राय नमः । ओं गुं अघोरहृदयाय नमः । ओं गिं वामदेवगुह्याय नमः । ओं गं सद्योजातमूर्तये नमः । ओं गां हृदयाय नमः । ओं गीं शिरसे स्वाहा । ओं गूं शिखायै वषट् । ओं गैं कवचाय हुं । ओं गौं नेत्रत्रयाय वौषट् । ओं गः अस्त्राय फट् ।।

द्वितीयावरणे पूर्वादिदिक्षु

ओं गं वरदाय नमः । ओं गं वीराय नमः । ओं गं विघ्नेशाय नमः । ओं गं गजाननाय नमः । ओं गं भक्ष्यप्रियाय नमः । ओं गं गजकर्णकाय नमः । ओं गं विनायकाय नमः । ओं गं लम्बोदराय नमः ।।

तृतीयावरणे—

ओं गं सुप्रभूताय नमः । ओं गं सुवक्त्राय नमः । ओं गं वामनाय नमः । ओं गं शङ्खपालाय नमः । ओं गं मूषिकाय नमः । ओं गं

गिरितुण्डाय नमः । ओं गं उग्राय नमः । ओं गं कुम्भचण्डाय नमः ।

चतुर्थावरणे—

ओं गं इन्द्राय नमः । ओं गं अग्नये नमः । ओं गं यमाय नमः । ओं गं निर्ऋतये नमः । ओं गं वरुणाय नमः । ओं गं वायवे नमः । ओं गं कुवेराय नमः । ओं गं ईशानाय नमः । ईशानदक्षिणे ओं ग ब्रह्मणे नमः । नर्ऋत्युत्तरे ओं गं विष्णवे नमः ॥

पञ्चमावरणे

ओं गं नाराचाय नमः । ओं गं त्रिशूलाय नमः । ओं गं कुन्दालिने नमः । ओं गं वेतालाय नमः । ओं गं पाशाय नमः । ओं गं अंकुशाय नमः । ओं गं दण्डाय नमः । ओं गं कुठाराय नमः । ओं गं मुसलाय नमः । ओं गं खड्गाय नमः ।

इति सम्पूज्य, एतेषां नमस्कारमुद्रां दर्शयित्वा,

चित्रान्न – लड्डुक – अपूप – नालिकेर – फल–ताम्बूलादीनि निवेद्य, धूप–दीपौ दत्वा, स्थालिकां संगृह्य, प्रार्थ्य,

गणानां त्वा...सीदसादनम् ।

सर्वदेवाग्रज श्रेष्ठ विघ्नेश गणनायक ।
त्वामुपास्य च यत्कर्म तत्कर्म सफलं कुरु ॥

गौरीपुत्र गणाध्यक्ष सर्वविघ्ननिवारक ।
अस्मिन् कर्मणि सर्वस्मिन् निर्विघ्नं कुरु सिद्धये ॥

त्र्यम्बकमन्त्रेण नालिकेरं संगृह्य, सन्ताड्य,

गजानन सुरश्रेष्ठ शिवपुत्र नमोऽस्तु ते ।
नालिकेरं प्रताड्येऽहं निर्विघ्नाय प्रसीद मे ॥

विघ्नराज गणेशान शिवपुत्र गजानन ।
नालिकेरं प्रताड्येऽहं विघ्नानामपहारक ॥

इति प्रार्थ्य, ब्रह्मचारिभ्यः दक्षिणा–ताम्बूल–लड्डुकापूपादिकं दत्वा,
आचार्यः स्वमस्तके पञ्चवारकुट्टनं कृत्वा,

क्षेत्रप्रदक्षिणं कृत्वा अस्त्रराजसमन्वितम् ।
धामप्रदक्षिणं कृत्वा आस्थानमण्टपं व्रजेत् ॥
सर्वेषां चैव ताम्बूलं गन्धपुष्पैस्समन्वितम् ।
दक्षिणां च यथाशक्ति दद्यात् कर्मप्रवृत्तये ॥

---

९. सुब्रह्मण्य–अनुज्ञा

आचार्यः साधकैः सार्धं स्कन्दालयं प्रविश्य, स्कन्दस्य पुरोभागे रुचिरासने स्थित्वा, प्राणायामत्रयं कृत्वा, पुण्याह वाचयित्वा, सर्वाणि द्रव्याणि सम्प्रोक्ष्य, भूतशोधनं विधाय, अर्घ्यादीन् विधिवत्कृत्वा, पञ्च-गव्य-पञ्चामृत-स्नपन-पूजा-होमादिकं च कृत्वा, अर्घ्यजलेन द्वारम् अस्त्रेण सम्प्रोक्ष्य,

दक्षिणे–ओं गं गणपतये नमः
उत्तरे–ओं ह्रीं सरस्वत्यै नमः
मध्ये–ओं ह्रीं महालक्ष्म्यै नमः
दक्षिणे–ओं सां सुदेहाय नमः
उत्तरे–ओं सां सुमुखाय नमः
दक्षिणशाखायां–ओं सां दीप्तायै नमः
उत्तरशाखायां–ओं सां सूक्ष्मायै नमः
अधोदुम्बरे–ओं ह्रीं पृथिव्यै नमः
कवाटयोः–ओं सां जयायै नमः
ओं सां विजयाय नमः

इति सम्पूज्य,

सर्वेषां नैवेद्यधूपदीपार्घ्याणि दत्वा, अन्तः प्रविश्य, गुहसमीपं गत्वा,
विशेषार्घ्यं सम्स्थाप्य, विशेषार्घ्यजलेन सम्प्रोक्ष्य,

ओं सां आधारशक्तये नमः

अधःकूर्मशिलासीनां क्षीरोदसितविग्रहाम् ।
मौलौ बीजांकुराकारां वरदामभयप्रदाम् ॥
पाशांकुशधरां शक्तिं क्रियामाधाररूपिणीम् ॥

ओं सां आधारशक्त्यै नमः ।

तदुपरि पूर्वादिदिक्षु—

ओं सां अनन्ताय नमः । ओं सां तक्षकाय नमः ।
ओं सां वासुकये नमः । ओं सां कार्कोटकाय नमः ।

आग्नेयादिकोणेषु—

ओं सां शङ्खपालाय नमः । ओं सां पद्माय नमः ।
ओं सां गुलिकाय नमः । ओं सां महापद्माय नमः ।

मध्ये—ओं सां अनन्तासनाय नमः ।

पृथ्वीकन्दं कलान्तैकनालकं भावकण्टकम् ।
क्षुब्धमायामहापद्मं अनेकदलसंकुलम् ॥

अनन्तं नीलसङ्काशं सहस्रफणिमण्डितम् ।
हृदयेऽञ्जलिसम्युक्तं एकवक्त्रं चतुर्भुजम् ॥

ओं सां अनन्ताय नमः इत्यनन्तासनम् ।

तदुपरि सिंहासनम्

आग्नेयादिकोणेषु—अनन्तसामर्थ्यरूपान्,

विचित्रकेसरिप्रख्यान् अन्योन्यं पृष्ठदर्शिनः ।
कृतत्रेतादिरूपेण गुहस्यासनपादुकान् ॥

सितकाश्मीरतालालीन् चारुसिंहाकृतीन् स्मरेत् ।
आग्नेयादीशपर्यन्तं कोणेषु च यथाक्रमम् ॥

ओं सां धर्माय नमः । ओं सां वैराग्याय नमः ।
ओं सां ज्ञानाय नमः । ओं सां ऐश्वर्याय नमः ।

इत्यभ्यर्च्य—

पूर्वादि चतुर्दिक्षु—

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ॥

गात्रकान् स्फटिकप्रख्यान् त्र्यक्षान् सिंहशिरोधृतान् ।
स्तब्धबाहुशिरोग्रीवान् पादुकासक्तमस्तकान् ।
ध्यायन् बुद्धिगुणाधर्ममुखाधिष्ठातृकान् यजेत् ॥

ओं सां अधर्माय नमः ओं सां अवैराग्याय नमः
ओं सां अज्ञानाय नमः ओं सां अनैश्वर्याय नमः
दक्षिणे– ओं सां राजसाय नमः, उत्तरे ओं सां तामसाय नमः
मध्ये —ओं सां सात्त्विकाय नमः
ओं सां सिंहासनाय नमः इति सिंहासनम् ।

तदुपरि योगासनम्

आग्नेयादिकोणेषु—

कृताख्यं श्वेतवर्णन्तु त्रेताख्यं रक्तवर्णकम् ।
द्वापरं कृष्णवर्णन्तु कलिं स्यात् पीतमुच्यते ॥

ओं सां कृतयुगाय नमः ओं सां द्वापरयुगाय नमः
ओं सां त्रेतायुगाय नमः ओं सां कलियुगाय नमः

पूर्वादिचतुर्दिक्षु—

ओं सां अव्यक्ताय नमः ओं सां कालाय नमः
ओं सां नियतये नमः ओं सां कलायै नमः
मध्ये—ओं सां केशवाय नमः

पीठस्योर्ध्वमेखलायाम् — अधोभागे रक्तवर्णं अधश्छदनं क्षुब्धमायान्तं विभाव्य,

नैर्ऋते—ओं साम् अधश्छदनाय नमः
तदूर्ध्वे—पाण्डुरवर्णं ऊर्ध्वच्छदनं शुद्धविद्याधोभागान्तम्
ईशाने—ओं साम् ऊर्ध्वच्छदनाय नमः
मध्ये—ओं सां योगासनाय नमः । इति योगासनम् ।

तदुपरि पद्मासनम्

माणिक्कसदृशं कन्दं नालं नीलसमप्रभम् ।
अंकुरं तु प्रवालाभं दलं रजतसन्निभम् ॥
केसरं हेमवर्णाभं अग्रे मुक्तावलीयुतम् ।

ओं सां कन्दाय नमः ओं सां नालाय नमः
ओं सां बीजाय नमः ओं सां कण्टकेभ्यो नमः
ओं सां अंकुराय नमः ओं सां दलेभ्यो नमः

तन्मूलपीठोपरि—ओं सां केसरेभ्यो नमः

पीठोन्नतभागमध्ये—

तप्तचामीकरच्छायां पञ्चाशद्बीजगर्भिताम् ।
केसराणां चतुःषष्ट्या कर्णिकां पूजयेत्ततः ॥

ओं सां कर्णिकायै नमः ओं सां बीजेभ्यो नमः

इत्येवं समुदितरूपं पद्मं विभाव्य,

ओं सां पद्माय नमः । इति पद्मासनम् ।

विमलासनम्

पूर्वादी शान्तकेसरेषु—

ओं सां शकुन्यै नमः ओं सां निशीथिन्यै नमः
ओं सां रेवत्यै नमः ओं सां मालिन्यै नमः
ओं सां पूतनायै नमः ओं सां श्यामलायै नमः
ओं सां महापूतनायै नमः ओं सां बुद्ध्यै नमः

कर्णिकायामीशाने—

ओं सां विश्वतोमुख्यै नमः

दलाग्रवृत्ते—

ओं सां सूर्यमण्डलाय नमः
ओं सां सूर्यमण्डलाधिपतये ब्रह्मणे नमः

ध्यानम्—ब्रह्मा चतुर्मुखः पीतश्चतुर्दोर्दण्डमण्डितः ।
स्रुग्दण्डाक्षकुशोपेतः सूर्यमण्डलमध्यगः ॥ इति ध्यात्वा

केसराग्रवृत्ते—

ओं सां सोममण्डलाय नमः

सोममण्डलाधिपतये विष्णवे नमः

ध्यानम्—विष्णुश्चतुर्भुजो मौली शङ्खचक्रगदाब्जधृक् ।
नीलाम्बुदप्रतीकाशः सोममण्डलमध्यगः ॥
इति ध्यात्वा

कर्णिकाग्रवृत्ते—

ओं सां अग्निमण्डलाय नमः

ओं सां अग्निमण्डलाधिपतये रुद्राय नमः

ध्यानम्—अग्निमध्ये स्थितं रुद्रं नीलकण्ठं त्रिलोचनम् ।
व्याख्यामुद्रानलज्ञानशूलहस्तं चतुर्भुजम् ॥
सर्वालङ्कारसम्युक्तं नागयज्ञोपवीतिनम् । इति ध्यात्वा

कर्णिकामध्ये—

ओं सां शक्तिमण्डलाय नमः

ओं सां शक्तिमण्डलाधिपतये ईश्वराय नमः

ध्यानम्—शक्तेश्च मण्डलासीनं व्यालयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम् ॥

खड्गत्रिशूलवाणाक्षमालाभयकरान्वितम् ।
कमण्डलुधरं देवं वराम्बुरुहधारिणम् ॥
दक्षवामक्रमात्सिहगजचर्मपरिच्छदम् ।

मध्ये—ओं सां विमलासनाय नमः इति विमलासनं सम्पूज्य, इति पश्चासनानि अभ्यर्च्य,

ओं सां सुब्रह्मण्यासनाय नमः

ओं सां सुब्रह्मण्यमूर्तये नमः

इति द्वादशान्तमुच्चार्य, मूर्तिं सम्पूज्य, अस्यां मूर्तौ मूर्ध–मुख–हृद्गुह्य–पादादिषु दण्डभङ्ग्यादिकं विन्यस्य

अथ दण्डभङ्गिन्यासः

ओं सों ईशानमूर्धाय जगद्भुवे नमः मूर्ध्नि
ओं सें तत्पुरुषवक्त्राय वचद्भुवे नमः वक्त्रे
ओं सुम् अघोरहृदयाय विश्वभुवे नमः हृदये
ओं सिं वामदेवगुह्याय रुद्रभुवे नमः गुह्ये
ओं सं सद्योजातमूर्तये ब्रह्मभुवे नमः दक्षिणपादे
ओं सों सें सुं सिं सं सर्ववक्त्र भुवद्भुवे नमः वामपादे
इति दण्डभङ्गिन्यासः

अथ मुण्डभङ्गिन्यासः

ओं सों ईशानजगद्भुवे नमः ईशानमूर्ध्नि
ओं सों तत्पुरुषवचद्भवे नमः पूर्वमूर्ध्नि
ओं सों अघोरविश्वभुवे नमः दक्षिणमूर्ध्नि
ओं सों वामदेवरुद्रभुवे नमः उत्तरमूर्ध्नि
ओं सों सद्योजातब्रह्मभुवे नमः पश्चिममूर्ध्नि
ओं सों सें सुं सिं सं सर्ववक्त्रभुवद्भुवे नमः नैरृतमूर्ध्नि
इति मुण्डभङ्गिन्यासः

अथ वक्त्रभङ्गिन्यासः

ओं सें ईशानजगद्भुवे नमः ईशानवक्त्रे
ओं सें तत्पुरुषवचद्भवे नमः पूर्ववक्त्रे
ओं सें अघोरविश्वभुवे नमः दक्षिणवक्त्रे
ओं सें वामदेवरुद्रभुवे नमः उत्तरवक्त्रे
ओं सें सद्योजातब्रह्मभुवे नमः पश्चिमवक्त्रे
ओं सों सें सुं सिं सं सर्ववक्त्रभवद्भुवे नमः नैरृतवक्त्रे
इति वक्त्रभङ्गिन्यासः

अथ कलाभङ्गिन्यासः

ओं सौं शान्त्यतीतकलायै नमः मूर्ध्नि
ओं सैं शान्तिकलायै नमः वक्त्रे
ओं सूं विद्याकलायै नमः हृदये
ओं सीं प्रतिष्ठाकलायै नमः नाभौ
ओं सां निवृत्तिकलायै नमः पादयोः

इति कलाभङ्गिन्यासः

अथ एकत्रिंशत्कलान्यासः

ओं सों जगद्भुवं जयायै नमः ईशानमूर्ध्नि
ओं सों बहुतो बलायै नमः पूर्वमूर्ध्नि
ओं सों हुतमुन्नतायै नमः. दक्षिणमूर्ध्नि
ओं सों वचद्भुवे वामायै नमः उत्तरमूर्ध्नि
ओं सों नमस्ते अस्तु नन्दिन्यै नमः पश्चिममूर्ध्नि
ओं सों विश्वभुवे विजयायै नमः नैर्ऋतमूर्ध्नि

इति प्रथमकलाषट्कम् ॥

ओं सें जगद्भुवोऽधिपतिः जरायै नमः ईशानवक्त्रे
ओं सें सेनानीः सेनान्यै नमः पूर्ववक्त्रे
ओं सें मयूरप्रियाय मायायै नमः दक्षिणवक्त्रे
ओं सें षडाननः शान्त्यै नमः उत्तरवक्त्रे
ओं सें सत्त्वायाहं नमस्तेऽस्तु सत्यायै नमः पश्चिमवक्त्रे
ओं सें सुखं वहस्सूक्ष्मायै नमः नैर्ऋतवक्त्रे

इति द्वितीयाष्टकम् ॥

ओं सुं सुब्रह्मण्याय सुमत्यै नमः हृदये
ओं सुं बृहस्पतेः सुतां प्रज्ञायै नमः गले
ओं सुं अस्य पद्मयोनये अमृतायै नमः दक्षिणबाहौ
ओं सुं अस्यात्मने यशसे नमः वामबाहौ
ओं सुं वहने वहन्तु वरिष्ठायै नमः नाभौ

इति तृतीयकलापञ्चकम्

ओं सिं सुब्रह्मण्य सुप्रतिष्ठायै नमः कुक्षौ,
ओं सिं रुद्रभुवे रुचायै नमः पृष्ठे
ओं सिं ब्रह्मभुवे ब्राह्म्यै नमः उरसि
ओं सिं भुवद्भुवे भूत्यै नमः गुह्ये
ओं सिं अभूताय मान्यायै नमः लिंगे

इति चतुर्थकलापञ्चकम्

ओं सं जगद्भुवे जीवायै नमः दक्षिणोरौ
ओं सं सुब्रह्मण्य शुद्धायै नमः वामोरौ
ओं सं कृत्तिकासुतकृपायै नमः दक्षिणजानुनि
ओं सं षष्टाङ्गसत्वरायै नमः वामजानुनि

इति पञ्चमकलाचतुष्कम्

ओं सां जगद्भुवे जगत्यै नमः दक्षिणजङ्घायाम्
ओं सां वचद्भुवे वरदायै नमः वामजङ्घायाम्
ओं सां स्कन्द विशाखिने कामदायै नमः दक्षिणपादे
ओं सां हव्यं यस्माद् हरिण्यै नमः वामपादे
ओं सां षण्मुखाय श्यामायै नमः व्यापकाञ्जलिः ।

इति षष्ठकलापञ्चकम्

ध्यानम्—

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिम् ।
देवलोकरिपुघ्नमविघ्नदं युग्मशक्तिसहितं शिखिवाहम् ॥

ओं सां सौं विद्यादेहाय नमः । ओं सौं नेत्रेभ्यो नमः ।

इति सर्वज्ञताबीजं मुखषट्कनेत्रेषु विन्यस्य, पुष्पैः अञ्जलिमापूर्य, मूलमन्त्रं मेधादिकलोपेतं प्रचण्डमार्ताण्डोपमं पूरकपूर्वं ब्रह्मादिकारणत्यागक्रमेण द्वादशान्तमुच्चार्य द्वादशान्तात्पतङ्गपिङ्गाभं ललाटेऽवतार्य, चन्द्रकोटिसदृशं निर्यत्सुधापिण्डपाण्डुरितदिङ्मण्डलं ध्यात्वा, प्राणप्रवाहवर्त्मना विनिर्गत्य, अञ्जलिगतं विचिन्त्य, लक्ष्यमूर्तौ आवाहिन्या सद्योजातेन आवाह्य, स्थापिन्या वामदेवेन पद्मासने संस्थाप्य सन्निधान्या

अघोरेण सन्निधाप्य, निष्ठुरया तत्पुरुषेण निरुध्य, तर्जनीभ्यां ईशानेन अवकुण्ठ्य, निरोधार्घ्यं दत्वा, 'स्वागतं ते षडानन' इति विज्ञाप्य 'वत्स सुस्वागतम्' इति देवनोक्तं विभाव्य,

स्वामिन् सर्वजगन्नाथ यावच्चन्द्रार्कतारकौ ।
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन् सन्निधीभव ॥

इति विज्ञाप्य, हृदयादिमन्त्रान् विन्यस्य हृदयादिकरान्तस्थानेषु,

ओं सां हृदयाय नमः	ओं सैं कवचाय हुम्
ओं सीं शिरसे स्वाहा	ओं सौं नेत्रेभ्यः वौषट्
ओं सूं शिखायै वषट्	ओं सः अस्त्राय फट्

इति विन्यस्य, मूलेन एकत्वं विधाय, अस्त्रेण संरक्ष्य कवचेन अवकुण्ठ्य, मूलेन अमृतमुद्रां दत्वा, वौषडन्तमूलेन महामुद्रया परमीकृत्य, षण्मुखी-मुद्राम् आबध्य, सहृदा नमोन्तमूलेन पादयोः पाद्यं, स्वधान्तमूलेन ईशानादि मुखषट्केषु आचमनं दत्वा, वौषडन्तमूलेन पुष्प-दूर्वाक्षतादि दद्यात् । स्वाहान्तेन शिरःषट्केषु अर्घ्यं, सहृदा स्वाहान्तमूलेन धूप-दीपौ च दत्वा, अभिषेकं कृत्वा, सूक्ष्मवाससा निमृज्य पाद्याचमनार्घ्याणि दत्वा, चन्दनाक्षतदूर्वापुष्पहेमकौपीनमेखलोपवीतविचित्रवस्त्राणि मनसा भक्त्या च निवेद्य, पुष्पाञ्जलित्रयेण

ओं सां सौं आत्मतत्त्वाधिपतये गुहाय नमः
ओं सां सौं विद्यातत्त्वाधिपतये गुहाय नमः
ओं सां सौं शिवतत्त्वाधिपतये गुहाय नमः

इत्यभ्यर्च्य, पुनर्मूलेनाभ्यर्च्य इण्डादिभिः पुष्पदामादिभिरलंकृत्य धूप-दीपाचमनादिकं दत्वा, काम्यानि विज्ञाप्य, आवरणपूजार्थं अध्येष्य,

दक्षिणे—ओं ह्रीं आधारशक्तये नमः	ओं ह्रीं शङ्खपालाय नमः
ओं ह्रीं अनन्ताय नमः	ओं ह्रीं गुलिकाय नमः
ओं ह्रीं वासुकये नमः	ओं ह्रीं पद्माय नमः
ओं ह्रीं तक्षकाय नमः	ओं ह्रीं महापद्माय नमः
ओं ह्रीं कार्कोटकाय नमः	ओं ह्रीं अनन्तासनाय नमः

तदुपरि—ओं ह्रीं धर्माय नमः   ओं ह्रीं अधर्माय नमः
ओं ह्रीं ज्ञानाय नमः   ओं ह्रीं अज्ञानाय नमः
ओं ह्रीं वैराग्याय नमः   ओं ह्रीं अवैराग्याय नमः
ओं ह्रीं ऐश्वर्याय नमः   ओं ह्रीं अनैश्वर्याय नमः

दक्षिणे—ओं ह्रीं राजसाय नमः

उत्तरे —ओं ह्रीं तामसाय नमः

मध्ये —ओं ह्रीं सात्त्विकाय नमः

ओं ह्रीं सिंहासनाय नमः

तदुपरि—ओं ह्रीं कृतयुगाय नमः   ओं ह्रीं नियतये नमः
ओं ह्रीं त्रेतायुगाय नमः   ओं ह्रीं कालाय नमः
ओं ह्रीं द्वापरयुगाय नमः   ओं ह्रीं कलायै नमः
ओं ह्रीं कलियुगाय नमः   ओं ह्रीं अधश्छदनाय नमः
ओं ह्रीं अव्यक्ताय नमः   ओं ह्रीं ऊर्ध्वच्छदनाय नमः

ओं ह्रीं योगासनाय नमः

तदुपरि—ओं ह्रीं कन्दाय नमः   ओं ह्रीं दलेभ्यो नमः
ओं ह्रीं बीजाय नमः   ओं ह्रीं केसरेभ्यो नमः
ओं ह्रीं अंकुराय नमः   ओं ह्रीं कर्णिकायै नमः
ओं ह्रीं नालाय नमः   ओं ह्रीं बीजेभ्यो नमः
ओं ह्रीं कण्टकेभ्यो नमः

ओं ह्रीं पद्मासनाय नमः

पूर्वादीशान्तकेसरेषु—

ओं ह्रां इच्छायै नमः   ओं ह्रूं वागीश्वर्यै नमः
ओं ह्रीं ज्ञान्यै नमः   ओं ह्रों ज्वालिन्यै नमः
ओं ह्रूं क्रियायै नमः   ओं ह्रौं वामायै नमः
ओं ह्रें वाचे नमः   ओं ह्रं ज्येष्ठायै नमः

ओं ह्रः रौद्र्यै नमः ।

दलाग्रवृत्ते —ओं ह्लीं सूर्यमण्डलाय नमः
ओं ह्लीं सूर्यमण्डलाधिपत्यै सरस्वत्यै नमः

केसराग्रवृत्ते —ओं ह्लीं सोममण्डलाय नमः
ओं ह्लीं सोममण्डलाधिपत्यै महालक्ष्म्यै नमः

कर्णिकाग्रवृत्ते —ओं ह्लीं अग्निमण्डलाय नमः
ओं ह्लीं अग्निमण्डलाधिपत्यै पार्वत्यै नमः

कर्णिकामध्ये —ओं ह्लीं शक्तिमण्डलाय नमः
ओं ह्लीं शक्तिमण्डलाधिपत्यै अघोरशक्तये नमः

तदुपरि —ओं ह्लीं महावलयासनाय नमः
ओं ह्लीं महावल्लीमूर्तये नमः ।

ध्यानम्—

श्यामां पङ्कजधारिणीं मणिलसत्ताटङ्ककर्णोज्ज्वलां
दक्षे लम्बकरां करण्डमकुटां सत्कञ्चुकान्तस्तनीम् ।
अन्योन्येक्षणसम्युतां शरवणोद्भूतस्य सव्ये स्थितां
कुन्दोद्भासितमालिकां शशिमुखीं वल्लीश्वरीं भावयेत् ॥

ओं ह्लीं महावल्यै नमः

आवाहनादियोनिमुद्रान्तं दर्शयित्वा,

उत्तरे—आधारशक्त्यादिशक्तिमण्डलान्तं सम्पूज्य,

तदुपरि—ओं ह्लीं देवसेनासनायै नमः
ओं ह्लीं देवसेनामूर्तये नमः ।

ध्यानम्—

पीतामुत्पलधारिणीं शचिसुतां दिव्याम्बरालंकृतां
वामे लम्बकरां महेन्द्रतनयां मन्दारमाल्योज्ज्वलाम् ।
देवैरर्चितपादुकां शशिमुखीं सेनानिवामे स्थितां
मुक्ताहारविभूषितां द्विनयनां देवीं त्रिभङ्गीं भजे ॥

ओं ह्रीं देवमेनायै नमः ।

आवाहनादियोनिमुद्रान्तं सम्पूज्य,
ततो ब्रह्माङ्गानि लयस्थानेषु सम्पूज्य,

ओं सों ईशानाय जगद्भुवे नमः	मूर्ध्नि
ओं सें तत्पुरुषाय वचद्भुवे नमः	वक्त्रे
ओं सुं अघोराय विश्वभुवे नमः	हृदये
ओं सिं वामदेवाय रुद्रभुवे नमः	गुह्ये
ओं सं सद्योजाताय ब्रह्मभुवे नमः	दक्षिणजानुनि
ओं सं सद्योजाताय भुवद्भुवे नमः	वामजानुनि
ओं सां जगद्भुवे हृदयाय नमः	हृदि।
ओं सीं वचद्भुवे शिरसे नमः	शिरसि
ओं सूं विश्वभुवे शिखायै नमः	शिखायाम्
ओं सैं रुद्रभुवे कवचाय नमः	कवचे
ओं सौं ब्रह्मभुवे नेत्रेभ्यो नमः	नेत्रेषु
ओं सः भुवद्भुवे अस्त्राय नमः	हस्तेषु

प्रथमावरणे—

ओं सों ईशानजगद्भुवे नमः	ईशानदलमूले
ओं सें तत्पुरुषवचद्भुवे नमः	पूर्वदलमूले
ओं सुं अघोरविश्वभुवे नमः	दक्षिणदलमूले
ओं सिं वामदेवरुद्रभुवे नमः	उत्तरदलमूले
ओं सं सद्योजाताय ब्रह्मभुवे नमः	पश्चिमदलमूले
ओं सं सद्योजाताय भुवद्भुवे नमः	नैरृतदलमूले
ओं सौं ब्रह्मभुवे नेत्रेभ्यो नमः	ईशानस्योत्तरभागे
ओं सां जगद्भुवे हृदयाय नमः	आग्नेयदले
ओं सीं वचद्भुवे शिरसे नमः	ईशानदलनेत्रस्योत्तरे
ओं सूं विश्वभुवे शिखायै नमः	नैरृतदले
ओं सैं रुद्रभुवे कवचाय नमः	वायव्यदले
ओं सः भुवद्भुवे अस्त्राय नमः	पूर्वादिदलेषु

द्वितीयावरणे पूर्वादिदिक्षु—

ओं सां जयन्तासनाय नमः । ओं सां जयन्तमूर्तये नमः ।

ध्यानम्—जयन्तं स्वर्णवर्णं च सर्वाभरणभूषितम् ।
एकास्यं द्विभुजं शान्तं शक्तिवज्रधरं भजे ॥

ओं सां जयन्ताय नमः । आवाहनादिकं विधाय

ओं सां अग्निशिखासनाय नमः

औ सां अग्निशिखमूर्तये नमः ।

ध्यानम्—रक्तवर्णं अग्निशिखं सर्वाभरणभूषितम् ।
एकास्यं द्विभुजं शान्तं शक्तिवज्रधरं भजे ॥

ओं सां अग्निशिखाय नमः । आवाहनादिकं कृत्वा,

ओं सां कृत्तिकापुत्रासनाय नमः ।

ओं सां कृत्तिकापुत्रमूर्तये नमः ।

ध्यानम्—कृष्णं तु कृत्तिकापुत्रं सर्वाभरणभूषितम् ।
एकास्यं द्विभुजं शान्तं शक्तिवज्रधरं भजे ॥

ओं सां कृत्तिकापुत्राय नमः । आवाहनादिकं कृत्वा,

ओं सां भूतपत्यासनाय नमः । ओं सां भूतपतिमूर्तये नमः ।

ध्यानम्—रक्तनेत्रं भूतपतिं नीलोत्पलदलप्रभम् ।
सर्वाभरणभूषाढ्यं शक्तिवज्रधरं भजे ॥

ओं सां भूतपतये नमः । आवाहनादिकं कृत्वा,

ओं सां सेनान्यासनाय नमः । ओं सां सेनानीमूर्तये नमः ।

ध्यानम्—शशाङ्कधवलं देवं सेनान्यं पङ्कजेक्षणम् ।
एकास्यं द्विभुजं शान्तं शक्तिवज्रधरं भजे ॥

ओं सां सेनान्यै नमः । आवाहनादिकं कृत्वा,

ओं सां गुहासनाय नमः । ओं सां गुहमूर्तये नमः ।

ध्यानम्—गुहं च विद्रुमाभासं करण्डमकुटान्वितम् ।
अभये वरदं चैव शक्तिवज्रधरं भजे ॥

ओं सां गुहाय नमः । आवाहनादिकं कृत्वा,

ओं सां हेमशूलासनाय नमः । ओं सां हेमशूलमूर्तये नमः ।

ध्यानम्—स्वर्णच्छायं हेमशूलं सर्वाभरणभूषितम् ।
एकास्यं द्विभुजं शान्तं शक्तिवज्रधरं भजे ॥

ओं सां हेमशूलाय नमः । आवाहनादिकं कृत्वा,

ओं सां विशालाक्षासनाय नमः ओं सां विशालाक्षमूर्तये नमः

ध्यानम्—शरच्चन्द्रवदाकारं विशालाक्षं महाभुजम् ।
सर्वाभरणभूषाढ्यं शक्तिवज्रधरं भजे ॥

ओं सां विशालाक्षाय नमः । आवाहनादिकं कृत्वा,

तृतीयावरणे पूर्वादिदिक्षु—

ओं सां गजेन्द्राय नमः । ओं सां मयूराय नमः ।
ओं सां सुदेहाय नमः । ओं सां देवसेनापतये नमः ।
ओं सां महावल्यै नमः । ओं सांँ देवसेनायै नमः ।
ओं सां सुमुखाय नमः । ओं सां सुमित्राय नमः ।

तृतीयावरणे—

ओं सां बाणाय नमः । ओं सां कार्तिकेयाय नमः ।
ओं सां शाखाय नमः । ओं सां गुहाय नमः ।
ओं सां भद्रसेनाय नमः । ओं सां कुक्कुटध्वजाय नमः ।
ओं सां सेनान्यै नमः । ओं सां मयूरवाहनाय नमः ।
ओं सां भवात्मजाय नमः । ओं सां गांगेयाय नमः ।
ओं सां सुब्रह्मण्याय नमः । ओं सां देवसेनापतये नमः ।

चतुर्थावरणे पूर्वादिदिक्षु—

ओं सां इन्द्राय नमः
ओं सां अग्नये नमः
ओं सां यमाय नमः
ओं सां निर्ऋतये नमः
ओं सां वरुणाय नमः
ओं सां वायवे नमः
ओं सां कुबेराय नमः
ओं सां ईशानाय नमः

ईशानदक्षिणे—ओं सां ब्रह्मणे नमः

नैर्ऋत्युत्तरे—ओं सां विष्णवे नमः

पञ्चमावरणे—

ओं सां वज्राय नमः
ओं सां शक्तये नमः
ओं सां दण्डाय नमः
ओं सां खड्गाय नमः
ओं सां पाशाय नमः
ओं सां अंकुशाय नमः
ओं सां गदाय नमः
ओं सां त्रिशूलाय नमः

तद्दक्षिणे—ओं सां पद्माय नमः

नैऋत्युत्तरे—ओं सां चक्राय नमः। इति सम्पूज्य,

नैवेद्य–धूप–दीपार्घ्याणि दत्वा, काम्यानि विज्ञाप्य, हस्ताभ्यां अनुज्ञापात्रं आदाय,

निवृष्वैर समायुतैः। कालैर्हरित्वमापन्नैः।
इन्द्रायाहि सहस्रयुक्। अग्निर्विभ्राष्ट्रिवसनः।
वायुश्वेतसिकद्रुकः। संवत्सरोविपूवर्णैः।
नित्यास्ते नुचरास्तव। सुब्रह्मण्योँ सुब्रह्मण्योँ सुब्रह्मण्योम्॥

इत्युच्चरन् प्रार्थयेत्।

देवदेव जगन्नाथ जगदानन्दकारण।
महोत्सवकार्यार्थं अनुज्ञां देहि मे प्रभो॥ इति प्रार्थ्य,

ओं नमो भगवते महापुरुषाय, मयूरवाहनाय, गौरीपुत्राय, ईशात्मजाय, स्कन्दस्वामिने-कुमाराय-तारकारये-षण्मुखाय-

द्वादशनेत्राय – द्वादशभुजाय – द्वादशात्मकाय – शक्तिहस्ताय–
सुब्रह्मण्याय – ओं नमः स्वाहा ॥

स्वस्तिमङ्गळवाचकैः सह प्रदक्षिणक्रमेण आस्थानमण्डपं व्रजेत् ।

कल्याणं दधतं कटाक्षलवतः भक्ताय हत्वा रिपून्
कल्याणाचलकार्मुकस्य तनुजं कारुण्यपाथोनिधिम् ।
कल्याणाकृतिमव्ययं गिरिसुताप्रेमास्पदं पावनं
कल्याणाय भजेऽनुजं गणपतेः श्रीदेवसेनापतिम् ॥

---

१०. वास्तुशान्तिविधिः

बालस्थाने सभास्थाने पवित्रे यागमण्टपे ।
आद्योपलेष्टिकास्थाने लिङ्गसंस्थापनेऽपि च ॥

प्रोक्षणे गर्भविन्यासे सकळस्थापनेऽपि च ।
वास्तुहोमं प्रकर्तव्यं सर्वसम्भारसम्भृतम् ॥

अथ उत्सवादौ नववास्तुप्रवेशने प्रतिष्ठाद्यष्टबन्धन प्रायश्चित्तादिषु अन्यासु मङ्गलक्रियासु वास्तुहोमं पुरतः कुर्यात् ।

तद्यथा—मण्डूकपदं परमशायिपदमिति द्विधा । देवानां मण्डूकपदं देवीनां परमशायिपदमिति ।

मण्डूकं देवतानां च वास्तूनां च शुभं भवेत् ।
देवीनां अन्यशक्तीनां शुभं परमशायिकम् ॥

तत्प्रकारः उच्यते—

ब्रह्मस्थाने पीठपुरतः पीठप्रासादयोर्मध्ये गोपुरबाह्ये ग्राममध्ये मण्टपादौ पञ्चहस्तादि नवहस्तपर्यन्तं मण्टपं चतुर्द्वारसहितं यथोक्तलक्षणं कारयेत् ।

मध्ये नवपदे द्वादशांगुलोत्सेधां वेदीं पूर्वे चतुरश्रकुण्डं च कृत्वा, गोमयेनोपलिप्य, वितानध्वजतोरणपूगकदलीस्तभ रङ्गवल्यादिभिरलंकृत्य

आचार्यः आह्निकद्वयं निर्वर्त्य, त्यक्तभोजनः स्वस्तिमङ्गळवाद्यैः ब्राह्मणैरस्त्रदेवसहितः वास्तुपूजाहोमोपकरणैः परिजनैस्सह वास्तुशाला-मासाद्य, ऐशान्यां अस्त्रदेवं संस्थाप्य, वेदिकापश्चिमे पूजाहोमोपकरणानि विधाय, वेदिकादक्षिणतः आचार्यः उदङ्मुखः उपविश्य, विघ्नेश्वरपूजां कृत्वा, सङ्कल्प्य, पुण्याहं वाचयित्वा, पञ्चगव्यं नैऋत्यां साधयित्वा पुण्याहपञ्चगव्यार्घ्योदकैः वास्तुशालां सम्प्रोक्ष्य,

अथ वेदिकायां नववस्त्रे द्रोणशालितण्डुलैः हस्तद्वयविस्तारं चतुरश्रं स्थण्डिलं कारयित्वा,

पश्चिमादि पूर्वान्तं दक्षिणाद्युत्तरान्तं नवनवसूत्राणि विन्यस्य, आग्नेयादि वायव्यान्तं नैऋत्यादीशान्तं तिर्यक्सूत्रत्रयं च कृत्वा, चतुष्कोणेषु अग्रपदं विना अधः पार्श्वद्विपदयोः कर्णसूत्रचतुष्टयं तत्सूत्राग्रे क्रमेण वृम्शसूत्रचतुष्टयं च कृत्वा, तदेव रज्ज्वष्टकं भवेत् । मध्ये चतुष्पदे साष्टपत्रकर्णिकं पद्ममालिख्य, अष्टसूत्रसंयुक्तपूर्वादि षट्पदानि तिलेन मिश्रीकृत्य, कोणेषु शूलचतुष्टयं, पूर्वादि दिक्षु वृत्तचतुष्टयं च कृत्वा सर्वत्र रेखाः तिलेन कुर्यात् ॥

इति मण्डूकपदम् ॥

मध्यपद्मे पूर्वाग्रं कूर्चं विधाय, चक्रस्याधोभागे भूमौ वास्तुपुरुषं ध्यायेत् ।

वास्तु मर्त्यो महाकायः कृष्णाङ्गो रक्तलोचनः ।
एकवक्त्रो द्विबाहुश्च बर्बराङ्गश्च दुर्धरः ॥

वज्रदेहो सुराकारो बिभ्रच्चश्मश्रु शिरोरुहः ।
ऐशान्यमस्तकः क्रुद्धो नैऋत्याँ गतपादुकः ॥

आग्नेय्यां वायुदिग्भागे जानुकूर्परशायिकः ।
हृदञ्जलिरधोवक्त्रः स्थिरवास्तु प्रकीर्तितः ॥

अभ्रंवान्तश्शरीरोऽयं पीडयत्यखिलं जगत् ।
पूजाकाले तमुत्थाप्य ततोऽवाङ्मुखमर्चयेत् ॥

इति ध्यात्वा, वास्तोष्वेति मन्त्रेण

ओं ह्रां वास्तुपुरुषाय नमः । इति आवाहनादिकं विधाय, धूप-दीपौ दत्वा, निवेद्य,

सूत्रेषु पश्चिमादि पूर्वान्तं नवरेखासु,

ओं लक्ष्म्यै नमः
ओं यशोवत्यै नमः
ओं कान्तायै नमः
ओं सुप्रियायै नमः
ओं विमलायै नमः
ओं शिवायै नमः
ओं सुभगायै नमः
ओं सुमत्यै नमः
ओं सारायै नमः

इति रेखासु सम्पूज्य,

दक्षिणाद्युत्तरान्तं नवरेखासु—

ओं धन्यायै नमः
ओं प्राणायै नमः
ओं विशालायै नमः
ओं स्थिरायै नमः
ओं भद्रायै नमः
ओं जयायै नमः
ओं रजायै नमः
ओं विभवायै नमः
ओं चैतन्यायै नमः

इति मण्डूकपदम् ॥

उभयस्यापि वंशसूत्रयोः—ओं ह्रां दुर्जयायै नमः ।
ओं ह्रां दुर्धरायै नमः ।

आग्नेयादिकोणेषु—कर्णसूत्रोत्तराग्रमारभ्य, ईशानकर्णसूत्रदक्षिणाग्रपर्यन्तं,

ओं ह्रां कौलिन्यै नमः ।
ओं ह्रां सन्धिन्यै नमः ।
ओं ह्रां संवर्तायै नमः ।
ओं ह्रां विवर्तायै नमः ।
ओं ह्रां उद्भवायै नमः ।
ओं ह्रां सद्भवायै नमः ।
ओं ह्रां पक्षिण्यै नमः ।
ओं ह्रां यक्षिण्यै नमः ।

इति सम्पूज्य, नैवेद्य, धूप-दीपौ दत्वा,

वास्तुपुरुषं एतैः बद्धं निश्चलं विभाव्य।

तदुपरि चक्रे परिस्तीर्य, अर्घ्यांबुना सम्प्रोक्ष्य, मध्ये षडुत्थासनं सम्पूज्य, वास्त्वधिपतये

ओं ब्रं ब्रह्मासनाय नमः

ओं ब्रं ब्रह्ममूर्तये नमः ध्यानम्—

पीनं पीतं चतुर्बाहुं ब्रह्माणं चतुराननम् ।
हंसयानं च बिभ्राणं दण्डाक्षस्रक्कमण्डलुम् ॥

जटामण्डितशोभाढ्यं शुभ्रयज्ञोपवीतिनम् ।
कनकाङ्गदकेयूरं वास्तुनाथमहं भजे ॥

ब्रह्मजज्ञानमन्त्रेण ओं ब्रं वास्त्वधिपतये ब्रह्मणे नमः । इति आवाहनादि पद्ममुद्रां प्रदर्श्य,

तद्वामे—ओं ऐं सरस्वत्यासनाय नमः

ओं ऐं सरस्वतीमूर्तये नमः

ध्यानम्—सरस्वतीं चतुर्हस्तां श्वेतपद्मासनस्थिताम् ।
करण्डमकुटोपेतां मुक्तादिभिरलंकृताम् ॥

एतत्पुरोडाशाद्येति मन्त्रेण ओं ऐं सरस्वत्यै नमः। आवाहनादिकं विधाय, पूर्वाद्यष्टदळेषु,

ओं हां त्रयीमयाय नमः ओं हां त्रयीमूर्तये नमः
ओं हां पद्माक्षाय नमः ओं हाँ पद्मयोनये नमः
ओं हां चतुर्मुखाय नमः ओं हां धात्रे नमः
ओं हां पितामहाय नमः ओं हां अजाय नमः

इति ब्रह्मविद्येश्वरान् सम्पूज्य, धूपदीपौ दत्वा, पूर्वषट्पदे—

ओं हां मरीच्यासनाय नमः ।

ओं हां मरीचिमूर्तये नमः

ध्यानम्—पूर्वमिश्रपदे चैव मरीचिः श्वेतकान्तिमान् ।
धनुर्बाणधरो देवः पद्मयुक्तकरद्वयः ॥

ओं ह्रां मरीचये नमः

दक्षिणषट्पदे ओं ह्रां विवस्वदासनाय नमः
ओं ह्रां विवस्वन्मूर्तये नमः

ध्यानम्—दक्षे मिश्रपदे चैव विवस्वान् रक्तकान्तिमान् ।
धनुर्बाणधरो देवः पद्मयुक्तकरद्वयः ॥

ओं ह्रां विवस्वते नमः

पश्चिमषट्पदे ओं ह्रां मित्रासनाय नमः
ओं ह्रां मित्रमूर्तये नमः

ध्यानम्—प्रत्यङ्मिश्रपदे मित्रः शातकुम्भसमप्रभः ।
धनुर्बाणधरो देवः पद्मयुक्तकरद्वयः ॥

ओं ह्रां मित्राय नमः

उत्तरषट्पदे ओं ह्रां धराधरासनाय नमः
ओं ह्रां धराधरमूर्तये नमः

ध्यानम्—उदङ्मिश्रपदे चैव कृष्णवर्णो धराधरः ।
धनुर्बाणधरो देवः पद्मयुक्तकरद्वयः ॥

ओं ह्रां धराधराय नमः

ईशानकोणेषु—अग्रपदं विना ऊर्ध्वाधः क्रमेण ।

ऊर्ध्वे ओं ह्रां आपासनाय नमः ।
ओं ह्रां आपमूर्तये नमः ।

ध्यानम्—ईशानदिग्गतश्चापः श्वेतवर्णश्चतुर्भुजः ।
पाशाङ्कुशधरो देवः गदाखड्गधरस्तथा ॥

ओं ह्रां आपाय नमः ।

तदधोभागे—ओं ह्रां आपवत्सासनाय नमः ।
ओं ह्रां आपवत्समूर्तये नमः ।

ध्यानम्—आपाख्यस्याप्यधोभागे ह्यापवत्सं त्रिलोचनम् ।
जपाकुसुमसङ्काशं खड्गखेटकधारिणम् ॥
ओं ह्रां आपवत्साय नमः ।

आग्नेयद्विपदे—ओं ह्रां सवित्रासनाय नमः ।
ओं ह्रां सवितृमूर्तये नमः ।

ध्यानम्—सविता चाग्निदिग्भागे नीलवर्णः किरीटवान् ।
पाशाङ्कुशधरो देवः खड्गखेटधरस्तथा ॥
ओं ह्रां सवित्रे नमः ।

तदधोभागे—ओं ह्रां सावित्रासनाय नमः ।
ओं ह्रां सावित्रमूर्तये नमः ।

ध्यानम्—सवितुश्चाप्यधोभागे सावित्रं धूम्रवर्णकम् ।
अघोररूपं किरीटाढ्यं नक्रकुण्डलधारिणम् ॥
ओं ह्रां सावित्राय नमः ।

नैर्ऋतद्विपदे—ओं ह्रां इन्द्रासनाय नमः ।
ओं ह्रां इन्द्रमूर्तये नमः ।

ध्यानम्—इन्द्रं नैऋतिदिग्भागे ह्यरुणाभं चतुर्भुजम् ।
वज्रशक्तिधरं देवं गजारूढमहं भजे ॥
ओं ह्रां इन्द्राय नमः ।

तदधोभागे—ओं ह्रां इन्द्रजिदासनाय नमः
ओं ह्रां इन्द्रजिन्मूर्तये नमः

ध्यानम्—इन्द्राख्यस्याप्यधोभागे इन्द्रजित्शुक्लवर्णकः ।
नानारत्नकिरीटाढ्यो खड्गखेटकसम्युतः ॥
ओं ह्रां इन्द्रजिते नमः ।

वायव्यद्विपदे—ओं हां रुद्रासनाय नमः । ओं हां रुद्रमूर्तये नमः ।

ध्यानम्—रुद्रस्तु वायुदिग्भागे विद्रुमाभः त्रिलोचनः ।
शूलं कपालहस्ते च मृगटङ्कधरस्तथा ॥
ओं हां रुद्राय नमः ।

तदधोभागे—ओं हां रुद्रदासासनाय नमः ।
ओं हां रुद्रदासमूर्तये नमः ।

ध्यानम्—रुद्राख्यस्याप्यधोभागे रुद्रदासं द्विलोचनम् ।
मौक्तिकाभं किरीटाढ्यं खड्गखेटकधारिणम् ॥
ओं हां रुद्रदासाय नमः । इति सम्पूज्य,

ईशानकोणार्धपदमारभ्य अग्निकोणार्धपदपर्यन्तम्.
ओं हां ईशानासनाय नमः । ओं हां ईशानमूर्तये नमः ।

ध्यानम्—ईशानं वृषभारूढं त्रिशूलं व्याळधारिणम् ।
शरच्चन्द्रवदाकारं चन्द्रमौळिं त्रिलोचनम् ॥
ओं हां ईशानाय नमः ।

ओं हां पर्जन्यासनाय नमः । ओं हां पर्जन्यमूर्तये नमः ।

ध्यानम्—पर्जन्यो ज्वलवर्णश्च खड्गखेटधरस्तथा ।
करण्डमकुटोपेतः सर्वाभरणभूषणः ॥
ओं हां पर्जन्याय नमः ।

ओं हां जयन्तासनाय नमः । ओं हां जयन्तमूर्तये नमः ।

ध्यानम्—जयन्तं कृष्णवर्णाभं धनुर्बाणसमन्वितम् ।
क्रुद्धरूपं किरीटाढ्यं नक्रकुण्डलधारिणम् ॥
ओं हां जयन्ताय नमः

ओं ह्रां माहेन्द्रासनाय नमः   ओं ह्रां माहेन्द्रमूर्तये नमः

ध्यानम्—माहेन्द्रं हेमसङ्काशं सहस्राक्षं किरीटिनम् ।
वज्रशक्तिधरं देवं गजारूढमहं भजे ॥

ओं ह्रां माहेन्द्राय नमः

ओं ह्रां आदित्यासनाय नमः   ओं ह्रां आदित्यमूर्तये नमः

ध्यानम्—आदित्यं रक्तवर्णं च अब्जद्वयकरद्वयम् ।
प्रभामण्डलमध्यस्थं सर्वलोकैकसाक्षिणम् ॥

ओं ह्रां आदित्याय नमः

ओं ह्रां सत्यकासनाय नमः   ओं ह्रां सत्यकमूर्तये नमः

ध्यानम्—सत्यकं चित्रवर्णाभं गदाखड्गं च धारिणम् ।
शुक्लयज्ञोपवीतञ्च नक्रकुण्डलधारिणम् ॥

ओं ह्रां सत्यकाय नमः

ओं ह्रां भ्रम्शासनाय नमः   ओं ह्रां भ्रम्शमूर्तये नमः

ध्यानम्—भ्रंशं वन्धूकपुष्पाभं बृहत्कायं किरीटिनम् ।
वक्रदन्तं श्मश्रुवक्त्रं शूलवेताळधारिणम् ॥

ओं ह्रां भ्रम्शाय नमः

ओं ह्रां अन्तरिक्षासनाय नमः ओं ह्रां अन्तरिक्षमूर्तये नमः

ध्यानम्—कुन्दवर्णं जटाजूटं मुद्गळव्याळधारिणम् ।
भस्मोद्धूलितसर्वाङ्गमन्तरिक्षमहं भजे ॥

ओं ह्रां अन्तरिक्षाय नमः

अग्निकोणार्धपदमारभ्य निर्ऋतिकोणपर्यन्तम्—

ओं ह्रां अग्न्यासनाय नमः   ओं ह्रां अग्निमूर्तये नमः

ध्यानम्—द्विमुखं शक्तिहस्तं च तद्वर्णं ज्वालमौलिनम् ।
अजासनस्थं यज्ञेशं सर्वपापहरं भजे ॥

ओं अग्नये नमः

ओं हां पूषासनाय नमः ओं हां पूषमूर्तये नमः

ध्यानम्—पूषाणं रक्तवर्णाभं शरचापकरद्वयम् ।
सुवर्णमकुटोपेतं अमलं पङ्कजासनम् ॥
ओं हां पूष्णे नमः

ओं हां विधतासनाय नमः ओं हां विधतमूर्तये नमः

ध्यानम्—विधतस्त्विन्द्रचापाभो खड्गदण्डकरद्वय. ।
उग्रनेत्रश्शवारूढः वक्त्रदन्तो भयानकः ॥
ओं हां विधताय नमः

ओं हां गृहक्षतासनाय नमः ओं हां गृहक्षतमूर्तये नमः

ध्यानम्—विकारास्यं महाकायं विद्युद्वर्णं गृहक्षतम् ।
खड्गखेटधरं देवं जटामकुटमण्डितम् ॥
ओं हां गृहक्षताय नमः

ओं हां यमासनाय नमः ओं हां यममूर्तये नमः

ध्यानम्—महिषस्थं महाकायं कृष्णवर्णं भयानकम् ।
खड्गखेटधरं देवं ध्यायेद्दक्षिणदिक्पतिम् ॥
ओं हां यमाय नमः

ओं हां गन्धर्वासनाय नमः ओं हां गन्धर्वमूर्तये नमः

ध्यानम्—गन्धर्वं पद्मरागाभं रक्षसां श्रोत्रशत्रुकम् ।
शङ्खघोषसमायुक्तं पक्षद्वयसमन्वितम् ॥
ओं हां गन्धर्वाय नमः

ओं हां भृङ्गराजासनाय नमः ओं हां भृङ्गराजमूर्तये नमः

ध्यानम्—भृङ्गराजश्च भृङ्गाभः षट्पदश्चारुविक्रमः ।
खड्गखेटधरः श्रीमान् सर्वाभरणभूषितः ॥
ओं हां भृङ्गराजाय नमः

ओं हां मृगराजासनाय नमः ओं हां मृगराजमूर्तये नमः

ध्यानम्—मेघवर्णं महावीर्यं घण्टाकिङ्किणिधारिणम् ।
एवं ध्यात्वा विशेषेण मृगराजं प्रपूजयेत् ॥

ओं हां मृगराजाय नमः

नैर्ऋतिकोणार्धपदमारभ्य वायुकोणार्धपदपर्यन्तम् ।

ओं हां निर्ऋत्यासनाय नमः ओं हां निर्ऋतिमूर्तये नमः

ध्यानम्—निर्ऋतिं श्यामवर्णन्तु खड्गखेटधरं तथा ।
करालं राक्षसाकारं सिंहवाहमहं भजे ॥

ओं हां निर्ऋतये नमः

ओं हां दौवारिकासनाय नमः ओं हां दौवारिकमूर्तये नमः

ध्यानम्—दौवारिकं सिताभासं उग्राक्षं च किरीटिनम् ।
खड्गपाशधरं देवं घण्टाकिङ्किणिधारिणम् ॥

ओं हां दौवारिकाय नमः

ओं हां सुग्रीवासनाय नमः ओं हां सुग्रीवमूर्तये नमः

ध्यानम्—सुग्रीवं शिखिवर्णं च खड्गखेटकधारिणम् ।
वक्रदन्तं महाघोरं ध्यायेहं वृद्धरूपिणम् ॥

ओं हां सुग्रीवाय नमः

ओं हां पुष्पदन्तासनाय नमः ओं हां पुष्पदन्तमूर्तये नमः

ध्यानम्—चन्द्रकान्तप्रतीकाशं पुष्पदन्तं महाबलम्
तोमरं भिण्डिपालं च बिभ्राणं पूजयाम्यहम् ॥

ओं हां पुष्पदन्ताय नमः

ओं हां वरुणासनाय नमः ओं हां वरुणमूर्तये नमः

ध्यानम्—वरुणं श्वेतवर्णं च पाशहस्तं रुजासनम् ।
मौक्तिकालङ्कृतं देवं तीर्थनाथमहं भजे ॥

ओं हां वरुणाय नमः

ओं ह्रां असुरासनाय नमः ओं ह्रां असुरमूर्तये नमः

ध्यानम्—असुरं कृष्णवर्णं च सिंहवक्त्रं किरीटिनम् ।
ज्वालाग्निसदृशाक्षञ्च भावयेन्मुसलायुधम् ॥
ओं ह्रां असुराय नमः

ओं ह्रां शोषासनाय नमः ओं ह्रां शोषमूर्तये नमः

ध्यानम्—नीलोत्पलप्रतीकाशं शोषं लोहितलोचनम् ।
मुद्गलध्वजहस्तं च कम्बळालंकृतं भजे ॥
ओं ह्रां शोषाय नमः

ओं ह्रां रोगासनाय नमः ओं ह्रां रोगमूर्तये नमः

ध्यानम्—विकारनेत्रवदनं शुष्कदेहं भयानकम् ।
कुन्दाळिदण्डहस्तं च रोगदेवमहं भजे ॥
ओं ह्रां रोगाय नमः

वायुकोणार्धपदमारभ्य ईशानकोणार्धपदपर्यन्तम्—

ओं ह्रां वाय्वासनाय नमः ओं ह्रां वायुमूर्तये नमः

ध्यानम्—धूम्ररूपं किरीटाढ्यं ध्वजहस्तं महाबलम् ।
मृगासीनं च प्राणेशं वायुदेवमहं भजे ॥
ओं ह्रां वायवे नमः

ओं ह्रां नागासनाय नमः ओं ह्रां नागमूर्तये नमः

ध्यानम्—नागं तु हेमसंकाशं कट्यधः पुच्छधारिणम् ।
खड्गखेटधरं देवं जटामकुटमण्डितम् ॥
ओं ह्रां नागाय नमः

ओं ह्रां मुख्यासनाय नमः ओं ह्रां मुख्यमूर्तये नमः

ध्यानम्—मुख्यं शङ्खप्रतीकाशं गजवक्त्रं महाबलम् ।
दण्डांकुशधरं देवं सर्पवृश्चिकभूषणम् ॥
ओं ह्रां मुख्याय नमः

ओं ह्रां भल्लाटासनाय नमः ओं ह्रां भल्लाटमूर्तये नमः

ध्यानम्—श्मश्रुवक्त्रं किरीटाढ्यं भल्लाटं पद्मवर्णकम् ।
मयूरवाहनं देवं वज्रहस्तमहं भजे ॥
ओं ह्रां भल्लाटकाय नमः

ओं ह्रां सोमासनाय नमः ओं ह्रां सोममूर्तये नमः

ध्यानम्—तप्तकाञ्चनसङ्काशं गदाहस्तं किरीटिनम् ।
पीतांबरधरं देवं अश्वारूढमहं भजे ॥
ओं ह्रां सोमाय नमः

ओं ह्रां ऋगासनाय नमः ओं ह्रां ऋगमूर्तये नमः

ध्यानम्—ऋगं रक्तं महाकायं कुठारं दण्डहस्तकम् ।
ज्वालाकेशसमायुक्तं ध्यायेहं सिंहवाहनम् ॥
ओं ह्रां ऋगाय नमः

ओं ह्रां अदित्यासनाय नमः ओं ह्रां अदितिमूर्तये नमः

ध्यानम्—पुष्परागप्रतीकाशामसिं डमरुकं धृताम् ।
वक्रदन्तीं महाकायां ध्यायेददितिरूपिणीम् ॥
ओं ह्रां अदित्ये नमः

ओं ह्रां दित्यासनाय नमः ओं ह्रां दितिमूर्तये नमः

ध्यानम्—दितिं शङ्खप्रतीकाशां गजवक्त्रां महाबलाम् ।
खड्गखेटधनुर्बाणान् धारयन्तीमहं भजे ॥
ओं ह्रां दितये नमः

ईशानादि चतुश्शूलेषु—
ओं ह्रीं चरक्यासनाय नमः ओं ह्रीं चरकीमूर्तये नमः

ध्यानम्—चरकीं श्वेतसङ्काशां शूलेन मुसलायुधाम् ।
ज्वालाकेशां वक्रदन्तीं सर्वविघ्नविनाशिनीम् ।
ओं ह्रीं चरक्यै नमः

ओं ह्रीं विदारिकासनाय नमः ओं ह्रीं विदारिकामूर्तये नमः

ध्यानम्—विदारीं हेमसङ्काशां दण्डेन मुसलायुधाम् ।
ज्वालाकेशां महाभीमां अग्निदिग्विघ्ननाशिनीम् ॥

ओं ह्रीं विदारिकायै नमः

ओं ह्रीं पूतनासनाय नमः ओं ह्रीं पूतनामूर्तये नमः

ध्यानम्—पूतनां रक्तसङ्काशां हलेन मुसलायुधाम् ।
ज्वालाकेशां महाभीमां रक्षोदिग्विघ्ननाशिनीम् ॥

ओं ह्रीं पूतनायै नमः

ओं ह्रीं पापराक्षस्यासनाय नमः ओं ह्रीं पापराक्षसीमूर्तये नमः

ध्यानम्—नीलजीमूतसङ्काशां ध्वजदण्डकरद्वयाम् ।
ज्वालाकेशकराळास्यां पूजयेत्पापराक्षसीम् ॥

ओं ह्रीं पापराक्षस्यै नमः

पूर्वादिचतुर्वृत्तेषु—

ओं हां स्कन्दासनाय नमः ओं हां स्कन्दमूर्तये नमः

ध्यानम्—स्कन्दं कनकवर्णं च वज्रशक्तिकरद्वयम् ।
किरीटकुण्डलोपेतं बालरूपं रविप्रभम् ॥

ओं हां स्कन्दाय नमः

ओं हां अर्यमासनाय नमः ओं हां अर्यममूर्तये नमः

ध्यानम्—अर्यमापीतवर्णश्च शङ्खचक्रकरद्वयः ।
पीताम्बरोपवीताढ्यः सर्वावयवसुन्दरः ॥

ओं हां अर्यम्णे नमः

ओं हां जृम्भासनाय नमः ओं हां जृम्भमूर्तये नमः

ध्यानम्—जृम्भः कुङ्कुमवर्णश्च पाशाङ्कुशकरद्वयः ।
काषाययज्ञसूत्रश्च वृद्धरूपी महाबलः ॥

ओं ह्रां जृम्भाय नमः

ओं हां बलिपिञ्छासनाय नमः ओं हां बलिपिञ्छमूर्तये नमः

ध्यानम्—शङ्खतुल्यमहाकायो गदाप्रेतायुतस्तथा ।
मयूरपिञ्छवस्त्राढ्यो बलिपिञ्छः किरीटवान् ।
ओं हां बलिपिञ्छाय नमः

इति सम्पूज्य, एतेषां आवाहनादि नैवेद्य-धूप-दीपार्घ्यं दत्वा, क्षीरान्नादिकं ब्रह्मणे स्वाहेति बलिं दत्वा, यथा—

दध्याज्यगुळसंमिश्रं स्वाहान्तं ब्रह्मणे बलिम् ।
पायसान्नं मरीच्यादीन् कुक्कुटाण्डप्रमाणतः ॥
आपादेः कृसरान्नं तु जम्बीरफलमानकम् ।
ईशानाद्यन्तरिक्षान्तं मुद्गान्नं धात्रिमात्रकम् ॥
आग्नेयमृगराजान्त गुळान्नं पूर्वमानकम् ।
नैरृत्यादिरोगान्तं घृतान्नं पूर्वमानकम् ॥
तथाऽनिद्यदित्यान्तं दध्यन्नं दापयेद्बलिम् ।
कपित्थफलमुद्गान्नं चरक्यादीन्बलिं क्षिपेत् ॥
तत्तत्स्वनाममन्त्रेण स्वाहान्तं दापयेद्बलिम् ।
अलाभे शुद्धमन्नं वा क्षिपेयुस्सर्वदेवताः ॥

इति उक्तप्रकारं बलिं दद्यात् । प्रार्थ्य,

तुभ्यं नमोस्तु देवेश वास्तुनाथ वरप्रभो ।
एतद्बलिं समादाय रक्षध्वं देवमन्दिरम् ॥

पश्चात् बलिमण्डलोदग्देशे यवादिधान्यैः स्थण्डिलं कृत्वा, साष्टपत्रकर्णिकं पद्ममालिख्य, मध्ये वर्धनीघटौ पूर्वादिषु अष्टविद्येशकलशांश्च संस्थाप्य, अर्घ्याम्बुना संप्रोक्ष्य, षडुत्थासनं सम्पूज्य, ब्रह्माणं विद्यादेहपुरस्सरं आवाह्य,

ओं ब्रं ब्रह्मासनाय नमः । ओं ब्रं ब्रह्ममूर्तये नमः ।

पीनं पीतं चतुर्बाहुं...दण्डाक्षस्रक्कमण्डलुम् ।
जटामकुटशोभाढ्यं...वास्तुनाथमहं भजे ॥

ब्रह्मजज्ञानमिति मन्त्रेण ओं ब्रं ब्रह्मणे नमः

आवाहनादि पञ्चमुद्रां दर्शयित्वा,

तद्वामे—ओं ऐं सरस्वत्यासनाय नमः ।
ओं ऐं सरस्वतीमूर्तये नमः ।

ध्यानम्—पद्मासनस्थितां देवीं शुक्लांशुकपरिवृताम् ।
कुन्दगोक्षीरफेनाभां वराभयकरोज्ज्वलाम् ॥

सरत्नमकुटामक्षमालापुस्तकधारिणीम् ।
नवयौवनसम्पन्नां ध्यायेच्छुभ्रां सरस्वतीम् ॥

ओं ऐं सरस्वत्यै नमः । इति सम्पूज्य,

एतत्पुरोडासाद्येति मन्त्रेण आवाहनादिकं विधाय,

पूर्वाद्यष्टकुम्भेषु त्रयीमयादीन् सम्पूज्य,

पश्चात् चक्रवत् मरीच्यादि त्रिपञ्चाशत् देवताः सम्पूज्य, नैवेद्यं धूपदीपौ दत्वा,

ततः वेदिकायाः पूर्वभागे अग्निकार्यं कुर्यात् ।

अथ परमशायिपदमुच्यते ।

पूर्वोक्तवत् स्थण्डिले दश दश सूत्राणि उल्लिख्य, तिर्यक्सूत्रादीन् च समुल्लिख्य, मध्ये नवपदे पद्ममालिख्य, पूर्वादिषु द्विसूत्रसंयुत अष्टपदानि तिलेन मिश्रीकृत्य, शूलाष्टकं च कृत्वा सर्वत्र रेखाः तिलेन कुर्यात् ।

पश्चिमादि पूर्वान्तं दशरेखास्

ओं ह्रां शान्त्यै नमः	ओं ह्रां यशोवत्यै नमः
,, ,, कान्तायै नमः	,, ,, विशालायै नमः
,, ,, प्राणवाहिन्यै नमः	,, ,, सत्यै नमः
,, ,, सुमत्यै नमः	,, ,, नन्दायै नमः
,, ,, सुभद्रायै नमः	,, ,, मनोरमायै नमः

इति सम्पूज्य,

दक्षिणाद्युत्तरान्तं दशरेखासु,

ओं ह्रां हिरण्यायै नमः	ओं ह्रां सुप्रभायै नमः
,, ,, लक्ष्म्यै नमः	,, ,, विभूत्यै नमः
,, ,, विमलायै नमः	,, ,, स्थिरायै नमः
,, ,, रथायै नमः	,, ,, ज्वालायै नमः
,, ,, विशोकायै नमः	,, ,, इडायै नमः

इति सम्पूज्य,

---

११. मृत्संग्रहणविधिः

मृत्संग्रहणकालः—

उत्सवे स्थापने चैव स्नपने प्रोक्षणे तथा ।
प्रायश्चित्ते च दीक्षादौ अष्टबन्धनकर्मणि ॥

प्रतिष्ठाप्रोक्षणे काले दीक्षाकाले तथैव च ।
उत्सवादिपवित्रान्तं तत्तत्कर्मणि कारयेत् ।
अङ्कुरं सर्वकार्याणां अर्पणं चाङ्गवत् क्रमात् ॥

मृत्संग्रहणस्थानानि—

नदीतीरे तटाके वा केदारे शुद्धदेशके ।
समुद्रे च महापुण्ये चैत्यवृक्षे महाशुभे ॥

आरग्वधस्य मूले तु पलाशस्य तरोरघः ।
बिल्वमूले च मन्दारे तुळसीमूलदेशके ॥

अश्वत्थद्रुममूले च पूर्वे वा चोत्तरेऽपि वा ।
नदीतीरे तटाके वा उद्याने वा विशेषतः ।
सुक्षेत्रे पर्वते चैव मृत्संग्रहणमाचरेत् ॥

मृत्संग्रहणदिशाविवेचनम्—

यद्वा देवस्य ऐशान्यदिग्भागे आयुर्वर्धनम् ।
पूर्वे तु कलहं विद्यात् वह्नौ तु पुत्रवर्धनम् ॥

दक्षिणे ज्ञानहीनं स्यात् नैरृते मरणं ध्रुवम् ।
पश्चिमे मोक्षसिद्धिः स्यात् वायव्ये सम्पदं भवेत् ।
उत्तरे श्रीपदं प्रोक्तं मृत्संग्रहणमुत्तमम् ॥

मृत्संग्रहणवर्ज्यस्थानम्—

अधमं अशनिस्थानं क्षारभूमिं विवर्जयेत् ।
सन्धिस्थले विवर्जेत्तु मण्डपं कारयेत्ततः ॥

भूमिचर्म च रोमं च वर्जयेत्तु विचक्षणः ।
अङ्कुरार्पणपूर्वे तु सायाह्नसमये मृदम् ॥

संग्राह्य वापयेद्रात्रौ बीजान्यंकुरवृद्धये ।
विघ्नेशं पूजयेत्पूर्वं नाळिकेरफलादिभिः ॥

शिवास्त्रं च गणेशं च चण्डेशानसमायुतम् ।
सर्वालङ्कारसंयुक्तं सर्ववाद्यसमन्वितम् ॥

नानापदजनैः युक्तः छत्रचामरसम्युतः ।
खनित्रेण समोपेतो निर्वृजेद्देशिकोत्तमः ॥

नदीतीरे बिल्वमूले तटाके तुळसीवने ।
केदारे दर्भमूले च वल्मीके नन्दने वने ॥

अश्वत्थमूलदेशे वा गोवासे पर्वते तथा ।
शुद्धदेशमनुप्राप्य शुद्धिं कृत्वा तु भूतलम् ॥

पुण्याहं वाचयित्वा तु विघ्नेशं पूर्वतो न्यसेत् ।
अस्त्रेशं पश्चिमे देशे कुन्दाळीमुत्तरे दिशि ॥

चण्डमीशानदिग्भागे तिष्ठन् दक्षे तु देशिकः ।
शालिभिस्तण्डुलैश्चैव कल्पयेत् स्थण्डिलं तिलैः ॥

तन्मध्ये षड्दळं न्यस्य स्थापयेत् सप्तकुम्भकान् ।
कूर्चपल्लवसम्युक्तान् सरत्नान् सलिलान्वितान् ॥

मध्ये दळाग्रकुम्भेषु पूजयेत् सप्तवारिधीन् ।
अथवा त्वेककुम्भे च तत्र सप्तोदधीन् यजेत् ॥

नैवेद्यं धूपदीपौ च कल्पयेत्तु विधानतः ।
नवकोष्ठं समालिख्य कुम्भाग्रे स्थण्डिलोपरि ॥

अभ्यर्च्य मध्ये ब्रह्माणमनन्तादीन् च पूजयेत् ।
अनन्तं विजयं भद्रं जयन्तं भ्रमरं तथा ॥

प्रस्थितं च परिजृम्भं शूलिनं च प्रपूजयेत् ।
पूर्वादिकोष्ठमध्ये तु तथेन्द्रादीन् समर्चयेत् ॥

पूजयित्वा यथा न्यायं स्वाहान्ते बलिमाचरेत् ।
बलिमण्डलपूर्वे तु भूमिदेवीं समर्चयेत् ॥

खनित्रं पूजयेत्तत्र प्राङ्मुखो वाप्युदङ्मुखः ।
प्राक्शिरोर्ध्वाननां देवीं चित्राकारां विचिन्तयेत् ॥

कुक्षिदेशे मृदं शुद्धं मस्तके राष्ट्रदेशनम् ।
पार्श्वयोः नृपनाशश्च मृदं कुक्षौ तु संग्रहेत् ॥

खनित्रेण त्रिधा खात्वा मृदं संग्राह्य पात्रके ।
वाहयित्वा यथोक्तेन वस्त्रेणाच्छादयेद्बुधः ॥

भूमिदेव्याः कुक्षिदेशे खातदोषनिवृत्तये ।
प्राणोपशमनार्थाय सेचयेत्सप्तवारिधीन् ॥

अब्धिकुम्भान् समादाय मृदि विन्यस्य सेचयेत् ।
परिचारकशीर्षे वा शिबिकायां गजेऽपि वा ॥

वाहयित्वा मृदं पश्चात् नृत्तगीतसमन्वितम् ।
ग्रामप्रदक्षिणं कृत्वा प्रासादं प्रविशेद्गुरुः ॥

अथ पूर्वं विघ्नेश्वरस्य मूलबेरस्य यथोक्तपूजां विधाय,

"भगवन् अशेषफलप्रसादक" (प्रतिष्ठाकर्म) नवदिनमहोत्सवकर्म मया आरभ्यते इति विज्ञाप्य लब्धानुज्ञः विघ्नेश्वर-चण्डेश्वर-अस्त्रराज-खनित्रैस्साकं शुद्धमुद्यानदेशमुपगम्य । तस्मिन् देशे पूर्वे विघ्नेश्वरं पश्चिमे शिवास्त्रं, उत्तरे कुन्दाळि ऐशान्यां चण्डेश्वरं सम्स्थाप्य दक्षिणे देशिकः स्थित्वा, विघ्नेश्वरपूजां विधाय, सङ्कल्प्य,

शुक्लां . शान्तये शिवशिव.. शुभ त ै अस्य देवदेवस्य...अम्बा-समेतपरमेश्वरस्य नवदिनमहोत्सवकर्मणि महामङ्गलांकुरकार्यार्थं मृत्संग्रहणाख्यमहामङ्गळकर्म करिष्ये, तदर्थं स्थलशुद्ध्यर्थं समस्तोपकरणशुद्ध्यर्थं पुण्याहवाचनं च अद्य करिष्ये । इति सङ्कल्प्य, पुण्याहं वाचयित्वा, तदम्भसा सर्वाणि द्रव्याणि संप्रोक्ष्य, शालितण्डुलतिलैः षड्दळपद्म-मालिख्य, मध्यादि सप्तकुम्भान् संस्थाप्य,

मध्यकुम्भे– ओं हां शुद्धोदकार्णवासनाय नमः
ओं हां शुद्धोदकार्णवमूर्तये नमः

ध्यानम्—धवलाभं च शुद्धाब्धि द्विभुजं चैकवक्त्रकम् ।
जटाजूटसमायुक्तं चोत्पलं दक्षिणे करे ॥

पङ्कजं वामहस्ते तु श्वेतवस्त्रोपशोभितम् ।
श्वेतमाल्यैर्विभूषाढ्यं सर्वाभरणभूषितम् ॥

इति ध्यात्वा, ओं ह्रां शुद्धोदकार्णवाय नमः आवाहनादिकं विधाय,

ईशानदळस्थितकुम्भे—

ओं ह्रां लवणार्णवासनाय नमः ओं ह्रां लवणार्णवमूर्तये नमः

ध्यानम्—लवणं मेघवर्णाभं एकवक्त्रसमन्वितम् ।
ज्वालाकेशसमायुक्तं द्विभुजेन विराजितम् ॥

दक्षहस्तेऽक्षमालां च वामे गण्डिकयान्वितम् ।
सर्वाभरणसंयुक्तं लवणाब्धिं विभावयेत् ॥

इति ध्यात्वा, ओं ह्रां लवणार्णवाय नमः आवाहनादिकं विधाय ।

आग्नेयदळस्थितकुम्भे—

ओं ह्रां इक्ष्वर्णवासनाय नमः ओं ह्रां इक्ष्वर्णवमूर्तये नमः

ध्यानम्—इक्षुं ताम्रसमाकाशम् एकवक्त्रं द्विनेत्रकम् ।
करण्डमकुटोपेतं द्विभुजेनोपशोभितम् ॥

दक्षिणे ज्ञानमुद्रां च वामहस्ते कमण्डलुम् ।
सर्वाभरणसंयुक्तम् इक्ष्वब्धिं च विभावयेत् ॥

इति ध्यात्वा, ओं ह्रां इक्ष्वर्णवाय नमः आवाहनादिकं विधाय,

आग्नेयकुम्भस्य पश्चिमकुम्भे—

ओं ह्रां सुरार्णवासनाय नमः ओं ह्रां सुरार्णवमूर्तये नमः

ध्यानम्—सुराब्धिं श्यामळाकारम् एकवक्त्रसमन्वितम् ।
ज्वालाकेशसमायुक्तं भुजद्वयसमन्वितम् ॥

दक्षवामक्रमेणैव खड्गखेटकधारिणम् ।
सितपद्मासनारूढं सुराब्धिं च विभावयेत् ॥

इति ध्यात्वा, ओं ह्रां सुरार्णवाय नमः आवाहनादिकं विधाय,

निरृतिदळस्थितकुम्भे—

ओं हां घृतार्णवासनाय नम ओं हां घृतार्णवमूर्तये नमः

ध्यानम्—घृताब्धि पीतवर्णं च एकवक्त्रं द्विबाहुकम् ।
घण्टानागसमायुक्तं सर्वाभरणभूषितम् ॥

इति ध्यात्वा, ओं हां घृतार्णवाय नमः

वायुदळस्थितकुम्भे—

ओं हां दध्यर्णवासनाय नमः ओं हां दध्यर्णवमूर्तये नमः

ध्यानम्—दधिशुक्लनिभश्चापि द्विनेत्रं चैकवक्त्रकम् ।
जटाजूटसमायुक्तं भुजद्वयविराजितम् ॥

पद्मं दक्षिणहस्ते च वामहस्तेऽक्षमालिकाम् ।
सर्वाभरणसम्युक्तं भावयेद्दधिसागरम् ॥

इति ध्यात्वा, ओं हां दध्यर्णवाय नमः आवाहनादिकं विधाय,

वायुकुम्भस्य पूर्वकुम्भे—

ओं हां क्षीरार्णवासनाय नमः ओं हां क्षीरार्णवमूर्तये नमः

ध्यानम्—क्षीराब्धि शङ्खवर्णाभं द्विबाहुं चैकवक्त्रकम् ।
खड्गं दक्षिणहस्ते तु चक्रं वामकरे तथा ॥

बद्धकेशसमायुक्तं बद्धपद्मासनस्थितम् ।
सर्वाभरणसम्युक्तं क्षीराब्धि च विभावयेत् ॥

इति ध्यात्वा, ओं हां क्षीरार्णवाय नमः, आवाहनादिकं विधाय,
सर्ववारिधिभ्यो नैवेद्य-धूप-दीपार्घ्याणि दत्वा,

अथवा एककुम्भे च पूजयेत् सप्तवारिधीन् ।
लवणाब्धि मेघवर्णं इक्षुं ताम्रमयं तथा ॥

सुराब्धि श्यामळाकारं सर्प्यब्धि पीतविग्रहम् ।
दध्यर्णवं शुक्लवर्णं क्षीराब्धि स्फटिकाकृतिम् ॥

जलाब्धि धवळप्रख्यं नानारत्नैरलंकृतान् ।
नानावस्त्रधरांश्चैव नानालङ्कारशोभितान् ॥

करण्डमकुटोपेतान् वरदाभयहस्तकान् ।
सितपद्मासनासीनान् ध्यात्वैतान् सप्तवारिधीन् ॥

इति ध्यात्वा प्रार्थयेत् ।

समुद्रराज हे देव खातदोषस्य शान्तिकम् ।
कुरुते कृपया देव पुनश्चोद्धरणं क्रमात् ॥

इति प्रार्थ्य, कुम्भाग्रे व्रीहि-तण्डुल-तिललाजैः स्थण्डिलं कृत्वा, स्थण्डिले नवपदं कृत्वा, हृदयेन सम्प्रोक्ष्य, (हृदयाय नमः इति) मध्यपदे षडुत्थासनं अभ्यर्च्य, तन्मध्ये—

ओं हां ब्रह्मासनाय नमः ओं हां ब्रह्ममूर्तये नमः

ध्यानम्—चतुर्भुजं चतुर्वक्त्रं चतुर्मकुटसम्युतम् ।
मुखं प्रति द्विनेत्रं च मौञ्जीदर्भैरलंकृतम् ॥

दक्षिणे त्वक्षमालां च वामभागे तु गण्डिकाम् ।
अभयं दक्षिणे हस्ते चोरुहस्तं तु वामकम् ॥

कुण्डलं चोपवीतश्च पद्मासनोपरिस्थितम् ।
पीतवर्णप्रभं चैव ब्रह्मणो रूपमुच्यते ॥

मन्त्रः—ब्रह्मजज्ञानं...विवः । वेदात्मनाय विद्महे...ब्रह्मा प्रचोदयात् । ओं हां ब्रह्मणे नमः आवाहनादिकं विधाय ।

पूर्वाद्यष्टपदेषु—

ओं हां अनन्ताय नमः ओं हां भ्रमराय नमः
ओं हां विजयाय नमः ओं हां प्रस्थिताय नमः
ओं हां भद्राय नमः ओं हां परिजृम्भिताय नमः
ओं हां जयन्ताय नमः ओं हां शूलिने नमः

S-Sivakumar's

इति सम्पूज्य, नैवेद्यधूपदीपार्घ्यं दत्वा, ततः ओं हां अनन्ताय स्वाहा—
शूलिने स्वाहा इति बलिं दत्वा, (सघृतगुळदधिमिश्रान्नेन बलिं दद्यात् ॥)
प्रार्थ्यं

भो भो ब्रह्मादयो देवाः अनन्ताद्या वरप्रदाः ।
मृदमीश्वरकार्यार्थं गृहिष्यामि तवाज्ञया ॥

इति प्रार्थ्य, ब्रह्माणं विसृज्य,

समुद्रमेखले देवि सर्वदा प्रियदर्शिनि ।
मृदमीश्वरकार्यार्थं गृहिष्यामि तवाज्ञया ॥
बलिमण्डलपूर्वे तु भूमिदेवीं समर्चयेत् ।
प्राक्शिरोर्ध्वाननां देवीं चित्राकारां लिखेद्बुधः ॥

अस्त्रेण सम्प्रोक्ष्य,

ओं ह्रीं भूमिदेव्यासनाय नमः ओं ह्रीं भूमिदेवीमूर्तये नमः

ध्यानम्—द्विभुजां च द्विनेत्रां च...स्तनभारसमन्विताम् ॥

इति ध्यात्वा,

धनुर्धरायै विद्महे...तन्नो धरा प्रचोदयात् ॥

ओं ह्रीं भूमिदेव्यै नमः आवाहनादिकं विधाय योनिमुद्रां प्रदर्श्य,
नैवेद्यादिकं कृत्वा । परिस्तरणेषु पूर्वाद्यष्टदळेषु इन्द्रादीन् सम्पूज्य,
पूर्वे—ओं हां इन्द्रासनाय नमः ओं हां इन्द्रमूर्तये नमः

ध्यानम्—ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम् ।
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत् ॥

ओं हां इन्द्राय नमः ।

मन्त्रः—त्रातारमिन्द्रमवितारमिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रम् ।
हुवेनु शक्रं पुरुहूतमिन्द्रँ स्वस्तिनो मघवा धात्विन्द्रः ॥

आग्नेयाम्—ओं हां अग्न्यासनाय नमः ओं हां अग्निमूर्तये नमः

ध्यानम्—सप्तार्चिषश्च बिभ्राणं...चगासनम् ।

मन्त्रः—त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोवयासिसीष्ठाः ।
यजिष्ठो वह्नितमश्शोशुचानो विश्वाद्वेषाँसि प्रमुमुग्ध्यस्मत् ॥

याम्यै—ओं हां यमासनाय नमः ओं हां यममूर्तये नमः

ध्यानम्—कृतान्तं ... दक्षिणदिक्पतिम् ॥

मन्त्रः—सुगन्नः पन्थामभयङ्कृणोतु । यस्मिन्नक्षत्रे यम एति राजा ।
यस्मिन्नेनमभ्यषिञ्चन्त देवाः । तदस्य चित्रँहविषा यजाम ॥

ओं हां यमाय नमः

नैर्ऋते—ओं हां निर्ऋत्यासनाय नमः ।
ओं हां निर्ऋतिमूर्तये नमः ।

ध्यानम्—रक्तनेत्रं शवारूढं ..पिबन्तं राक्षसेश्वरम् ॥

असुन्वन्तमयजमानमिच्छस्तेनस्येत्यान्तस्कररस्यान्वेषि ।
अन्यमस्मदिच्छसातयित्या नमो देवि निर्ऋते तुभ्यमस्तु ॥

पश्चिमे—ओं हां वरुणासनाय नमः ओं हां वरुणमूर्तये नमः

ध्यानम्—नागपाशधरं – वरुणं मकरासनम् ॥

मन्त्रः—तत्वायामि...प्रमोषीः वरुणाय नमः ॥

वायौ—ओं हां वाय्वासनाय नमः ओं हां वायुमूर्तये नमः

ध्यानम्—आपीनं हरितच्छायं...समीरणम् ॥

मन्त्रः-आनो नियुद्भिश्शतिनीभिरध्वरम् । सहस्रिणीभिरुपयाहि यज्ञम् ।
वायो अस्मिन् हविषि मादयस्व । यूयं पातस्स्वस्तिभिस्सदानः ॥
वायवे नमः

उत्तरे—ओं हां कुबेरासनाय नमः ओं हां कुबेरमूर्तये नमः

ध्यानम्—कुबेरं मनुजासीनम् -- उत्तराशापतिं स्मरेत् ॥

वयँसोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

ओं हां कुबेराय नमः

—ओं हां ईशानासनाय नमः ओं हां ईशानमूर्तये नमः
ध्यानम्—ईशानं वृषभारूढं त्रिशूलं ... त्रिलोचनम् ॥
तमीशानञ्जगतस्तस्थुषस्पतिम् । धियञ्जिन्वमदसे हूमहेवयम् ।
यथा वेदसामसद्वृधे । रक्षितापायुरदब्धस्स्वस्तये । ईशानाय नमः
नैवेद्यधूपदीपार्घ्यं दत्वा । प्रार्थ्य,

हे लोकपालाः शृण्वन्तु यागकार्यार्थमेव हि ।
मृत्तिकां प्रतिगृह्णामि अनुज्ञा दीयतां मम ॥

प्रार्थयेत् ।

कुन्दाळीम् अस्त्रेण सम्प्रोक्ष्य, कुन्दाळ्याः मलनिवारणार्थं तैल-
तैः अभिषिच्य । गन्धपुष्पादिना अभ्यर्च्य । मूलेन कूर्चपल्लव-
भिरलंकृत्य,

दण्डमूले ओं हां भूमिर्भूम्नासनाय नमः भूम्यै
दण्डमध्ये ओं हां वरुणाय नमः
दण्डाग्रे ओं हां अन्तरिक्षाय नमः । कुन्दाळीमूले महीपतये नमः
कुन्दाळीमध्ये—वसुन्धराय नमः । अग्रे—ओं कूर्माय नमः ।

नम्—कुन्दाळी वीरवल्ली च आस्थानं मेरुभावकम् ।
वलयं वासुकी ख्यातं कुन्दाळी हेमभूषणम् ॥

ध्यात्वा, आवहनादिकं विधाय, नैवेद्यधूपदीपार्घ्याणि दत्वा,

एतत् स्थानश्रिया देवि गच्छ त्वं हि यथासुखम् ।

ईक्षदेशे अस्त्रेण खात्वा मृत्तिकां नाळिकेरप्रमाणेन त्रिवारं गृहीत्वा
मादिनिर्मितपात्रे निधाय,

—उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ॥

मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥

भूमिं समतलं कृत्वा । भूमिदेव्याः खातशमनार्थं सप्तवारिधिकुम्भैः अभिषिच्य, शाल्यादिमृद्गोमयकार्पास-बीजेन अवटं विकीर्य, अन्यमृदा पूरयेत् । हृदयेन मृत्तिकां सम्पूज्य, मृत्तिकोपरि कूर्चं निधाय, रक्त-वाससा आच्छाद्य । पुनः अर्घ्यजेलेन सम्प्रोक्ष्य, हृदाभिमन्त्रितपुष्पं निक्षिप्य, भूसूक्तं जप्त्वा, धूपदीपौ दत्वा ।

परिचारकमाहूय सोष्णीषं चोत्तरीयकम् ।
शिरसा वाहयित्वा तु गजे वा शिबिके तथा ॥

अथवा पादगमनं सर्वालङ्कारसम्युतम् ।
शङ्खदुन्दुभिनिर्घोषैः नृत्तगीतसमन्वितैः ।

कुर्याद् मङ्गळवाद्यैश्च स्वस्तिसूक्तसमन्वितम् ।
शनैः प्रदक्षिणं कृत्वा आलयश्च प्रवेशयत् ॥

(अङ्कुरमण्डपे स्थित्वा अङ्कुरार्पणमारभेत ।)

---

१२. अङ्कुरार्पणविधिः

अतः परं प्रवक्ष्यामि चांकुरार्पणलक्षणम् ।
सर्वमङ्गळकार्येषु कर्तव्यं मङ्गळाङ्कुरम् ॥

ध्वजाङ्कुरं तु प्रथमं द्वितीयमागमाङ्कुरम् ।
तीर्थांकुरं तृतीयं स्यात् उत्सवे त्रयमङ्कुरम् ॥

प्रतिष्ठादिनमुद्दिश्य यद्दिने त्वधिवासनम् ।
तद्दिनात् पूर्वरात्रौ तु अङ्कुरार्पणमाचरेत् ॥

नवाहे वाऽथ सप्ताहे पञ्चाहे त्रिदिनेऽथवा ।
सद्योऽधिवासने चैव कुर्यात्सद्योऽङ्कुरार्पणम् ॥

वितानध्वजसंयुक्तद्वारतोरणभूषिते ।
यागालये वायुदिशि चाष्टद्रोणैश्च शालिभिः ॥

पद्मैः षोडशधा भक्तमध्यकोष्ठचतुष्टये ।
तिललाजादिभिस्सप्तधान्यपुञ्जैरलंकृते ॥

त्रिकुम्भमेककुम्भं वा स्थाप्य सूत्राद्यलंकृतम् ।
ईशानादिक्रमेणैव प्रदक्षिणविधानतः ॥

मृत्पूर्णपालिकाश्चैव घटिका वा शरावकान् ।
चतुर्विंशद्द्वादशं वा परितः स्थण्डिलेऽर्पयेत् ॥

पुण्याहं वाचयित्वा तु स्थलशुद्धिं समाचरेत् ।
सकळीकरणं कुर्यात् चन्द्रस्य हृदयादिना ॥

सामान्यर्घ्यं तु संस्थाप्य द्वारपूजां समाचरेत् ।
भूतशुद्धिं ततः कृत्वा अन्तर्यागं समाचरेत् ॥

आत्मपूजां विधायैवं पूर्वोक्तचन्द्रभावतः ।
मध्ये त्वाधारशक्त्यादिपद्मान्तं पूजयेत्ततः ॥

पद्मस्योपरि सोमस्य चासनं परिकीर्तितम् ।
मूर्तिध्यानं च संयुक्तं तन्मूलेनैव देशिकः ॥

आवाह्य स्थापनाद्यैश्च साङ्गं सम्पूज्य भक्तितः ।
धूपदीपादिनैवेद्यजपान्तं संप्रपूजयेत् ॥

पूर्वादिपदमारभ्य पालिकासु यथाक्रमम् ।
वैकर्तनादीनावाह्य गन्धाद्यैः परिपूज्य च ॥

पायसान्नं तु नैवेद्यं जपान्तं पूजयेद्गुरुः ।
शुद्धपात्रे तु संगृह्य क्षीरं वै शक्तिमन्त्रतः ॥

सम्पूज्य तस्मिन् नीवारं मुद्गं माषं तिलं तथा ।
सर्षपं चैव निष्पावं कुळुत्थं धान्यसप्तकम् ॥

एतेषु पञ्च वा त्रीणि क्षाळयेत् शुद्धवारिभिः ।
वीक्षणाद्यैश्च संस्कृत्य संहितामन्त्रतो यजेत् ॥

शैवं बीजमभिध्यात्वा सूक्तैरौषधिकैर्यजेत् ।
धूपदीपादिकं दत्वा पालिकासु यथाक्रमम् ॥

सर्वमङ्गळवाद्यैश्च हृदा मूलाणुना तथा ।
ब्रह्माङ्गैर्जप्यबीजानि सक्षीरं वापयेद्गुरुः ॥

प्रत्यहं कुम्भतोयेन चाप्लाव्य च यथाक्रमम् ।
पुनः कुम्भं शुद्धतोयैः पूरयेत्पुनरर्चयेत् ॥

निर्दिष्टदिवसे प्राप्ते सोममुद्वासयेद्गुरुः ।
अङ्कुरास्तु शुभाश्शुभ्राः कोमला ऊर्ध्वगा मताः ॥

कृष्णाश्च धूम्रवर्णाश्च पिङ्गळा श्यामळा तथा ।
तिर्यग्गताश्च कुब्जाश्च वर्जयेच्छुभकर्मणि ॥

पात्रलक्षणम्

शरावाः पालिकाश्चैव घटिकास्त्रिविधास्स्मृताः ।
सौवर्णं रजतं ताम्रं निर्मितं मृण्मयं स्मृतम् ॥

भिन्नं कृष्णं च सुषिरं दुर्गन्धं च पुरातनम् ।
छिन्नं मलिनसंयुक्तं वर्जयेदङ्कुरार्पणे ।

सुषिरं पुत्रनाशं स्यात् काळञ्च कलहं भवेत् ।
भिन्नं कुलक्षयं विद्यात् पुराणं शत्रुवर्धनम् ।
वर्जयेत् तत्प्रयत्नेन साधयेत् लक्षणान्वितम् ॥

कारणे—

नवबीजानि

मुद्गमाषकुळुत्थं च निष्पावं शिम्बमेव च ।
तिलसर्षपशाल्यश्च सिद्धार्थं नवबीजकम् ॥

सहस्रे—

तिलसर्षभमुद्गानि माषशिवाढकानि च ।
कुळुत्थं यवगोधूमं नवबीजानि संग्रहेत् ॥

गोधूमास्तण्डुलाश्चैव आढका मुद्गकास्तथा ।
चणकाः श्वेतनिष्पावास्तिलमाषाः कुळुत्थकाः ॥

अनङ्कुरन्तु यत्कर्म तत्सर्वं निष्फलं भवेत् ।
तस्मादङ्कुरपूर्वन्तु कर्मणां सम्यगाचरेत् ॥

उत्तमं नवबीजानि सप्तबीजं तु मध्यमम् ।
अधमं त्रीणि बीजानि यथालाभं प्रकल्पयेत् ॥

तिलसर्षपमुद्गानि माषशिम्बाढकानि च ।
कुलुत्थं सप्तबीजानि पञ्च त्रीणि क्षिपेत् सुधीः ॥

मुद्गमाषंकुलुत्थञ्च तिलञ्च सर्षपं तथा ।
एवं तु मध्यमं प्रोक्तं कन्यसं तिलसर्षभम् ॥

वैकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ॥

आदित्यश्च महासूर्यो अंशुमाली दिवाकरः ।
एतान् सम्पूज्य एवोक्तान् भवादींश्च ततश्शृणु ॥

स्थण्डिलं कारयेद्धीमान् अष्टद्रोणैश्च शालिभिः ।
तस्य मध्ये लिखेत्पद्मं अष्टपत्रं सकर्णिकम् ॥

स्थापयेत्कर्णिकामध्ये चन्द्रकुम्भं नवं शुभम् ।
सौवर्णं रजतं वाऽपि पङ्कजं तु अर्धचन्द्रवत् ॥

कुम्भमध्ये तु तोयं स्यात् तोयमध्ये तु पङ्कजम् ।
पङ्कजस्यैव मध्ये तु चन्द्ररूपं प्रशस्यते ॥

निशावर्ज्यं दिवा कुर्यात् सर्वकार्येषु शोभनम् ।
देवानान्तु निशां कुर्यात् अहस्सु वर्जयेत्ततः ॥

नवरात्रे पञ्चरात्रे सप्तरात्राथवापि व ।
त्रिदिने वा ततः कुर्यात् रात्रावङ्कुरमुत्तमम् ॥

भास्करास्तमनात् पश्चात् पञ्चनाड्यास्ततोपरि ।
सुयोगे सुमुहूर्ते च सुनक्षत्रे तिथौ दिने ॥

अङ्कुरार्पणकार्यं तु प्रागुक्तविधिनाचरेत् ।
बीजानामधिपश्चन्द्रः तस्मात् निशि निर्वपेत् ॥

दिवाकाले न कर्तव्या कृतश्चेत् सस्यनाशनम् ।
चन्द्रदृष्टौ पराह्ने वा ततस्सद्योङ्कुरार्पणम् ।
सद्योङ्कुरार्पणं चेत्तु दिवा वा निशि निर्वपेत् ॥

विघ्नेश्वरपूजां विधाय, सङ्कल्प्य, ममोपात्त ... प्रीत्यर्थं शिवशिवशम्भो।.. शुभतिथौ अस्य देवदेवस्य महादेवस्य अम्बासमेत.............. परमेश्वरस्य मया करिष्यमाणनवदिनमहोत्सवमहामङ्गळकर्मणि "मङ्गळांकुरकर्म करिष्ये" तदर्थं समस्तोपकरणशुद्धचर्थं पुण्याहवाचनं च अद्य करिष्ये । पुण्याहं कृत्वा सर्वाणि द्रव्याणि सम्प्रोक्ष्य,

चन्द्रहृदयादिना सकळीकृत्य,
ओं सः अस्त्राय फट् इति हस्ततलपृष्ठौ सम्शोध्य,
ओं सः सोमाय वौषट् इति उभौ सम्योज्य

ों सां सोमाय हृदयाय नमः	अङ्गुष्ठयोः तर्जनीभ्यां
ों सीं सोमशिरसे नमः	कनिष्ठानामिकामध्यमासु
ों सूं सोमशिखायै नमः	तर्जनीभ्यां
ों सैं सोमकवचाय नमः	
ों सौं सोमनेत्राभ्यां नमः	हस्ततलयोः मध्यमांगुलिभ्याम्
ों सः सोम अस्त्राय फट्	तर्जन्योः अंगुष्ठाभ्याम् इति विन्यस्य

कवचेनावकुण्ठ्य, उभौ सम्योज्य, सोमाय वौषट् दक्षिणांगुष्ठ-
नामिकाभ्याम् ।

ओं सां हृदयाय नमः सीं शिरसे स्वाहा
ओं सूं शिखायै वषट् सैं कवचाय हुम्

कण्ठप्रावरणस्तनमध्यान्तं कवचम्

ओं सौं नेत्रेभ्यो वौषट् ओं सः अस्त्राय फट् दशदिक्षु छोटिकया अस्त्रेण दिग्बन्धनं कवचेनावकुण्ठनं विधाय । मूलमन्त्रं सर्वाङ्गेषु महामुद्रया विन्यस्य स्वतनुं सोमरूपं भावयेत् ॥

अर्घ्यम्

ततः अर्घ्यपात्रं अस्त्रेण सम्शोध्य, ललाटमध्यस्फुरदरुणबिन्दुविनिसृतामृतधारया ओं हां अमृतेश्वराय नमः इति गन्धोदकेन आपूर्य, षडङ्गैः (ओं हां हृदयाय नमः...अस्त्राय नमः) मूलमन्त्रेण च सम्पूज्य (ओं अं अमृतेश्वराय नमः) अस्त्रकवचाभ्यां रक्षावकुण्ठनं विधाय अस्त्रेण संरक्ष्य, कवचेन अवकुण्ठ्य,) मूलेन अमृतमुद्रां (धेनुमुद्रां) [illegible]त्वा, अर्घ्यजलेन सर्वाणि द्रव्याणि सम्प्रोक्ष्य ।

स्थण्डिले मध्ये कुम्भं अस्त्रेण सम्प्रोक्ष्य, षडुत्थासनमभ्यर्च्य,

ओं सं सोमासनाय नमः ओं सं सोममूर्तये नमः

[ध्या]नम्—श्वेतवर्णं द्विनेत्रं च श्वेतपद्मोपरिस्थितम् ।
द्विभुजं कुमुदोपेतं प्रभामण्डलमण्डितम् ॥

कृत्तिका दक्षिणे पार्श्वे रोहिणी वामपार्श्वके ।
दुकूलवसनोपेतं सर्वाभरणभूषितम् ॥

(अथवा) श्वेताम्बरान्विततनुं वरशुभ्रवर्णम्
श्वेताश्वयुक्तरथगं सुरसेवितांघ्रिम् ।
दोर्भ्यां धृताभयकरं वरदं सुधांशुम्
श्रीवत्समौक्तिकधरं प्रणमामि चन्द्रम् ॥

(एवं ध्यात्वा विशेषेण सोममूर्तिं प्रपूजयेत् ।)

ओं सां सौं विद्यादेहाय नमः नेत्रेभ्यो नमः पुष्पैः अञ्जलिमापूर्य, सोमो धेनुं सोमो अर्वन्तमाशुम् । सोमो वीरङ्कर्मण्यं ददातु । सादन्यं विदत्थ्यं सभेयम् । पितुश्श्रवणं योददाशदस्मै ।

ओं रं वं यं शं ह्रीं अं अमृतेश्वराय नमः । स्थापिन्या संस्थाप्य, सन्निधान्या सन्निधाप्य, निष्ठुरया निरुद्ध्य, स्वागतार्घ्यं दत्वा, हृदयादि करान्तस्थानेषु,

ओं सां हृदयाय नमः....ओं सः अस्त्राय नमः । मूलेन ऐक्यं विभाव्य अस्त्रेण संरक्ष्य, कवचेनावकुण्ठ्य, मूलेन अमृतमुद्रां महामुद्रां च प्रदर्श्य, नैवेद्यधूपदीपार्घ्यं दत्वा प्रतिपालिकासु मूलमध्याग्रभागेषु,

मूलभागे—त्वन्नो अग्ने वरुणस्य...प्रमुमुग्ध्यस्मत् ।

दशकलात्मने ओं अग्नये नमः

मध्यभागे—आसत्येन ... विपश्यन् ।
घृणिस्सूर्य आदित्यो न प्रभावात्यक्षरम् । मधु क्षरन्ति तद्रसम् ।
सत्यं वै तद्रसमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

द्वादशकलात्मने सूर्याय नमः

अग्रभागे—अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निश्च विश्वशम्भुवमापश्च विश्वभेषजीः ॥

षोडशकलात्मने चन्द्राय नमः

पूर्वादिक्रमेण—

ओं हां वैकर्तनाय नमः	ओं हां लोकसाक्षिणे नमः
ओं हां विवस्वते नमः	ओं हां त्रिविक्रमाय नमः
ओं हां मार्तण्डाय नमः	ओं हां आदित्याय नमः
ओं हां भास्कराय नमः	ओं हां महासूर्याय नमः
ओं हां रवये नमः	ओं हां अम्शुमालिने नमः
ओं हां लोकप्रकाशकाय नमः	ओं हां दिवाकराय नमः

तिलसर्षपमुद्गानि...नवबीजानि संग्रहेत्.।

शुद्धवारिणा प्रक्षाळ्य, क्षीरेण संसिच्य, ओषधीसूक्तं जप्त्वा, संहितया सम्पूज्य, ओं ह्रौं ईशानमूर्धाय नमः...अस्त्राय नमः। शिवबीजमित्यभिसन्धाय निक्षिप्य, पालिकासु आधारशक्ति सम्पूज्य, धूपदीपौ दत्वा, शङ्खमङ्गलध्वनिपूर्वं हृदयेन मूलब्रह्माङ्गैर्वा बीजानि सक्षीरं निक्षिप्य,

पुरुषसूक्तं पावमानं श्रीसूक्तं पञ्चशान्तिकम्।
भूसुरांस्तु समाहूय वेदघोषन्तु कारयेत्॥

ततः पालिकासु बीजानि निर्वापयेत्।

ओं हां वैकर्तनाय नमः	अयं बीजावापः
ओं हां विवस्वते नमः	,, ,,
ओं हां मार्तण्डाय नमः	,, ,,
ओं हां भास्कराय नमः	,, ,,
ओं हां रवये नमः	,, ,,
ओं हां लोकप्रकाशकाय नमः	,, ,,
ओं हां लोकसाक्षिणे नमः	,, ,,
ओं हां त्रिविक्रमाय नमः	,, ,,
ओं हां आदित्याय नमः	,, ,,
ओं हां महासूर्याय नमः	,, ,,

ओं हां अम्शुमालिने नमः अयं बीजावापः

ओं हां दिवाकराय नमः ,, ,,

इत्यादिक्रमेण बीजानि निर्वापयेत् । उपरि शुद्धमृत्तिकया आच्छाद्य सोमकुम्भजलेन आप्यायस्वेति मन्त्रेण आप्लाव्य,

पुनः शुद्धजलेन कुम्भं आपूर्य, स्थिरासनमभ्यर्च्य, (पञ्चासनानि) पायसान्नं निवेद्य, प्रार्थ्य,

द्विभुजममलरूपं सत्कळङ्कं द्विनेत्रम्
कुमुदयुगळहस्तं कोमळं वामपार्श्वे ।
सकलदुरितशान्त्यै साक्षिणं कर्मणां तम्
गगनसहितमूर्तिं विन्यसेत् कुम्भमध्ये ॥

---

१३ रक्षाबन्धनक्रमः

रकारं सर्वमित्युक्तं क्षकारं पापनाशनम् ।
रक्षाशब्दमिति ख्यातं समासात् परिकीर्तितम् ॥

उत्सवे च प्रतिष्ठायां अष्टबन्धनकर्मणि ।
दीक्षायां प्रोक्षणे चैव स्नपनादिषु कर्मसु ॥

अन्यस्मिन् मङ्गळे कार्ये कौतुकं बन्धयेद्बुधः ।
निर्दिष्टदिवसात्पूर्वरात्रौ वाप्यधिवासनम् ॥

अभावात्तद्दिने वापि क्रियापूर्वेऽथवा सुधीः ।
उत्तमं मध्यमं चैव अधमं च त्रिधा भवेत् ॥

तस्याङ्गं देवताग्रे तु पुण्याहं वाचयेत्ततः ।
अधिवासनकुम्भे तु तदग्रे होममाचरेत् ॥

तस्माद्देवं घटे स्थाप्य घटाद्वेरे सुयोजयेत् ।
उत्तमं त्विति विख्यातं मध्यमं होमवर्जितम् ॥

होमकुम्भं विना यत्र सूत्रबन्धं तु कन्यसम् ।
शुद्धपात्रं समादाय तण्डुलान् पूरयेत्ततः ॥

तण्डुलोपरि विन्यस्य नाळिकेरं च निक्षिपेत् ।
नाळिकेरं विशेषेण दीर्घकोणाकृतिं त्यजेत् ॥

शिखाहीनं त्यजेच्चैव नाळिकेरं च निक्षिपेत् ।
स्वर्णैर्वा रजतैर्वापि दुकूलतन्तुना तथा ॥

कार्पासतन्तुना चैव एकविंशतितन्तुभिः ।
तन्तु एकादशं प्रोक्तं सप्ततन्तुश्च कन्यसम् ॥

स्थण्डिले पूजयेच्छक्तिं यन्त्रिकायां त्रितत्त्वकम् ।
भस्माधारे तु मायाख्यं भसिते लकुळीश्वरम् ॥

अनन्तवासुकी चैव दक्षकार्कोटकौस्तथा ।
पद्मश्चैव महापद्मो गुळिकश्शङ्खपालकः ॥

अनन्तादींश्च सूत्रे तु गन्धाद्यैरर्चयेत् क्रमात् ।
पात्रमाच्छाद्य पट्टाद्यैर्मालां तदुपरि न्यसेत् ॥

सर्वालङ्कारसम्युक्तं सर्ववाद्यसमन्वितम् ।
ग्रामप्रदक्षिणं वाथ प्रासादस्य प्रदक्षिणम् ॥

कारयेद्वर्जयेद्वाथ देवेशं पूजयेत्ततः ।
आचार्यो दक्षिणे हस्ते रक्षासूत्रं तु धारयेत् ॥

आचार्यः कौतुकं बध्वा ग्रामसन्धिं न लङ्घयेत् ।
तत्कर्ममन्त्रसिद्ध्यर्थं रक्षाबन्धनमाचरेत् ॥

समाप्तये त्यागकार्यं यागार्थं च व्रतं चरेत् ।
सम्भवे सूतके प्रेते चाशौचं न संस्पृशेत् ॥

रक्षाबन्धनम्

सकळीकृत्य, सामान्यार्घ्यं साधयित्वा स्थण्डिलोपरि स्थालिकायां तण्डुल-ताम्बूल-नाळिकेरं च विन्यस्य, अस्त्रेण संप्रोक्ष्य, कुम्भे शिवमावाह्य, सम्पूज्य, तदग्रे होममाचरेत् । वह्नौ शिवं सम्पूज्य शतमर्धं तदर्धं वा हुत्वा, सुवर्ण-रजत-कार्पास तन्तुं, स्थालिकां, रक्षासूत्राणि भस्मस्थण्डिले विन्यस्य, अस्त्रेण सम्प्रोक्ष्य, निरीक्षणादिशुद्धिं कृत्वा, धेनुमुद्रां प्रदर्श्य ।

स्थण्डिले—ओं ह्रीं आधारशक्तये नमः
स्थालिकायम्—ओं ह्रां आत्मतत्त्वाय नमः
ओं ह्रां विद्यातत्वाय नमः
ओं ह्रां शिवतत्वाय नमः
तण्डुले— ओं ह्रां प्रकृतितत्वाय नमः
भस्माधारे— ओं ह्रां मायातत्वाय ननः
भसिते— ओं ह्रां लकुळीश्वराय नमः
रक्षासूत्रे— ओं ह्रां अनन्ताय नमः...महापद्माय नमः इत्यभ्यर्च्य,

ध्यानम्—एकमुखं द्विनेत्रं च सर्वाभरणभूषितम् ।
अभयं वरदोपेतं अनन्ताख्यस्वरूपकम् ॥

ओं हां अनन्तादि सप्तनागेभ्यो नमः ।

मन्त्रः— नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ।
ये दोरोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदः कृतं तेभ्यस्सर्पेभ्यो नमः ।
या इषवो यातुधानानां ये वा वनस्पतीं रनु ।
ये वा वटेषु शेरते तेभ्यस्सर्पेभ्यो नमः ।

S. SIVAKUMAR

ओं हों ईशानमूर्धाय नमः । ... ओं हः अस्त्राय नमः ।

अनन्तादि सप्तनागेभ्यः नैवेद्य-धूप-दीपार्घ्यं दत्वा, गन्ध-पुष्प-वस्त्र-मालादिभिरलंकृत्य, सम्पातहोमं हुत्वा । प्रायश्चित्ताहुतिं हुत्वा, पूर्णाहुतिं हुत्वा, अग्निस्थदेवं घटे स्थाप्य । घटस्थं लिङ्गे सुयोजयेत् ।

इति उत्तमपक्षः । होमवर्जितं मध्यमपक्षः ।
होमकुम्भवर्जितं सूत्रधारणं अधमपक्षः ।

प्रतिसरं गृहीत्वा दक्षिणांगुष्ठानामिकाभ्यां भस्मयुक्तेन हृदयेन त्र्यम्बकेन त्रिधालिप्य । आचार्यः स्थालिकां आदाय, साधकः अंगुष्ठतर्जनीभ्यां आचार्यस्य दक्षहस्ते ईशानेन विश्वेत्तादि मन्त्रेण बन्धयेत् । बृहत्सा-मेन मन्त्रेण सितभस्मना ग्रन्थि लेपयेत् । भस्म दद्यात् ।

मन्त्रः—विश्वेत्ताते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत्पुरुसंभृतं वस्वपावृणोश्शरभाय ऋषिबन्धवे ॥

मन्त्रः—बृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजश्शुभितमुग्रवीरम् ।
इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥

१४ कुम्भालङ्कारविधिः ।

यवस्तु ब्रह्मदैवत्यं तण्डुलो विष्णुदैवतम् ।
गोधूमं इन्द्रदैवत्यं आढकं चाग्निदैवतम् ॥

माषस्तु यमदैवत्यं सर्षपोऽसुरदैवतम् ।
मुद्गं वरुणदैवत्यं चणकं वायुदैवतम् ॥

निष्पावः सोमदैवत्यं तिलं ईशानदैवतम् ।
एतत् धान्यदैवत्यं तत्तन्मन्त्रेण पूजयेत् ॥

षट्त्रिंशत्प्रस्थपूरितान् कुम्भान् सुवर्णरजतताम्रान् मृण्मयान् वा अस्त्रेण सम्प्रोक्ष्य, उल्लिख्य, स्थण्डिलस्य मध्ये प्रागुदगग्रान् दर्भान् संस्तीर्य,

तेषु उपरि सप्तधान्यानि विधाय, यव-तण्डुल-गोधूम-आढक-माष-सर्षप-मुद्ग-धान्यानि सम्स्थाप्य ।

यवमन्त्रः—वृषासोहँशु-पवते हविष्मान्त्सोमः । इन्द्रस्य भाग ऋतयु-
शतायुः । समावृषाणं वृषभं कृणोतु । प्रियं विशा सर्व-
वीरँसुवीरम् ॥ ओं वृषभाय नमः इति

द्वितीयं तण्डुलम् –अयं कुमारो जरान्धयतु दीर्घमायुः ।
यस्मै त्वँस्तनप्रप्यायायुर्वर्चो यशो बलम् ॥

तृतीयं मुद्गम् —तत्वायामि ब्रह्मणा वन्दमानः तदाशास्ते यजमानो
हविर्भिः । अहेडमानो वरुणेहबोध्युरुशँसमान आयुः
प्रमोषीः ॥ ओं वरुणाय नमः ।

चतुर्थं माषम् — हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो या-
स्विन्द्रः । अग्निँय्या गर्भन्दधिरे विरूपास्तान आप-
शँस्योना भवन्तु ॥ ओं अग्नये नमः ।

पञ्चमं गोधूमम्—इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यच सङ्गिरः । रथी-
तमँरथीनां वाजानाँ सत्पतिं पतिम् ॥
ओं इन्द्राय नमः ।

षष्ठं आढकम् —सोमो धेनुँसोमो अर्वन्तमाशुम् । सोमो वीरङ्कर्मण्यं
ददातु । साधन्यं वितत्थ्यँ सभेयम् । पितुश्श्रवणं
योददाशदस्मै ॥ ओं सोमाय नमः ।

सप्तमं तिलम् — शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शँय्यो-
रभिश्रवन्तु नः ॥ ओं देव्यै नमः ।

इति धान्यानि सम्पूज्य, तेषु उपरि कुम्भं निवेश्य.

हिरण्यपात्रमन्त्रेण कवचात् सूत्रवेष्टनम —

हिरण्यपात्रं मधोः पूर्णं दधाति । मधव्यो सानीति । एकधा ब्रह्मण
उपहरति । एकधैव यजमान आयुस्तेजो ददातु ॥

सूत्रवेष्टनम्

तन्तुत्रयं चैकसूत्रं त्रिसूत्रं वेष्टयेत् सुधीः ।
उत्तमं तिलमात्रं तु मध्यमं यवमानकम् ॥
अधमं गजनेत्रं स्यात् एवं स्यात्सूत्रवेष्टनम् ।
शिवकुम्भे तु संवेष्ट्य पद्मं षोडशपत्रकम् ॥
अष्टविद्येशकुम्भानां पद्मं स्यादष्टपत्रकम् ।
सप्तविंशतिकुम्भानां चतुःपत्रं प्रकीर्तितम् ॥
पञ्चवर्णैश्च सूत्रैश्च सुन्दरं वेष्टयेत्सुधीः ।
सीसेन तन्त्रमन्त्रेण कवचात् सूत्रवेष्टनम् ॥
सीसेन तन्त्रं मनसा मनीषिणः । ऊर्णा सूत्रेण कवयो वयन्ति । अश्विना यज्ञं सविता सरस्वती । इन्द्रस्य रूपं शतमानमायुः ॥ ओं सरस्वत्यै नमः ।

धूपम्

गृहीत्वाऽघोरमन्त्रेण धूपधूमं घटे सुधीः ।
अघोरेभ्य इति मन्त्रेण, धूरसि धूर्विति मन्त्रेण च
ओं शङ्कराय नमः इति धूपयित्वा,

जलपूरणम्

नद्यादिशिवतीर्थेन वस्त्रपूतेन वारिणा ।
इमं मे गङ्गेति मन्त्रेण कुम्भेषु जलपूरणम् ॥
आपो वा इति मन्त्रेण कूर्चेनोत्प्लवनं त्रिधा ।
पवित्रग्रन्थिमुन्मुच्य जलेशं च समर्पयेत् ।
अपः प्रणयतीत्येव जलं तदभिमन्त्रयेत् ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमँसचता परुष्णिया ।
असिक्निया मरुद्वृधे वितस्तयार्जीकीये श्रुणुह्या सुषोमया ॥

अप: प्रणयति । श्रद्धावा आप: । श्रद्धामेवारभ्य प्रणीय प्रचरति । अप: प्रणयति । यज्ञो वा आप: । यज्ञमेवारभ्य प्रणीय प्रचरति । अप: प्रणयति । वज्रो वा आप: । वज्रमेवारभ्य प्रहृत्य प्रणीय प्रचरति । अप: प्रणयति । आपो वै रक्षोघ्नी: । रक्षसामपहत्यै । अप: प्रणयति । आपो वै देवानां प्रियन्धाम । देवानामेव प्रियन्धाम प्रणीय प्रचरति । अप: प्रणयति । आपो वै सर्वा देवता: । देवता एवारभ्य प्रणीय प्रचरति । अप: प्रणयति । आपो वै शान्ता: । शान्ताभिरेवास्य शुचँशमयति । देवोवस्सवितोत्पुनातु । अच्छिद्रेण पवित्रेण । वसोस्सूर्यस्य रश्मिभि: ॥

आपो वा इदँसर्वं विश्वा भूतान्याप: प्राणा वा आप: पशव आपोऽन्नमापोऽमृतमाप: सम्राडापो विराडाप: स्वराडापश्छन्दाँस्यापो ज्योतीँष्यापो यजूँष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवरोम् । ओं विष्णवे नम: वस्त्रपूतेन वारिणा आपूर्य,

सुगन्धद्रव्याणि

एलालवङ्गकर्पूर जातीपत्रं च तत्फलम् ।
उशीरं चम्पकं चैव ह्रीबेरं रोचनां तथा ॥
गन्धं मृगमदं चैव कस्तूरिकां कुसुमं सुमम् ।
सुगन्धवासनाचार प्रवोधनमनोहरा: ॥
सर्वाण्येतानि संमिश्र्य चूर्णीकृत्य विचक्षण: ।
गन्धद्वारेति मन्त्रेण कलशाम्बुनि निक्षिपेत् ॥

गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् । ईश्वरीँसर्वभूतानां तामिहोपह्वये श्रियम् ॥

अन्तःकूर्चम्

षट्त्रिंशद्दर्भसम्युक्तं शिवकुम्भस्य कूर्चकम् ।
पञ्चविंशतिदर्भैश्च वर्धनीकूर्चमीरितम् ॥

दर्भपञ्चदशोपेतं विद्येशानां च कूर्चकम् ।
परिवारादि सर्वेषां कूर्चं विद्येश सन्निभम् ॥

अग्रं वेदांगुलं प्रोक्तं द्व्यंगुलं ग्रन्थिरीरितम् ।
दक्षिणावर्तितं कूर्चं नाळं अष्टादशांगुलम् ॥

आद्यन्तं हस्तमात्रेण अन्तःकूर्चस्य लक्षणम् ।
कूर्चग्रन्थि सरस्वत्यां कूर्चमूले तु पार्वती ॥

कूर्चाग्रे सर्वतीर्थानि सावित्री चाधिदेवता ।
कूर्चाग्रे राक्षसान् घोरान् छिन्धि कर्मविघातिनः ॥

त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि ।
यो रुद्रेति मन्त्रेण कुम्भे कूर्चं विनिक्षिपेत् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधोषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु । ओं रुद्राय नमः इति अन्तःकूर्चं निक्षिप्य,

नवरत्नानि

वज्रं वैडूर्यकं चैव माणिक्कं स्फाटिकं तथा ।
इन्द्रनीलं मरकतं मौक्तिकं च प्रवाळकम् ॥

गोमेधकं चेति नवरत्नानि च विनिक्षिपेत् ।
माणिक्कवज्रवैडूर्यं इन्द्रनीलं प्रवाळकम् ॥

पञ्चरत्नमिदं धीमान् वर्धन्यां तु विनिक्षिपेत् ।
प्रवाळं मौक्तिकं नीलं सर्वकुम्भेषु निक्षिपेत् ॥

विघ्नेशादिककुम्भानां तत्तद्वर्णं विनिक्षिपेत् ।
सहिरत्नानि मन्त्रेण सर्वरत्नानि निक्षिपेत् ॥

स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्र-
मीमहे ॥

कुम्भमध्ये स्थित तोयं तोयमध्ये तु पङ्कजम् ।
पङ्कजस्य तु मध्ये तु पार्वतीपरमेश्वरौ ॥

इति हेमपट्टं निक्षिप्य,

शिवकुम्भे हेमपद्मं वर्धन्यां हेमचोत्पलम् ।
तत्तद्बीजन्तु संलिख्य तोयमध्ये विनिक्षिपेत् ॥

चूतपत्रम्

कुम्भेषु चूतपत्राणि कूर्चतुल्यानि निक्षिपेत् ।
अव्रणानि च दीर्घाणि बहिर्देशे तु विन्यसेत् ॥

इदं विष्णुरिति मन्त्रेण चूतपत्रं विनिक्षिपेत् । बालवृद्धव्रण-
शुष्करहितैः यौवनचतुष्षष्टिदळैः,

वृक्षराजसमुद्भूताः शाखायाः पल्लवत्त्वचः ।
युष्मान् कुम्भेष्वर्पयामि सर्वपापापनुत्तये ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे । ओं
ह्लौं विष्णवे नमः चूतपत्रं निधाय ।

नाळिकरम्

नाळिकेरं चोर्ध्वशिखं मध्यनेत्रं तु पत्रकम् ।
सर्वेषामपि कुम्भानां उत्तमाङ्गं प्रशस्यते ॥
शिरोहीनो भवेत्कुम्भः नाळिकेरो न चेद्यदि ।
शिवस्याऽभिमुखं कुर्यात् शास्त्रविद्देशिकस्स्वयम् ॥

विश्वतश्चक्षुमन्त्रेण नाळिकेरं विनिक्षिपेत् ।

नाळिकेर बालवृद्धरोमरहितं सलक्षणनाळिकेरं,

नाळिकेरसमुद्भूत त्रिणेत्र हर सम्मत ।
शिखया दुरित सर्वं पापं पीडां च मे नुद ॥

विश्वतश्चक्षुरिति मन्त्रेण ओं हां रुद्राय नमः इति नाळिकेरं निधाय ।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यान्नमति सम्पतत्रैर्द्यावा पृथिवी जनयन्देव एका ॥ ओं हां रुद्राय नमः इति नाळिकेरं निधाय ।

वस्त्रम्

कौशेयमुत्तमं प्रोक्तं मध्यमं रक्तपट्टकम् ।
कार्पासवस्त्रमधमं इत्यागमविदो जगुः ॥

शिवकुम्भस्य कौशेयं कराष्टौ च प्रकीर्तितम् ।
तदर्धं वर्धनीवस्त्रं विद्येशानां तदर्धकम् ॥

सप्तविंशति कुम्भानां वस्त्रं विद्येशसन्निभम् ।
सर्वेषामपि कुम्भानां वस्त्रयुग्मं प्रकीर्तितम् ॥

युवासुवासेति मन्त्रेण ओं हैं कवचाय नमः इति कुम्भे संवेष्टय, युवासुवासाः परिवीत आगात् । स उ श्रेयान्भवति जायमानः । तन्धीरासः कवय उन्नयन्ति ॥ स्वाधियो मनसा देवयन्तः ॥

यज्ञोपवीतम्

यज्ञसूत्रद्वयं दद्यात् सौवर्णं राजतन्तु वा ।
कार्पासं वाऽथ विधिवत् सुवर्ज्योतीति मन्त्रतः ॥

सुवर्ज्योतिर्ब्रह्मज्योतिरसि सुवर्धामाऽजोस्यैकपादहिरसि बुद्ध्नियो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिँसीः ॥

ओं हां अस्त्राय नमः इति सुवर्णसूत्रेण कार्पासतन्तुना वा यज्ञोपवीतं धारयित्वा ।

बहिःकूर्चम्

चतुरङ्गुलमग्राणि लम्बितं युक्तमायतम् ।
मूर्धादिपादपर्यन्तं लम्बकूर्चप्रमाणकम् ॥

ओं हां हृदयाय नमः बहिः कूर्चं निक्षिप्य,

गन्धलेपनम्

"अक्षतैश्चन्दनेनाऽपि षड्गन्धैरपि देशिकः"

ओं हां नेत्रेभ्यो नमः षड्गन्धैः समालेपनं विधाय ।

पुष्पाणि

अर्क-चम्पक-पुन्नाग-नन्द्यावर्तं च पाटली ।
बृहती-करवीरं च द्रोणं चैवाष्टपुष्पकम् ॥

त्र्यम्बकमन्त्रेण पुष्पैः अलङ्कृत्य, शिवाय नमः

श्रीरुद्रं चमकं चैव श्री-भू-पुरुषसूक्तकम् ।
पञ्चशान्ति ब्रह्मपञ्च षडङ्गानाञ्च मन्त्रकम् ॥

जप्त्वाऽथ हंसगायत्रीं आसनं मूर्तिमर्चयेत् ।
विद्यादेहात्मके कुम्भे नैवेद्यादिकमर्पयेत् ॥

इति कुम्भालङ्कारविधिः

—:0:—

1) ईशानस्सर्वविद्यानां ईश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधि-पतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ ओं हों ईशानमूर्धाय नमः ॥

2) तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥ ओं हें तत्पुरुषवक्त्राय नमः ॥

3) अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।
ओं हुं अघोरहृदयाय नमः ॥

4) वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः । ओं हिं वामदेवगुह्याय नमः

5) सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् ॥
भवोद्भवाय नमः ॥ ओं हं सद्योजातमूर्तये नमः ॥

6) नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो
विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥
॥ ओं हां हृदयाय नमः ॥

7) अस्मिन् महत्यर्णवेन्तरिक्षे भवाअधि ।
तेषां सहस्रयोजनेवधन्वानि तन्मसि ॥ ओं हीं शिरसे नमः ।

8) या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तनुवा शन्त-
मया गिरिशन्ताभिचाकशीहि ॥ ओं हूं शिखायै नमः ।

9) अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वान् जम्भयन् सर्वाश्च यातुधान्यः ॥
॥ ओं हैं कवचाय नमः ॥

10) त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥
॥ ओं हौं नेत्रेभ्यो नमः ॥

11) प्रमुञ्च धन्वनस्त्वमुभयो रार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः पराता भगवो वप ॥ ओं हः अस्त्राय नमः

हंसगायत्री

अस्य श्री हंसगायत्रीस्तोत्रमहामन्त्रस्य । अव्यक्तपरब्रह्म ऋषिः । अव्यक्तगायत्रीछन्दः । परमहंसो देवता । हं सां बीजम् । हं सीं शक्तिः । हं सूं कीलकम् । परमहंसप्रसादसिद्धयर्थे जपे विनियोगः ॥

हं सां अंगुष्ठाभ्यां नमः ।
हं सीं तर्जनीभ्यां नमः ।
हं सूं मध्यमाभ्यां नमः ।
हं सैं अनामिकाभ्यां नमः ।
हं सौं कनिष्ठिकाभ्यां नमः ।
हं सः करतलकरपृष्ठाभ्यां नमः ।

हं सां हृदयाय नमः ।
हं सीं शिरसे स्वाहा ।
हं सूं शिखायै वषट् ।
हं सैं कवचाय हुं ।
हं सौं नेत्रत्रयाय वौषट् ।
हं सः अस्त्राय फट् ।

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम् ।
पश्यामि तं सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

(देहो देवालयः प्रोक्तो जीवो देवस्सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोहंभावेन पूजयेत् ॥)

हम्सो हम्सः परमहम्सः । हम्सस्सोहं सोहं हम्सः ।

हम्सहम्साय विद्महे परमहम्साय धीमहि ।
तन्नो हम्सः प्रचोदयात् ॥

हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ।
एवं न्यासविधिं कृत्वा ततस्संपुटमारभेत् ॥

ओं हां हीं शिवासनाय नमः ओं हां हीं शिवमूर्तये नमः
(नैवेद्यधूपदीपार्घ्याणि दत्वा)

१५ वृषभप्रतिष्ठा

ध्वजारोहण पूर्वेद्युः रात्रौ अधिवासनक्रियां कारयेत् । ततः शिवं सम्पूज्य विज्ञाप्य विधानाद्यैः वृषस्थानमलंकृत्य, गुरुः उत्तराभिमुखो भूत्वा । अङ्गन्यासादिकं कृत्वा विशेषार्घ्यं सम्पाद्य वृषेशं सम्पूज्य, मुद्गान्न निवेद्य, तस्याग्रे स्थण्डिलं विधाय, मध्ये पद्ममालिख्य कुशैः पुष्पैः परिस्तीर्य नव कलशान् सम्स्थाप्य, मध्यकुम्भे षडुत्थासनमभ्यर्च्य, वृषभं सम्पूज्य पूर्वाद्यष्टदिक्षु ओं उक्षाय नमः गोपतये नमः शृङ्गिणे नमः नन्दिने नमः वृषपतये नमः विषाणिने नमः शङ्कुकर्णाय नमः महोदराय नमः । आसनमूर्तिमूलैः सम्पूज्य आवाह्य, नैवेद्यधूपदीपार्घ्यं दत्वा,

ध्वजपटं उक्तवत् नवहस्तादिकं पञ्चभागैकविस्तारं विस्तारसमं पुच्छं, पुच्छार्धं शिरः सित सूक्ष्मं श्लक्ष्णं कार्पासादिसम्भवं तत् त्रिभागं कृत्वा मध्यभागे वृषभं त्रिभागैकभागे वा समालिख्य, तेन रक्तेन शृङ्गं कर्णाङ्कुराणि पीतेन पुच्छं अक्षिणी श्वेतकृष्णेन कृत्वा तत् पुरस्तात् पूर्णकुम्भ नराश्चादीपं घण्टां श्रीवत्सं स्वस्तिकं शेषमङ्गलरूपाणि च विलिख्य, पुण्याहांभसा पञ्चगव्यादिभिः प्रोक्ष्य, वृषे चलासनं सम्पूज्य, अग्निकार्योक्तमार्गेण होमञ्च विधाय,

बेरशुद्धयनन्तरं स्थण्डिलमध्ये वृषपटं न्यस्त्वा, हेमतूलिकया सूर्यसोममन्त्राभ्यां अक्षिमोचनं वृषभगायत्र्या वा विधाय,

अक्षिमोचनानन्तरं गोदर्शनादि सर्वं विधाय मृद्भिः पञ्चगव्येन शिवाम्भसा च प्रोक्ष्य दर्पणे गव्यादिभिः स्नाप्य, जले अधिवासयेत् । जलादुत्तार्य यागशालायां ध्वजपटमानीय वृषगायत्र्या पञ्चगव्यादिना पुनः प्रोक्ष्य, स्थण्डिले सम्स्थाप्य, वृषे षडुत्थासनं सम्पूज्य मूर्ति ध्यानपुरस्सरं सम्स्थाप्य, धूपदीपौ दत्वा निद्राकुम्भं सम्स्थाप्य वाससा आच्छाद्य उक्षादीन् परितः विन्यस्य पूजयेत् ।

वृषमूले स्थित्वा मूर्धादि पादपर्यन्तं चतुस्त्रिंशत् तत्वानि साधिपानि विन्यस्य तद्यथा,

ओं	हां	सदाशिवतत्त्वाय नमः	अधिपतये	ब्रह्मणे नमः
,,	,,	ईश्वरतत्त्वाय नमः	,,	अनन्ताय नमः
,,	,,	शुद्धविद्यातत्त्वाय नमः	,,	शम्बराय नमः
,,	,,	मायातत्त्वाय नमः	,,	गहनेशाय नमः
,,	,,	कालतत्त्वाय नमः	,,	कालनाम्ने नमः
,,	,,	नियतितत्त्वाय नमः	,,	नियामकाय नमः
,,	,,	कलातत्त्वाय नमः	,,	ज्ञानबिन्दवे नमः
,,	,,	विद्यातत्त्वाय नमः	,,	वेदविज्ञानाय नमः
,,	,,	रागतत्त्वाय नमः	,,	कामदाय नमः
,,	,,	पुरुषतत्त्वाय नमः	,,	सूक्ष्मदेहाय नमः
,,	,,	प्रकृतितत्त्वाय नमः	,,	प्रधानकाय नमः
,,	,,	गुणतत्त्वाय नमः	,,	त्रिदेहाय नमः
,,	,,	बुद्धितत्त्वाय नमः	,,	बुद्धये नमः
,,	,,	अहङ्कारतत्त्वाय नमः	,,	अहंकृतिने नमः
,,	,,	मनस्तत्त्वाय नमः	,,	सङ्कल्पाय नमः
,,	,,	श्रोत्रतत्त्वाय नमः	,,	व्योमचारिणे नमः
,,	,,	त्वक्तत्त्वाय नमः	,,	सर्वाङ्गाय नमः
,,	,,	चक्षुस्तत्त्वाय नमः	,,	प्रकाशकाय नमः
,,	,,	जिह्वातत्त्वाय नमः	,,	महावक्त्राय नमः
,,	,,	नासातत्त्वाय नमः	,,	विलुम्बकाय नमः
,,	,,	वाक्तत्त्वाय नमः	,,	दुन्दुभये नमः
,,	,,	पाणितत्त्वाय नमः	,,	सामदाय नमः
,,	,,	पादतत्त्वाय नमः	,,	रमणाय नमः
,,	,,	पायुतत्त्वाय नमः	,,	तूर्णकृते नमः
,,	,,	उपस्थतत्त्वाय नमः	,,	घनानन्दाय नमः

ओं हां	शब्दतत्त्वाय नमः		अधिपतये	सूक्ष्मनादाय नमः
,, ,,	स्पर्शतत्त्वाय नमः		,,	बलवत्तराय नमः
,, ,,	रूपतत्त्वाय नमः		,,	भानुमते नमः
,, ,,	रसतत्त्वाय नमः		,,	जलदाय नमः
,, ,,	गन्धतत्त्वाय नमः		,,	गन्धाङ्गाय नमः
,, ,,	व्योमतत्त्वाय नमः		,,	सूक्ष्माय नमः
,, ,,	वायुतत्त्वाय नमः		,,	मातरिश्वने नमः
,, ,,	अग्नितत्त्वाय नमः		,,	त्विषांनिधये नमः
,, ,,	जलतत्त्वाय नमः		,,	जलेशाय नमः
,, ,,	पृथ्वीतत्त्वाय नमः		,,	श्रीकण्ठाय नमः

इत्यभ्यर्च्य त्रिखण्डं परिकल्प्य पुष्पमालाप्रतिसरं दत्वा, पूर्ववत् भागत्रयं सङ्कल्प्य, प्रतिभागं पूर्वादिक्रमेण

ओं हां क्ष्मामूर्तये नमः। वह्निमूर्तये नमः। यजमानमूर्तये नमः। अर्कमूर्तये नमः। जलमूर्तये नमः। वायुमूर्तये नमः। इन्दुमूर्तये नमः। आकाशमूर्तये नमः।

उक्ष–गोपति–शृङ्गि–नन्दि–वृषपति–विषाणि–शंकुकर्ण– महोदरान् मूर्त्यधिपान् विन्यस्य जीवन्यासं तन्मूलेन कृत्वा स्थापनाद्युपचारैः संपूज्य, कुण्डे आधारशक्तये नमः इति सम्पूज्य तत्त्वत्रयं सम्पूज्य क्ष्मादिमूर्तिभ्यः तदधिपतिभ्यश्च प्रत्येकं आहुतित्रयं कृत्वा। मूलब्रह्माङ्गैश्च शतमर्धं वा हुत्वा पूर्णां दत्वा शान्तिकुम्भं सम्पूज्य,

गुरुः शान्तिकुम्भहस्तः वृषसमीपं गत्वा शान्तिकुम्भजलेन वृषं सम्प्रोक्ष्य तन्मूलेन कुशमूलमध्याग्रैः भागत्रयं सङ्कल्प्य संस्पृश्य, जप्त्वा, हुत्वा वर्मणावकुण्ठ्य निरुध्य तत्वाधिपान् आज्ञां श्रावयेत्।

मण्डपादिषु मण्डलत्रयं कृत्वा परिचारकं आहूय अस्त्रेण सम्प्रोक्ष्य उष्णीषं उत्तरीयकं च धारयित्वा पटकुम्भादिसहितमुद्धृत्य। पट-कुम्भादिसहितं अस्त्रादि चण्डेशान्तं सर्ववाद्य-वेदघोषैः सह ग्रामप्रदक्षिणं

कृत्वा आलयं प्रविश्य पटं एकस्मिन् अस्त्रराजं एकस्मिन् कुम्भं एकस्मिन् इति स्थण्डिलत्रये निधाय । पुण्याह-पञ्चगव्यार्घ्योदकैः प्रोक्ष्य वृषं कुम्भ-जलेन प्रोक्ष्य उक्षादिघटैरभिषिच्य गन्धाद्यैरलंकृत्य । हविश्चणकादीन् निवेद्य अस्त्रराजमपि तत्कुम्भजलेन अभिषिच्य, अलंकृत्य, निवेद्य, अस्त्र-राजस्य रजनीचूर्णं दत्त्वा स्वयञ्च धृत्वा राज्ञां भक्तानां परिचारकानां सर्वेषां रजनीचूर्णं दापयेत् ।

परमेश्वरं रथादौ समारोप्य शूलमग्रेनयेत् तदग्रतः आचार्यः पृष्ठतः यजमानश्च भक्तजनैः सर्वैः सार्धं सर्ववाद्यसमायुक्तं मङ्गळांकुरसहितं पूर्णकुम्भनानाविध-छत्र-चामर-दीपसहितं दिग्विदिक्षु गीत-नृत्त-बलि-दानपुरस्सरं प्रदक्षिणीकृत्य आलयं प्रविश्य ध्वजस्थाने स्थित्वा पुण्याहां-भसा ध्वजस्तम्भं सम्प्रोक्ष्य शक्त्यादि शक्त्यन्तं अभ्यर्च्य, ध्यानं कुर्यात् ।

एकञ्च पादं द्विभुजं त्रिणेत्रं रोमावळीराजितदर्भरज्जुम् ।
श्वेताङ्गरूपं शुकनासिकान्तं आरूढमब्जासनदण्डदेवम् ॥

दण्डे सदाशिवमावाह्य उपदण्डे ओं हां सूर्याय नमः ।
रज्जौ ओं हां तक्षकाय नमः ।
पटे ओं हां वायवे नमः ।
ध्वजे ओं हां वृषभाय नमः । इति संपूज्य,

ध्वजपटमुद्धृत्य रज्जुना बन्धयित्वा विघ्ननिरसनार्थं असङ्ख्यनाळिकेर-बलिं दत्वा । सुमुहूर्ते नानाविधवाद्यसहितं देशिकः दण्डमूले स्थित्वा भेरीताडनादि–ब्रह्मताळपठनं कृत्वा,

मूर्तिपैस्सह सुमुहूर्ते शीघ्रं आरोपयेत् ।

सव्यक्रमेण रज्जुना सह वेष्टनं कृत्वा । दण्डमूले बन्धयेत् । ततो बलिं दद्यात् ।

नारिकेळप्रमाणं तु पञ्चविंशतिपिण्डकम् ।
तत्पिण्डं प्राशयेन्नारी अपुत्रा पुत्रमाप्नुयात् ।

व्याधिघ्नं सर्वदोषघ्नं वृषोच्छिष्टं शिखिध्वजे ॥
(इति बलिप्राशनफलम्)

भेरीपूजा—ब्रह्मजज्ञानमन्त्रेण प्रथमं ताडयेत् क्रमात्
इदं विष्णुरिति मन्त्रेण द्वितीयं ताडयेत् क्रमात्
त्र्यम्बकेनेति मन्त्रेण तृतीयं ताडयेत् क्रमात् ॥

तन्नादश्रवणात् लोकाः मुच्यन्ते सर्वकिल्बिषैः ।
ततो वादकमाहूय प्रोक्षयेदर्घ्यबिन्दुभिः ॥

कृत्वाशिषं पुष्पमालां धारयित्वा तु तत्करे ।
पुष्पं दत्वा गुरुः पश्चात् सोपि तस्याज्ञया सुमम् ॥

भेरीमध्ये त्रिनिक्षिप्य भेरीं स्कन्धे निधाय च ।
गणेश्वरादितालैश्च ताडयेच्च ततःपरम् ॥

गान्धारादिस्वरोपेतं समताळादिताळकम् ।
नृत्तगीतसमायुक्तं वाद्यध्वनिसमन्वितम् ॥

शिवादिसर्वदेवांश्च अष्टादशगणांस्ततः ।
इन्द्रादिदिक्पतींश्चैव समुद्रान् पर्वतांस्तथा ॥

द्वीपान् पाताळलोकांश्च सर्वानाहूय ताडयेत् ।
देवताह्वानपूर्वं च ध्वजमारोपयेद् गुरुः ॥

एकीकृत्य पटं रज्जुं पश्चात् सव्यक्रमेण तु ।
बन्धयेत् सुदृढेनैव दण्डमूले गुरूत्तमः ॥

तत्पश्चात् वृषकुम्भाद्भिर्दण्डमूलेऽभिषेचयेत् ।
उक्षादिघटतोयैश्च पूर्वादिक्रमतो गुरुः ॥

अभिषिच्य च गन्धाद्यैः पुष्पैर्नानाविधैस्ततः ।
ध्वजस्य मूलदेशे तु वृषभाय बलिं ददेत् ॥

सर्वोपचारैस्सम्पूज्य पश्चाद् विघ्नेशपूर्वकम् ।
शिवं सम्पूज्य विधिवच्चण्डेशान्तं यथाक्रमम् ॥

तदग्रे स्थण्डिले स्थाप्य भेरीं वस्त्रेण वेष्टिताम् ।
पटहं विष्णुदैवत्यं सुषिरं वायुदैवतम् ॥

शब्दं तद्ब्रह्मरूपं स्याद् रूपाभावस्तथैश्वरम् ।
वासुकी चर्मसूत्रं तु वलयौ रविचन्द्रकौ ॥

मातरस्सप्तकीलास्तु प्रहरः स्कन्ददैवतम् ।
अर्चयित्वा सुगन्धाद्यैः हृदयेन विचक्षणः ॥

तत्र प्रयोगः — ध्वजस्तम्भस्य पुरतः व्रीहितण्डुलैः तिललाजैश्च स्थण्डिलं कृत्वा । तदुपरि भेरीं संस्थाप्य, भेरीं अस्त्रेण सम्प्रोक्ष्य, वस्त्र-मालादिभिरलंकृत्य सम्पूज्य,

भेरीमध्ये ओं हां शम्भवे नमः ।
दक्षिणे ओं हां विष्णवे नमः ।
वामे ओं हां ब्रह्मणे नमः ।
कीलेषु मातृभ्यो नमः ।
चर्मणि ओं हां नागाय नमः ।
दक्षिणवृत्ते ओं हां भास्कराय नमः ।
उत्तरवृत्ते ओं हां चन्द्राय नमः ।
उभयपार्श्वयोः आत्मतत्त्वाय नमः ।
विद्यातत्त्वाय नमः ।
शिवतत्त्वाय नमः ।

इत्यभ्यर्च्य, नैवेद्य-धूप-दीपार्घ्याणि दत्वा ॥

---

१६ ध्वजारोहणम्

ओं वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

विघातपादपोन्मूललीलानुभवलिप्सया ।
वन्दे मातङ्गभावेन क्रीडन्तं गणनायकम् ॥

लम्बोदरं श्यामनिभं गणेशं कुठारमक्षस्रजमूर्ध्वगाभ्याम् ।
सलड्डुकं दन्तमधःकराभ्यां वामेतराभ्यां च दधानमीडे ॥

कुङ्कुमवर्णं चतुर्भुजयुगळं नागमुखं
मकुटं सकरण्डम् ।
अंकुशलड्डुकदन्तसुपाशं
वन्दे सदृशं श्रीगणनाथस्वरूपम् ॥

करस्थकदळीचूतपनसेक्षुकमोदकम् ।
बालसूर्यप्रभं वन्दे देवं बालगणाधिपम् ॥

व्योमक्षितिस्वर्गतलस्थितानां हिताय पातालनिवासिनां च ।
विनाशहेतोः सुरविद्विषां च भेरीमहं संप्रति ताडयामि ॥
महाभेरीं ताडयित्वा

सकलभुवनभूतिख्यापनार्थं पुरस्तात्
तदनु मृगविहङ्गप्राणिनां रक्षणाय ।
अनुदिनमभिकांक्षन् उत्सवारम्भभेरीं
हिमगिरिवरकन्याशासनात्ताडयामि ॥

ब्रह्मेन्द्रनारायणरुद्रमूर्ति स्तुत्वा पुरस्तात्पुरशासनस्य ।
चतुष्पदां च द्विपदां विभूत्यै भेरीमहं संप्रति ताडयामि ॥

ब्रह्मेन्द्रविष्णुप्रमुखामराणां प्रीत्यै जगद्राजनृणां विभूत्यै ।
यागादि वासपरमेश्वरस्य यात्रावसिष्ठोत्सवभेरिताड्यम् ॥

तीर्थप्रयोगे मुनिसेवितानां अन्यत्र गूढं त्रिगुणं त्रिणेत्रम् ।
पैशाचभूतं परमं गणानां मार्गेषु मुख्यं मुरभेरि ताड्यम् ॥

अष्टादशानां गणदेवतानां चराचरैः भूतहितेन्द्रतृप्तिम् ।
आगच्छ सेव्यं शिवयागतीर्थं ध्वजस्य उत्थापन भेरिताड्यम् ॥

॥ नवताळम् ॥

गणपतिताळम्

गजमुखवक्त्रं गिरिसुतपुत्रं गणगुणमित्रं गणपतिमीशप्रियम् ।
करधृतपरशुं कङ्कणपाणिं कबलितपद्मरुचिम् ।
सुरपतिवन्द्यं सुन्दरनृत्तं सुरचितमणिमकुटम् ।
प्रणमत देहं प्रकटितनाळं षड्गिरितत्तताळमिदम् ।

लम्बोदरवरगुञ्जासुरक्तकुंकुमवर्णधरम् ।
श्वेतसुश्रृङ्गं मोदकहस्तं प्रीतिसपनसफलम् ।
तत्तत्तन्नयनत्रयवरनागविभूषितनानागणपतिदम् ।
धवळितजलधरधवळितचन्द्रं फणिमणिकिरणविभूषितखङ्गम्

तनुतनुविषहरशूलकपालं हरहरशिवशिव गणपतिमभयम् ।
कटतटविगलितमदजलधितगणपतिवाद्यमिदम् ।

शशिकलित शशिकलितमौळिनं शूलिनम् ।
विमलशुभकमलजलपादुकं पाणिनम् ।
प्रमथगणगुणकथितशोभनं शोभितम् ।
पृथुळभुजसरसिजविषाणकं पोषणम् ।
पनसफलकदळीफलमोदनं मोदकम् ।
प्रणतगुरुशिवतनयगणपतिताळनम् ॥

वृषभताळम्

नमो वृषभरूपाय सितवर्णस्वरूपिणे ।
तीक्ष्णश्रृङ्गाय तुङ्गाय वेदपादाय नन्दिने ॥

वृषभं वृषभं गिरिवरवपुषं
शिववाहन हेतुकरम् ।
जन्तं व्रजन्तं प्रथुलुककुमुदं
दृढकं पुस्थदृढकं पःप्रिय
ताळपुरस्कृतसक्रमणं भवतु ॥

मत्तमतङ्गज बन्धुर संक्रम पङ्कजपिङ्गपदम् ।
जलजल मणिगण समुंदित नटनपरम्
तुङ्गनरङ्गित कञ्चुक संक्यक संख्यपदम्
अम्बुज तुङ्गतनुम् ! मधुकरधृत परिमळ-
बन्धुर संक्रम पङ्कज पिङ्गपदम् ॥

द्वितपद सरसिज घनमदलेपित
धृत युग पद घण्ट चण्ड परशु महिपतीनाम् ॥

वृषभ वृषभ प्रथितोरुभुज
गुरुमञ्जलज गिरिजापयुत प्रमथप्रमथाधिपते
जगदाद्रिगिरौ, इन्द्रः पुष्पं इन्द्रः पुष्पं इन्द्रः
कुत्र कुत्र वृषभ वृषभ व्यालयितुं–प्रतितत्वमोटिं
शिवतर प्रकट प्रकटक हेतुधेनुना, ग्रहगौ ग्रहगौ
ग्रहसित जन्मपठित्वं भोगसुखम्
परमार्थविशेषं पञ्चमहाशब्दं घोषयेत् ॥

तीक्ष्णशृङ्गः शीघ्रपादः शिवस्य वाहनस्य
शिवस्याभिमुखस्थित हेमकिङ्किणी नूपुर लड्डुक
तिलमुद्गमाष गुडान्नप्रियायतने ॥
श्री विष्णुसदृशायतने वृषभेश्वरः शीघ्रं समागच्छताम् ॥

॥ देवताह्वानम् ॥

श्रीमत्सुरासुर-मुनिवर-सिद्ध-विद्याधर-यक्ष-राक्षस-गरुड-गन्धर्व-किन्नर-किंपुरुष-भूत-प्रेत-पिशाच - सिद्ध - योगिनी-डाकिनी - शाकिनी-ब्रह्मराक्षस वीतराग विषमलोचन नर-मृग-पशु-पक्षि-स्थावर-जङ्गम-भूलोक-भुवर्लोक-सुवर्लोक-महोलोक-जनोलोक-तपोलोक - सत्यलोकाभिधान सप्तलोकाश्च

ब्रह्म-गारुडाण्ड वैष्णवाण्ड रुद्राण्ड अन्तरण्ड बहिरण्ड अतल वितल सुतल रसातल तलातल महातल पाताल सप्तपाताल, अनन्त वासुकि तक्षक, कार्कोटक, शङ्खपाल, गुळिक, पद्म, महापद्माद्यष्टमहानाग, महामेरुपर्वत देवपर्वत क्रौञ्चपर्वत उदयपर्वत निषधपर्वत मलयपर्वत विन्ध्यपर्वत कैलासादि महापर्वताश्च ।

लवण इक्षु सुरा सर्पिर्दधि क्षीर शुद्धजलाभिधान सप्तसमुद्राः, गङ्गा यमुना नर्मदा देवकी कौशिकी कावेरी वरुणा शोणानदी सिन्धुरेवा व्यास वसिष्ठ गौतम काश्यप भारद्वज भृगु मार्कण्डेय याज्ञवल्क्य नारद नवग्रह दशदिक्समूह, एकादशरुद्राः द्वादशादित्याष्टवसु त्रयस्त्रिंशत्कोटि देवतागणाश्च चतुर्दशभुवनेश्वर पञ्चब्रह्म पञ्चदशपक्ष षोडशस्वरमन्त्र महामन्त्र हुङ्कार हुं फट्कार स्वाहाकार स्वधाकार नमो वौषट्कार सुखदुःख राजस तामस सात्विक व्यक्ताव्यक्तमहदहङ्कार भूतेन्द्रिय वाक् पाद पाणि पायूपस्थ वचन गमनादान विसर्गानन्द शब्द-स्पर्श-रूप-रस गन्धश्रोत्र त्वक् चक्षुर्जिह्वाघ्राण प्राणापानव्यानोदानसमान नाग-कूर्म-कृकर देवदत्त-धनञ्जय इडा पिङ्गला सुषुम्ना गान्धारी हस्तिजिह्वा अलंपुषा कुहू शङ्खिनो मूलाधार स्वाधिष्ठान मणिपूरक अनाहत विशुद्धि-

आज्ञा बालातप ब्रह्मरन्ध्र हालाहलविषमृगविश्वपदार्थ दृश्यादृश्य गद्यपद्यै बौद्धेय वैशेषिक नैयायिक मीमांसक चार्वाक चाणक्य भरराजहंस वाक्यायमानसप्तरूपाष्टविस्मृति बहुपुराण धर्मशास्त्र तर्कशास्त्र शैवागम-विहित श्रीकण्ठपार्वती ।

भक्तजनमुनिवृषभञ्जन नित्यानन्द नित्यकल्याण गङ्गाधर गणनायक त्रैलोक्यलोकेश्वर श्री वनवल्ली-देवसेनाम्बिकासमेत श्री सुब्रह्मण्यस्य ध्वजारोहणकल्याणसमये समस्तदेवताः समागच्छन्ताम् ॥

श्रीकण्ठः कुण्ठितारिः चिरमवतु भवान् सन्तु सन्तः समृद्धाः
गावो दोहं जुषन्तां बहुविधविभवैः भान्तु वर्णाः सुपूर्णाः ।
द्यौर्दुग्धां वृष्टिमृद्धां भवतु वसुमती सर्वसस्यप्रशस्ता
लोकाः शोकानभिज्ञाः चिरं विजयतां शैवशास्त्रात्कृतार्थाः ॥

श्रीमन्मङ्गलदीथि विविधसङ्गतिसङ्गपटुहपटुरव श्रवणानुमित प्रणमावसरकौतुकापतदम्बरचरकदम्बसरभस गगनागमनश्रमहर मृदुलानिलललितविविधपट्टांशुक प्रांशुक ध्वजराजविराजितविविधकुलशैल-तुल्योत्सेध सौधमालामनोहर विशालतमवीथिकायां यूथिकामल्लिकामालती प्रभृतिललितलताङ्कितपरिसरोद्यानपरम्पराधिरूढप्रौढेतरविविधतरुनिकर विकसितकुसुमसमुदयसमुत्कीर्णगन्धहर मन्दरागमन कावेरी श्रीकरनिकर शिशिरसुरभिपर्यन्तायाम् ॥

अभ्यन्तर निरन्तर विविधमण्टपगोपुरप्राकारादि विराजित शिल्प-विकल्पावलोकनजनित विस्मयजतैश्चर्यवचननिचितकलितकलकलायाम् ॥

अनवरत वेदाध्ययनमुखरमुखैरखिलशास्त्रावलोकन कठोरमतिभि-रावृतवितरणविरचितसुरतरुनिखिलजनजनितशाखैरधिकृत काव्यनाटक-पुराण इतिहासैरविकलानुष्ठितविधिविहित सदाचारविजित वसिष्ठादि-मुनिगणविभवैः विराजितोपकण्ठायाम् ॥

आरामैरभिताल-कदली-पुन्नाग-पूगोत्तरैः श्यामैः विराजितोप-कण्ठायाम् ॥

सङ्गीत प्रवृत्त नृत्त रुद्र गणिका मनोहर विभूषण मणिप्रभाजात बालातप शबलित कुट्टिमणि मयूख षण्डमण्डित चतुर्मुखायां दिव्यान्तरायां अशेष सुरसेवितायां अस्यां मयूरपुर्यां विराजमानस्य श्री वनवल्ली गजवल्ली अम्बा समेत श्री सुब्रह्मण्यस्य राजराष्ट्रायुरारोग्य सौभाग्य बलवर्धके महोत्सवारम्भे गम्भीर मङ्गल सङ्घोषणं करोमि ।

रुद्रः

स्वकट तट गळदसित दानपानोन्मत्त मधुकरकुल कोलाहलाकुलित गीताकर्णन कर्णताळः गणपतिरविघ्नं करोतु ।

विधिमधुमथन शतमखनिखिल सुरवरपद विभव करण हरण यन्त्र नियन्त्र स्वतन्त्र स्वान्त सङ्कल्पः । भूतभविष्यद्वर्तमानात्मक कालत्रितय समस्त वस्तु तत्व विषय नित्य निर्मल ज्ञानः,

मन्त्रपदवर्णभुवन तत्व कलाद्मक षडध्वमूर्ध्नि सन्दृश्यमान बिन्दु-मध्यवर्तित कृशानुमण्डल सुन्दर मन्दिराभ्यन्तर निरन्तर माणिक्य दीपः ।

भक्तजन भुक्तिमुक्ति फलप्रदान केळीरसिकः गरळागळित निजगळ दर्शित निखिल भुवन विषय परमकरुण पारावार प्रभावः ।

शारदाभ्र शुभ्र दंष्ट्राग्रप्रोत मणिभूषणायमान कनक काण्ड धीरवीर घोर वराहात्मक पद्मनाभलोचन गोचर चरणारविन्दद्वन्द्वः ।

स्फटिक सुधासार नित्य निर्मल ज्ञानः व्याघ्रचर्मांबरधरः ।

पञ्चवक्त्रो द्विपञ्चकरः त्रिपञ्चनयनः ।

दक्षिणहस्त स्तोम विन्यस्त शक्तिशूल खड्ग गदा नागः ।

वामकर निकर विधृत पिनाक खट्वाङ्ग खेटकपाल पाशः ।

मृणाळ नाळ धवल कोमळ यज्ञोपवीत परिललित गात्रः । जटा जूट कोटी घटित तरुण शशिधर शकलः गुरुखुरपद विनमित निखिल कुलगिरि मदविदित प्रणवमय निनाद धीर दीर्घघोष श्रवण बधिरीकृत दिगन्त दन्तावळ दन्तधवळ वृषभासनासीन कारुण्यकटाक्ष वीक्षणाभिरामः

रामाधशरीरः रक्षितचतुर्दशभुवनः भुक्तिमुक्तिविभूषितप्रचण्डलीला-चतुरः सर्वलोकशरण्यः वेदान्तवेद्यः जराजन्महीनः जगदभयङ्करचिद्घनः जगत्क्षेमकरशङ्करः रुद्रमूर्तिः शिवास्त्रभूतदिव्यशूल मध्यपत्रे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः । त्वमग्ने रुद्रो असुरो महोदिवस्त्वँशर्धो मारुतं पृक्ष ईशिषे । त्वं वातै-ररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नुत्मना ॥
रुद्रमावाहयामि । सकलाराधनैः शोभनम् ॥

ब्रह्मा

संक्रन्दनादि वृन्दारकबृन्दमुनिजनच्छन्दोऽभिवन्दितपादारविन्दद्वन्द्वः कनकशिखरीशिखरनिपतितामरसरित्स्रोतोजातशोभावह श्वेतोपवीत-विराजमानवक्षस्थलः अतिविशदपक्षविस्तार दूरीकृतक्षीरवारिधिवीची-मालागणहंसवाहनः चराचरवर्गसर्गसततकर्कशकरतलकमलः भूतभविष्य-द्वर्तमानात्मक स्थूलसूक्ष्मसन्निहितप्रकृष्टाप्रकृष्टसमस्तपदार्थस्वरूपावतार-धीरधिषणः पुस्तकाक्षमालाकमण्डलुरुचिरस्रुक्स्रुवालंकृतभुजचतुष्टयः अष्ट-नयनः नवपुण्डरीकषण्डमण्डितचतुर्मुखारविन्दः कुन्दकुमुदमृणाळधवळ-कोमळसरस्वतीयोषिन्नित्यवासस्वच्छन्दमानसः शिवध्यानपरायणः ब्रह्मा शिवास्त्रभूतदिव्यशूल दक्षिणपत्रे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — ब्रह्मजज्ञानं ... विवः ।
ब्रह्माणमावाहयामि । सकलाराधनैः शोभनम् ॥

विष्णुः

धरणीसलिलदहनपवनगगनगन्धरसरूपस्पर्शशब्दादिभावभेदभिन्न विविधचराचरप्रपञ्चात्मक शङ्खचक्रगदाकुशेशयायुधः त्रिविक्रमाक्रान्त-सकलभुवनतलः निजोदरपुटपटलविधृतनिखिलाण्डपण्डः निन्दीकृतयुगान्त-मारुतपटुतरगरुडवाहनः ब्रह्मजन्मनाभीकमलः अखिलजगत्त्राणैकहेतुभूतः

सलिलमग्नकाश्यपीसमुद्धरणधृतवराहरूपः मत्स्यावतार विगाह्यमान-कल्लोलकलिताखिलनिगमः नारसिंह्मनखशिखावदलितहिरण्यवक्षस्स्थलो-च्चलितहलरुधिरधारासम्पादितसन्ध्यारागारविन्दः इन्दिरापाटीरपङ्कल-वक्षस्थलः परमेश्वराज्ञया परिपालितसकललोकः शिवध्यानपरायणः नारायणः विष्णुमूर्तिः शिवास्त्रभूतदिव्यशूल वामपत्रे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — इदं विष्णुः ... सुरे ।

विष्णुं आवाहयामि । सकलाराधनैः शोभनम् ॥

देवी

सुधासागरकुशेशयनिवेशितनवयावकोदितारुणचरणनळिनयुगळाळं-कृतमुक्तमुनिजनमानसा, गुहवदनधयनास्वादसन्धुक्षितपरमानन्दमयस्तन्य-रसामृतगुरुतरस्तनकलशभारनमितशातोदरी, कलितनीलोत्पलकरतल-किसलया, कारुण्यामृतसम्भवसिन्धुसन्धुक्षणदक्षमुखचन्द्रमण्डला, भव-दुरितदहनज्वालावली, सकलजन्तुसन्तापशमनामृतकलशा, मायामय-रजनीजनितमोहमहान्धकारनिरसनमङ्गळमाणिक्यदीपिका, पाशपन्नग-दन्तनिश्चेष्टितपशुपुञ्जसञ्जीवनमहौषधी, साधकसार्थचरितार्थकरण-निपुणकारुण्यामृता, शक्तिलतादेववृन्दनताखण्डजगदण्डनायिका लोका-न्तरसम्भूतप्रभूतप्रकरिचरितरकेसरी सिंहवाहना, परमेश्वरीविग्रहमन्दा-किनीसङ्गतयमुनायमानश्यामळविग्रहा परमेश्वरी देवी शिवास्त्रभूतदिव्य-शूल पालिकामध्ये सन्निहिता प्रसादं करोतु ॥

मन्त्रः — गौरीमिमाय ... परमे व्योमन् ॥

देवीमावाहयामि । सकलाराधनैः शोभनम् ॥

सरस्वती

शरदुदितचन्द्रचन्द्रिकाभिरामसौन्दर्यानन्दिता, बिसकुन्दकुमुदशङ्ख-नीहारलतानिभाङ्गलता, पदनळिनपरागरागयोगिजनहृदयपङ्कजमङ्गळा-लया शारदजलदसङ्काशव्याकोचविशदकुशेशयासना, सकलकलाकल्पित-

निजमणिमेखला, कलापविदळितनळिनासना मौञ्जीमेखलाजिनाषाढ-प्रौढादिब्रह्मचर्याभिनवबिससूत्रयज्ञोपवीतपरिललितगात्रा, चतुरचतुर्भुज-लताकुसुमित अक्षमाला – पुस्तकज्ञानमुद्रा–कमण्डलुरुचिरमण्डना, मुख-नळिनविलसद्दळितरुचिनेत्रत्रया, अङ्गलावण्यकरकिङ्किणीजातमङ्गळा-कारा, शशाङ्कशकलालंकृतकिरीटकोटिमुक्ताफलनिचयकल्पिताकल्प-विकल्पाल्पेतरमहितमहिमा, कबलितजगदण्डमण्डला, सरस्वतीदेवी, शिवास्त्रभूतदिव्यशूलपालिकादक्षिणपार्श्वे सन्निहिता प्रसादं करोतु ॥

मन्त्रः — प्रणो देवी सरस्वती । वाजेभिर्वाजिनीवती । धीना-मवित्र्यवतु । आनो दिवो बृहतः पर्वतादा सरस्वती यजतागन्तु यज्ञम् । हवन्देवी जुजुषाणा घृताची शग्मान्नो वाचमुशती शृणोतु ॥

लक्ष्मीः

सकलकल्याणपुरस्सरपादारविन्दा, करतलविराजमानराजीवयुगळा, पुरुषोत्तमभुजान्तरनिरन्तरवाससंहृता, सकलवदान्यमूर्धन्यकामधेनु-कल्पद्रुम–चिन्तामणि – वितरणप्रकटितपरमौदार्यविभवप्रभवयशोराशि – सदृशसिन्धुराजकन्यका, दीप्तसौन्दर्यसौभाग्यप्रमुखनिखिलसद्गुणलक्षणा, शुद्धाध्वीमध्यगण्यमानविद्येश्वरतत्वस्थितश्रीदेवी शिवास्त्रभूत दिव्यशूल-पालिकावामपार्श्वे सन्निहिता प्रसादं करोतु ॥

मन्त्रः — सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाच-मक्रत । अत्रासखायः सख्यानि जानते भद्रैषां लक्ष्मीः निहिताऽधिवाचि ॥

विनायकः

मेरुमन्दर-निषद-क्रौञ्च-गन्धमादन-हेमकूट-हिमगिरि-कैलास-कुला-चल-तटकेळीविरचितसमयविस्तीर्णसकलभुवनसिद्धार्थजगत्त्राणपरित्राण – परायणः दिक्पालमौळिपरिचार्यमाणपादकमलयुगळः अंकुशाक्षमाला-लड्डुकनिजदन्तरुचिरहस्तः कमलासनप्रमुखनिखिलमुनिवरहृदयध्यान-विमलजलावगाहनहेलातरळरुचिरनयनः कर्णताळप्रभवरुचिरपवनाश्वा-

स्यमानमुक्तिपथिकपान्यसार्थः त्रिपुरविजयधरणीरथनिचितविततप्रत्यूह-व्यूहनाशकः सुरवरगजघटामहान्धकारपटलपाटलपाटनपटुतररथांकुर तरुणचन्द्रग्रहसूर्यनक्षत्रसमूहासन शुण्डादण्डफूत्कारमारुतप्रेरितासन्धुवारि-पूरितनिजपुष्करपुटपटलसलिलरिक्तोदर सप्तसागरपरिपूर्णनिपुणमदप्रवाहः खुरनखरविदळितरिपुनिकरमहाखुवाहनः जगदण्डभाण्डषण्डखण्डप्रचण्ड-लीलाचतुरः, घगघटाकोटिघव्याटोपनियन्त्रणस्वतन्त्रस्वान्तसङ्कल्पः, सकलगणेश्वरो विघ्नेश्वरः शिवाम्बभूनदिव्यशूलकुम्भवदनदक्षिणपार्श्वे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — गणानान्त्वा ... सादनम् ॥

गणपतिमावाहयामि । सकलाराधनैः शोभनम् ॥

सुब्रह्मण्यः

विजृम्भितकुसुम्भवर्ण संभृताडम्बरविविधविभ्रमविग्रहः सव्याप-सव्यकरषट्कधृताखिलरिपुबलकुलकालानलज्वालायमानज्योतिर्मयमहा-शक्तियुक्तशरखड्गखेटक-परशु-प्रासक-कुलिश-कुक्कुट-कार्मुक-पिनाकातोद्य-पताक-पिञ्छयष्टि-अभयवरदयुक्तः ।

सकलसुरसुन्दरीस्वान्तचन्द्रकान्तप्रेमाम्बुदनिष्यन्दकारी सकलसुर-सुन्दरी-बृन्द-निबन्धन-शोकविपयमोक्ष-नवजलदपटलपटुरव-विविधविजयी गजमुख-गळित-रचितमङ्गळातोद्यनृत्तमण्डित-शिखण्डी-प्रकाण्डाञ्चित-महारथः, सौन्दर्यचन्द्रिकामयमधुरमुखचन्द्रमण्डलः नित्यबालः बाल-पराक्रमः सकलविद्याराजहंसविहारगोचरवदनषट्कः निखिलभुवनोपजी-व्यमानप्रसादमयनकरन्दभरद्वादशनयनारविन्दः आर्तिहरः कार्तिकेयः परब्रह्मण्यभूत-सुब्रह्मण्यः शिवाम्बभून-दिव्यशूल कुम्भवदन-वामपार्श्वे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — वायुश्वेत ... सुब्रह्मण्योम् ॥

ब्रह्मण्यमावाहयामि । सकलाराधनैः शोभनम् ॥

शास्ता

अमृतसम्भवसमयसम्भूतसुरासुरविवादशमनोन्मुख दामोदरसमासादितनिखिलजनहृदयमोहन-मोहिनीवेषविशेषलालस गङ्गाधरसम्भूत। निरवद्यनिखिलविद्यागमाद्यनुगुणद्योतितार्य-सेनापति-शास्ता-मदनाभिधान चतुष्टयालंकृत-कृतयुगादिचतुष्टयः मदकरमन्दिरास्वादमुदितयुवतिजन-निजित-तृप्तचित्रकर-प्ररचित-नृत्त-गानसक्त-विविधमधुकर-निजावसथपरिसरप्रदेशः कुञ्चिताकुञ्चितबहुलालकावळी व्याळाडम्बरविडम्बित-नृत्त-मण्डितशिखण्डिमण्डलः तमालदलकोमळश्यामळाकारः मुखनळिन-भ्रमरविभ्रमनयनयुगळः स्वर्णवर्णाम्बरधरः दोर्दण्डमण्डलीभूतप्रचण्डतर-कोदण्डमण्डित निखिलजनजनितनिजयशः करण्डायुधजगदण्डमण्डित। मदसलिलपान-मुदित-मधुकरकुलकोलाहलकुलित-विकटकरट-द्विरदवाहनः सुरासुरनिबन्धननिखिलभुवनमदनशासनो महाशास्ता शिवास्त्रभूतदिव्य-शूलदण्डाग्रे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — अभ्यावर्तध्वमुपमेत साकमयं शास्ताऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनुसंरभध्वमिमं पश्चादनुजीवाथ सर्वे ॥

शास्तारमावाहयामि । सकलाराधनैः शोभनम् ॥

सूर्यः

त्रिभुवनलक्ष्मीमुखमण्डनायमानमण्डलः ग्रहग्रामाभिरामहारनायक-मणिः अखिलश्रुतिशिखरशिखामणिः अरुणकरकलितप्रणवमयस्तोत्र-छन्दोपरि छन्दोमय-हयनिवहनीयमान - द्वादशचक्ररथ-गगनयात्रासूत्रित-लोकत्रितयः वेदत्रितयपवित्रगात्रः विचित्रतरकनकमणिरुचिरकवचावृत-गात्रः कुण्डलमण्डित-रत्नमयूखषण्ड-मण्डित-कपोलमण्डितः अनवरत-विलसितदळनिचयरुचिरनळिनकरयुगळः जगदेकनेत्र। आदित्यः शिवास्त्र-भूतदिव्यशूलदण्डमध्ये दक्षिणपार्श्वे सान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — आसत्येन ... विपश्यन् ॥

सूर्यमावाहयामि । सकलाराधनैः शोभनम् ॥

दुर्गा

मेरु-मन्दर-मलय-विन्ध्यादि-महामहीधर-गुरुशिखरविरचितावसथ-विहितसततसान्निध्या त्रिभुवन-भञ्जनारम्भ-शुम्भ-निशुम्भादि-गम्भीरासुरवरगिरिशकळीकृति - विधृतवरशूल - शङ्ख - चक्र-शर-खड्ग-खेटक-शार्ङ्गालंकृत-सव्येतराष्टभुजयष्टिका विद्रावित - वज्रनिखात - भैरवनख-विदारित-दिग्दन्तिमस्तक-मुक्तमुक्तामणिनिचयसहित सिंहवाहना सुरसैन्यकमलाकरविलोलन-महिषासुर-शिरश्छेद-रुधिरधारा-शीकरस्नपित तनुलतातुलितसान्द्रसन्ध्यारागा सिंहनादसंहतिमहोत्सवसेवाधिदेवता-प्रणतजन–दुर्गतिसंसर्गनिर्गतार्गळ–दुरितनाशिनी दुर्गादेवी शिवास्त्रभूत-दिव्यशूलसौम्यदले सन्निहिता प्रसादं करोतु ॥

मन्त्रः — जातवेदसे ... दुर्गादेवी ... विश्वा ॥

दुर्गाम् आवाहयामि । सकलाराधनैः शोभनम् ॥

क्षेत्रपालः

अनवरतबालरूप = किङ्किणी - कपालमालाभरण डमरुकाङ्कुश-शूल-खड्ग-नागपाश-घण्टा - कपालधर- सव्येतराष्टकभुजयष्टिकसर्वामर-विद्वेष्टित-हृदयकिचयमनःप्रभावः निजदेहनिन्दिताखिलजनमन्मथः नव-घनश्यामसुन्दरः त्रिदिवसुन्दरः कमलासनविमलितदंष्ट्रः दिगम्बरः भक्त-हृदयान्धकारप्रणोदनप्रवीणघनः प्रणवफणिरवकिङ्किणीमेखलकटितटः सुरासुर - चूडामणि - मरीचिनिचय - चुम्बित-चरणपल्लवः समस्तहित-सारमेय-श्वानवाहनः नग्नो नानाभीष्टप्रदान-नानावेषः नागाभरण-भूषितविग्रहः क्षेत्रपालः शिवास्त्रभूतदिव्यशूलदण्डमूले सौम्यसान्निध्यं कृत्वा प्रसादं करोतु ॥

मन्त्रः — क्षेत्रस्य पतिना वयँहितेनेव जयामसि । गामश्वं पोष-यित्न्वा सनो मृडातीदृशे ॥

क्षेत्रपालमावाहयामि । सकलाराधनैः शोभनम् ॥

ईशानतत्पुरुष अघोर - वामदेव-सद्योजातहृदय-शिरश्शिखाकवच-नेत्र-अस्त्राभिधान-पञ्चब्रह्मषडङ्गानि च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

वामा-ज्येष्ठा-रौद्री-काळी-कलविकरणी-बलविकरिणी-बलप्रमथनी-सर्वभूतदमनी-मनोन्मन्यभिधान-नवशक्तयश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

अनन्त-सूक्ष्म-शिवोत्तम-एकनेत्र-एकरुद्र-त्रिमूर्ति-श्रीकण्ठ-शिखण्ड्य-भिधान अष्टविद्येश्वराश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

नन्दी-महाकाळ-भृङ्गि-विनायक-वृषभ-स्कन्द-देवी-चण्डाभिधान चतुर्द्वारपालाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

इन्द्राग्नि यम निरृऋति वरुण वायु कुबेर ईशानाधिान लोकपालाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

वज्रं शक्तिं च दण्डश्च खड्गं पाशं तथांकुशम् ।
गदात्रिशूलं पद्मञ्च चक्रं चेति दशायुधम् ॥
इति दशायुधानि च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम् ।
श्रीवत्सं स्वस्तिकं शङ्खं दीपो देवाष्टमङ्गळम् ॥
इत्यष्टमङ्गळानि च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

महादेवः शिवो रुद्रः शङ्करो नीललोहितः ।
ईशानो विजयो भीमः देवदेवो भवोद्भवः ।
कपालीश इति प्रोक्तो रुद्रा एकादश स्मृताः ॥
इत्येकादश रुद्राश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

वैकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ।
आदित्यश्च महासूर्यो अंशुमाली दिवाकरः ॥
इति द्वादशादित्याश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ।

असिताङ्गो रुरुश्चण्डो क्रोधी चोन्मत्तभैरवः ।
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः ॥
इत्यष्टभैरवाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

संवक्त्रश्च शिखावक्त्रः कुण्डोदरमहोदरः ।
हरिवक्त्रस्त्वजावक्त्रः एकपादस्त्वधोमुखः ॥
इति परिवारभूतगणाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

धरो ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः ।
प्रत्युषश्च प्रभावश्च वसवोऽष्टौ प्रकीर्तिताः ॥
इत्यष्टवसवश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

हिमवान्निषधो विन्ध्यो माल्यवान् पारियात्रकः ।
गन्धमादनमैनाकहेमकूटादयो नगाः ॥
इति कुलाचलाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

अगस्त्यश्च वसिष्ठश्च भारद्वाजः पराशरः ।
गौतमः काश्यपश्चैव कौशिकश्चैव सप्तधा ॥
इत्यादि सप्तऋषिगणाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

देवा दैत्यगणाश्च दानवगणाः सर्वास्तथा राक्षसाः
भूतप्रेतपिशाचकिन्नरगणाः नागाश्च विद्याधराः ।
गन्धर्वा विविधाश्च देवमुनयः सिद्धाश्च योगीश्वराः
आश्वारश्चतुर्योगीश्वरगणाः
इत्यष्टादशगणाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

अनन्त-वासुकी-तक्षक-कार्कोटक-शङ्खपाल-गुळिक-पद्म-महापद्माद्यष्ट-महानागाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥

इत्यष्टदिग्गजाश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

प्रबलतपःप्रभाव-दुर्वार-गर्वपर्वताधिरूढ-प्रौढेतराश्चर्यगाढमूढमानस-कल्पित-जगदण्ड-भाण्ड-दारुण-दावानल-ज्वालायमान-नयन-ज्वलनशिखा-पटलपाटल-जटाजूट-विदळित-फणि-भूषित-जटाधराष्टकोटि-सिद्धलब्ध-सार्ध-साहस-प्रदान-समयाराधन-निबन्धन-समुचित-भीषणाभेद-वेष सप्त-द्वीपशिवचरण-परिचर्यमाण-पुण्यपूर्ण-रक्षाकृतलक्षण पीत-शुक्ल-रक्त-श्याम-कृष्ण-नील-कालवर्ण हंस-वृषभ-मयूर-वैनतेय-महिष-गजवाहनाः स्वस्व-देवताः सन्निधीकृत्य दिव्यायुधधर ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-वाराही-माहेन्द्री-चामुण्डाभिधान सप्तमातरश्च वीरभद्र-विघ्नेश्वराभ्यां सह शिवास्त्रे सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

चतुर्दशभुवन-सम्भूत-प्रभूतैश्वर्य-समाधिबल-हृष्ट अष्टादशगण-समस्त-विन्यस्त-शासनेन बहुमति-रहितासुर-निलयायमान-कोपाडम्बर-तरुणेन्दु-शेखर प्रसाद-पुण्योदय-कटाक्षकृत-सकलभोज्य-भक्षण-मालालंकृत-सकल-गात्रः शिवनिगम-सत्पद निवृत्तगर्व-हृष्टासुरनिवह-दोर्दण्डखण्डनः करुणा-मृतकटाक्षः सकलगणार्चित-निर्माल्यधारी चण्डेश्वरः सान्निध्यं कृत्वा प्रसादं करोतु ॥

क्ष्मा-वह्नि-यजमानार्क-जल-वायु-निशाकर-व्योमाभिधान अष्ट-मूर्तयश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

मदनो भीषणश्चैव स्तम्भनो मोहनस्तथा ।
आश्चर्यस्सुन्दरो वीर्यः शास्तारः अष्टविधास्मृताः ॥

इत्यष्टशास्तारश्च सान्निध्यं कृत्वा प्रसादं कुर्वन्तु ॥

१७ स्वामिमण्टपपूजा

सूर्यश्शान्तिस्सुविद्या तदनु किल तथा सन्निवृत्तिः प्रतिष्ठा
नन्दी काळश्च भृङ्गी करिवदन वृषौ बाहुलेयश्च देवी ।
चण्डो वास्तुश्च लक्ष्मीर्वलरिपुदहनौ कालकुक्षो जलेशाः
वायुःश्रीशो महेशो विधिहरिगणपास्सप्तविंशद्गुरुश्च ॥

शान्ति नन्दि महाकालौ इन्द्रसूर्यस्तथैव च ।
अग्निर्विद्या च भृङ्गी च विघ्नेशो यमवास्तुपौ ॥

निरृतिश्चैव विष्णुश्च निवृत्तिद्वारपा तथा ।
वृषभस्कन्द वरुणौ महालक्ष्मी प्रभञ्जनः ॥

विनायकः प्रतिष्ठा च देवी चण्डकुबेरकौ ।
गुरुरीशश्च ब्रह्मा च इत्येते सप्तविंशतिः ॥

ततः कृतस्नानः कृतनित्याह्निकद्वयः परित्यक्तभोजनः मूर्तिपैस्सहितः मखालयं गत्वा ।

विघ्नेश्वरपूजापुरस्सरं अम्बा समेत परमेश्वरस्य नवदिनमहोत्सव महामङ्गळकर्मणि प्रथमदिवसयागपूजा होमकर्म करिष्ये ।

तदर्थं समस्तद्रव्योपकरणशुद्धचर्थं शुद्धिपुण्याहवाचनं च अद्य करिष्ये । गणानां त्वा ... सादनम् । गणपतिं यथास्थानं प्रतिष्ठापयामि । पुण्याहं वाचयित्वा ।

इन्द्र पावकयोः मध्ये शिवसूर्यं सम्पूज्य, अं ह्लः अस्त्राय फट्, इति हस्त-तल-पृष्ठौ सम्शोद्धय वौषडन्तमूलेन आप्लाव्य,

ओं अ हृदयाय नमः अंगुष्ठयोः तर्जनीभ्यां

ओं अं अर्काय शिरसे नमः ।

भूर्भुवस्सुवरों ज्वालिनी शिखायै नमः

ओं अं हुँ कवचाय नमः
ओं भं भानुनेत्राभ्यां नमः
ओं ह्रः अस्त्राय फट्
ओं ह्रां ह्रीं सः शिवसूर्याय वौषट्

ओं अं हृदयाय नमः । ओं अं शिरसे स्वाहा । ओं अं शिखायै वषट् । ओं अं कवचाय हुं । ओं अं नेत्रत्रयाय वौषट् । ओं अं अस्त्राय फट् । दशदिक्षु चोटिकया अस्त्रेण दिग्बन्धनं कवचेनावकुण्ठनं विधाय ।

सर्वाङ्गेषु मूलमन्त्रं महामुद्रया विन्यस्य स्वतनुं सूर्यरूपं विभावयेत् ।

अर्घ्यपात्रं अस्त्रेण प्रक्षाल्य । ललाटमध्ये स्फुरदरुणबिन्दुविनिस्सृताऽमृतधारया ।

ओं खं खषोल्काय सूर्यमूर्तये नमः इति गन्धोदकेन आपूर्य, रक्तपुष्पाणि निक्षिप्य, अर्घ्यं जानुभ्यां अवनिङ्गतो मस्तकान्तं नीत्वा ।

ओं ह्रां ह्रीं सः शिवसूर्याय नमः । इति दर्शनार्घ्यं दत्वा । षडङ्गैः अभ्यर्च्य, मूलमन्त्रेण सम्पूज्य,

अस्त्रप्राकार कवचावकुण्ठनाभ्यां रक्षां कृत्वा । मूलेन धेनुमुद्रां दर्शयित्वा । तज्जलैः द्रव्यं आत्मानं कुम्भं च अस्त्रेण सम्प्रोक्ष्य, पुष्पक्षेपेण अस्त्रेण विघ्नानुत्सार्य पूजामारभेत् ।

द्वारदक्षिणपार्श्वे	ओं अं दण्डिने नमः
वामपार्श्वे	ओं अं पिङ्गळाय नमः
ईशाने	ओं अं गणपतये नमः
आग्नेय्यां	ओं अं गुरुभ्यो नमः

मध्ये ओं प्रभूतासनाय नमः इति श्वेतपीठमर्चयेत् ।

आग्नेयादिकोणेषु–

ओं अं विमलाय नमः	ओं अं साराय नमः
ओं अं आराध्याय नमः	ओं अं परमसुखाय नमः

इति सित-रक्त-पीत-हरित-सिहरूपाणि विचिन्त्य तदुपरि,

ओं अं पद्माय नमः ओं अं कर्णिकायै नमः

इति सितपद्मं विभाव्य पूर्वादीशान्तकेसरेषु,

ओं रां दीप्तायै नमः ओं रीं सूक्ष्मायै नमः

ओं रुं रुजायै नमः ओं रूं भद्रायै नमः

ओं रें विभूत्यै नमः ओं रैं विमलायै नमः

ओं रों अमोघायै नमः ओं रौं विद्युतायै नमः

कर्णिकायामीशाने—

ओं रः सर्वतोमुख्यै नमः । इति अभ्यर्च्य,

विस्फुरमुद्रां दर्शयित्वा,

मध्ये— ओं अं अर्कासनाय नमः । ओं अं अर्कमूर्तये नमः ।

धवळाम्भोरुहारूढं दाडिमीकुसुमप्रभम् ।
स्फुरद्रक्तमहातेजो वृत्तमण्डलमध्यगम् ॥
अंसासक्तस्फुटश्वेतसनाळाब्जकरद्वयम् ।
एकास्यं चिन्तयेद्भानुं द्विनेत्रं रक्तवाससम् ।
आदित्यबिम्बमध्यस्थं रक्तमूर्तिं सदाशिवम् ॥

आसत्येन ... विपश्यन् ॥

भास्कराय विद्महे महद्द्युतिकराय धीमहि ।
तन्नो आदित्यः प्रचोदयात् ॥

इति ध्यात्वा, अभ्यर्च्य, ओं खं खषोल्काय सूर्यमूर्तये नमः । इति मूर्ति तेजोरूपां विन्यस्य । ओं भं भानुनेत्राभ्यां नमः इति नेत्रं दत्वा । पुष्पैः अञ्जलिमापूर्य, ललाटाकृष्टस्फुरदरुणबिन्दुमञ्जलौ विचिन्त्य,

ओं ह्रां ह्रीं सः शिवसूर्याय नमः । इति अनेन मन्त्रेण तद्व्यापक-मावाहयेत्, हृदा आवाह्य, मुद्रया आवाह्य, स्थापिन्या संस्थाप्य,

सन्निधानमुद्रया सन्निधाप्य, निष्ठुरया निरुद्धय, पद्ममुद्रां प्रदर्श्य, सूर्य-हृदयादि-करान्तस्थानेषु,

ओं हृदयाय नमः । ओं कवचाय नमः ।
ओं शिरसे नमः । ओं नेत्रत्रयाय नमः ।
ओं शिखायै नमः । ओं अस्त्राय नमः ।

मूलेन एकत्वं विभाव्य, रक्षावकुण्ठनं विधाय, मूलेन अमृतमुद्रां, महामुद्रां च विन्यस्य,

ओं श्रीं खषोल्काय सूर्यमूर्तये नमः पाद्यं समर्पयामि ।
ओं श्रीं खषोल्काय सूर्यमूर्तये स्वधा आचमनं समर्पयामि ।
ओं श्रीं खषोल्काय सूर्यमूर्तये स्वाहा अर्घ्यं समर्पयामि ।
ओं श्रीं खषोल्काय सूर्यमूर्तये वौषट् ।

इति पुष्प-दूर्वाक्षतादि दद्यात् ॥

ओं खं खषोल्काय हृदयाय नमः इति हृदयेन अभ्यङ्गादि पूर्वं संस्नाप्य, रक्तवस्त्र-गन्धादिभिः अलंकृत्य,

ओं ह्रां ह्रीं सः शिवसूर्याय नमः ।

पुष्पाञ्जलित्रयेण अभ्यर्च्य, अर्घ्यं दत्वा, पद्ममुद्रां बिम्बमुद्रां च प्रदर्शयेत् ॥
ततः लयाङ्गमभ्यर्च्य, भोगाङ्गपूजार्थं प्रार्थ्य,

आग्नेय्यां ओं ह्रां हृदयाय नमः ।
ईशाने ओं ह्रां शिरसे स्वाहा ।
नैरृते ओं ह्रां शिखायै वषट् ।
वायौ ओं ह्रां कवचाय हुं ।
अग्रे ओं ह्रां नेत्राभ्यां नमः ।
पूर्वादिचतुर्दिक्षु ओं ह्रां अस्त्राय नमः ।

तदनु पूर्वादिदिग्दळाग्रेषु

ओं सं सोमाय नमः । ओं बं बुधाय नमः ।
ओं बृं बृहस्पतये नमः । ओं भं भार्गवाय नमः ।

आग्नेयादिदळाग्रेषु

ओं अं अङ्गारकाय नमः । ओं रं राहवे नमः ।
ओं श शनैश्चराय नमः । ओं कं केतवे नमः ।

इत्यभ्यर्च्य,

ध्यानम्—सोमं कुमुदकुन्दाभं बुधं चामीकरप्रभम् ।
गुरुं गोरोचनाभासं शुक्रं गोक्षीरसन्निभम् ॥
रक्तमङ्गारकं चैव राजावर्तनिभं शनिम् ।
कृष्णं कृताञ्जलिं राहुं केतुं धूम्राहिसन्निभम् ॥
कामरूपधरान्सर्वान् दिव्याभरणभूषितान् ।
वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयप्रदान् ॥
सितपद्मकरं सोमं राहुं केतुं कृताञ्जलिम् ।
अर्धकायोर्ध्वकेशौ च रक्तासृक् रक्तलोचनौ ॥
शनिं दंष्ट्राकराळन्तु राहुं च विकृताननम् ।

इति ध्यात्वा, अभ्यर्च्य, नमस्कारमुद्रां दर्शयित्वा, नैवेद्यधूपदीपार्घ्यं दत्वा । मूलमन्त्रं यथाशक्ति जपित्वा, अर्घ्यपात्रांभसा स्वाहान्तमूलेन भास्कराय समर्प्य, अङ्गानां दशांशं जप्त्वा समर्पयेत् प्रार्थ्य,

ध्यानम्—

दण्ड्याद्यैः सेव्यमानः विमलमुखचतुर्दिक्सहपादासनस्थः
दीप्ताद्यैश्शक्तिजालैः अरुणमणिरुचिः श्रीखषोल्कार्कमूर्तिः ।
साङ्गस्त्राङ्गग्रहर्क्षप्रमुखपरिवृतः श्वेतपद्माधिरूढः
सश्वेताब्जद्विहस्तश्शुभनयनयुतश्शं सुसूर्योऽवतान्नः ॥

इति ध्यात्वा, नमस्कृत्य,

आदित्य सर्वलोकेश अन्धकारनिरोधन ।
शिवयागं करोम्यादौ अनुज्ञां दातुमर्हसि ॥

इति प्रार्थ्य, खषोल्किने स्वाहा । इति पराङ्मुखार्घ्यं दत्वा क्षमस्वेति विज्ञाप्य, अस्त्राय हुं फट् । नाराचमुद्रया अङ्गादि मन्त्रान् उत्थाप्य,

ओं खं खषोल्काय सूर्यमूर्तये नमः ।

इति दिव्यमुद्रया देवे सम्योज्य ।

ततः ऐशान्यां दिशि ओं अं तेजश्चण्डासनाय नमः ।

ओं अं तेजश्चण्डमूर्तये नमः ।

ध्यानम्—चण्डं रक्तं कराळास्यं अब्जाऽभयकरद्वयम् ।
दंष्ट्राकराळदीप्तास्यं जटिनं रक्तवाससम् ॥

ओं अं तेजश्चण्डाय नमः । इति सम्पूज्य, निर्माल्यं निवेद्य, विसृज्य, सौरभावना उत्थाय बहिः निर्गत्य हस्तौ पादौ च प्रक्षाल्य समाचम्य, सकलीकृत्य, निवृत्यर्थं भस्मधारणं कृत्वा, मण्टपं प्रविश्य, उत्तराभिमुखः सकलीकृत्य, सामान्यार्घ्यं साधयेत् अस्त्राय हुं फट् इत्यभिमन्त्र्य, तत्पात्रं गृहीत्वा उत्थाय, मण्टपात् बाह्ये स्थित्वा,

पूर्वद्वारपूजा

पूर्वद्वारतोरण अस्त्रेण सम्प्रोक्ष्य, कवचेनावकुण्ठ्य, तोरणमध्ये

ओं हां शान्तितोरणासनाय नमः ।

ओं हां शान्तितोरणमूर्तये नमः ।

ध्यानम्—नीलवस्त्राङ्गरागश्च द्विभुजं च द्विलोचनम् ।
कराळवदनं श्यामं ध्यायेद्वै शान्तितोरणम् ॥

ओं हां शान्तितोरणाय नमः । ओं हां शान्तितोरणाधिपतये भद्राय नमः ।

उत्तरशाखोर्ध्वे—ओं हां ऋग्वेदासनाय नमः । ओं हां ऋग्वेदमूर्तये नमः ।

ध्यानम्—श्यामवर्णं द्विनेत्रं च एकवक्त्रं चतुर्भुजम् ।
दण्डाक्षमाला ऋग्वेदं अञ्जलीं दधतं भजे ॥

ओं हां ऋग्वेदाय नमः ।

दक्षिणशाखोर्ध्वे—ओं हां कृतयुगासनाय नमः ।
ओं हां कृतयुगमूर्तये नमः ।

ध्यानम्—चतुर्वक्त्रं चतुर्बाहुं चतुःश्रोत्रं महाबलम् ।
सर्वाभरणसम्युक्तं कृताख्यं च युगं भजे ॥

ओं हां कृतयुगाय नमः । इति सम्पूज्य, त्रिशूलेषु, ओं हां पूष्णे नमः । ओं हां धात्रे नमः । ओं हां विधात्रे नमः ।

दक्षिणे—ओं गं गणपतये नमः ।

उत्तरे—ओं ह्रीं सरस्वत्यै नमः ।

मध्ये—ओं ह्रीं महालक्ष्म्यै नमः ।

द्वारोत्तरशाखामूले—ओं हां प्रशान्तासनाय नमः ।
ओं हां प्रशान्तमूर्तये नमः ।

ध्यानम्—प्रशान्तो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

इति ध्यात्वा, ओं हां प्रशान्ताय नमः । इत्यभ्यर्च्य,

द्वारदक्षिणशाखामूले—ओं हां शिशिरासनाय नमः ।
ओं हां शिशिरमूर्तये नमः ।

ध्यानम्—शिशिरो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

इति ध्यात्वा, ओं हां शिशिराय नमः । इत्यभ्यर्च्य,

उत्तरशाखायाम्—ओं हां गङ्गायै नमः ।

दक्षिणशाखायाम्—ओं हां यमुनायै नमः ।

ओं हां भूलोकाय नमः । ओं हां भुवर्लोकाय नमः ।
ओं हां प्रत्यूषाय नमः । ओं हां प्रभासाय नमः ।
ओं हां आदित्याय नमः । ओं हां सोमाय नमः ।
ओं हां भौमाय नमः । ओं हां पूष्णे नमः ।
ओं हां धात्रे नमः । ओं हां विवस्वते नमः ।

द्वारोत्तरपदकुम्भे—

ओं हां अनन्ताय नमः । ओं हां धर्माय नमः ।
ओं हां ज्ञानाय नमः । ओं हां वैराग्याय नमः ।
ओं हां ऐश्वर्याय नमः । ओं हां पद्माय नमः ।

पद्मोपरि—ओं हां शान्तिकलासनाय नमः ।
ओं हां शान्तिकलामूर्तये नमः ।

ध्यानम्—चतुर्वक्त्रा चतुर्बाहुः कृष्णवर्णा महाबला ।
ध्वजाभयाक्षमालाब्जा शान्तिस्सर्पोपवीतिनी ॥

इति ध्यात्वा, ओं ह्यौं शान्तिकलायै नमः । इत्यभ्यर्च्य, नैवेद्यधूपदीपार्घ्यं दत्वा,

ऊर्ध्वोदुम्बरे ओं हां गणपतये नमः
ओं हां सरस्वत्यै नमः । ओं हां महालक्ष्म्यै नमः ।

शान्तिकलशोत्तरे षडुत्थासनं सम्पूज्य,
ओं हां नन्द्यासनाय नमः । ओं हां नन्दिमूर्तये नमः ।

ध्यानम्—रक्तो नन्दी चतुर्बाहुः एकवक्त्रस्त्रिदृक् जटी ।
साक्षसूत्रत्रिशूली च वराभयकरान्वितः ॥

ओं हां नन्दिने नमः । इत्यभ्यर्च्य नै-धू-दी. दत्वा

द्वारोत्तरशाखायां ओं हां गङ्गायै नमः

द्वारदक्षिणकुम्भे ओं हां अनन्ताय नमः । ओं हां पद्माय नमः ।

पद्मस्योपरि ओं हां महाकाळासनाय नमः
ओं हां महाकाळमूर्तये नमः

ध्यानम्—त्रिणेत्रः पीनकृष्णाङ्गः बभ्रुश्मश्रुशिरोरुहः ।
मुण्डखड्गौ खेटशूले महाकाळो वहन् करैः ॥

इति ध्यात्वा, ओं हां महाकाळाय नमः । इति आवाहनादि धेनुमुद्राः प्रदर्श्य नै. धू. दी. दत्वा ।

दक्षिणशाखायां ओं हां यमुनायै नमः ।
अथोदुम्बरे ओं हः अस्त्राय द्वारपालाय नमः । ओं हां कवर्गाय नमः
अधिदेवतात्वेन ओं हों ईशानाय कारणेश्वराय नमः ।
अधिष्ठातृत्वेन ओं हें तत्पुरुषवक्त्राय नमः इति सम्पूज्य,
द्वारोपरिस्थितध्वजे ओं हां कुमुदासनाय नमः ।
ओं हां कुमुदमूर्तये नमः ।

ध्यानम्—कुमुदं पूर्वदिग्भागे सितवर्णं विभावयेत् ।
द्विलोचनं द्विबाहुं च वराभयकरान्वितम् ॥

इति ध्यात्वा ओं हां कुमुदाय नमः । इत्यावाह्य, आवाहनादिकं विधाय
अग्निकोणध्वजे ओं हां कुमुदाक्षासनाय नमः ।
ओं हां कुमुदाक्षमूर्तये नमः ।

ध्यानम्—आग्नेय्यां कुमुदाक्षं च दशभानुसमप्रभम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ॥

इति ध्यात्वा ओं हां कुमुदाय नमः । आवाहनाद्युपचाराणि कृत्वा, तोरणमध्ये, दक्षिणद्वारतोरणं अस्त्रेण सम्प्रोक्ष्य, कवचेनावकुण्ठ्य,
ओं हां भूतितोरणासनाय नमः
ओं हां भूतितोरणमूर्तये नमः ।

ध्यानम्—श्वेतवस्त्राङ्गरागञ्च द्विभुजं च द्विलोचनम् ।
भूतितोरणमाख्यातं स्थूलग्रीवमहं भजे ॥

इति ध्यात्वा, ओं हां भूतितोरणाय नमः ।
भूतितोरणाधिपतये ओं हां विजयाय नमः ।
तोरणशाखयोः पूर्वशाखोर्ध्वे—
ओं हां यजुर्वेदासनाय नमः ।
ओं हां यजुर्वेदमूर्तये नमः ।

ध्यानम्—रक्तवर्णं द्विनेत्रं च शुक्लयज्ञोपवीतिनम् ।
स्रुक्कुण्डिकाञ्जलिभृतं यजुर्वेदं विभावयेत् ॥

ओं हां यजुर्वेदाय नमः । आवाहनादिकं विधाय,

पश्चिमशाखोर्ध्वे—ओं हां त्रेतायुगासनाय नमः ।
ओं हां त्रेतायुगमूर्तये नमः ।

ध्यानम्—त्रेतायुगं रक्तवर्णं एकवक्त्रं द्विलोचनम् ।
सौम्यं प्रसन्नवदनं खड्गखेटधरं भजे ॥ इति ध्यात्वा,

ओं हां त्रेतायुगाय नमः । आवाहनादिकं विधाय,
त्रिशूलेषु—ओं हां भवाय नमः । ओं हां पर्जन्याय नमः ।
ओं हां इन्द्राय नमः ।

दक्षिणे—ओं गं गणपतये नमः ।
उत्तरे —ओं ह्रीं सरस्वत्यै नमः ।
मध्ये —ओं ह्रीं महालक्ष्म्यै नमः ।
द्वारपूर्वशाखामूले-ओं हां पर्जन्यासनाय नमः । ओं हां पर्जन्यमूर्तये नमः ॥

ध्यानम्—पर्जन्यो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥
इति ध्यात्वा, ओं हां पर्जन्याय नमः । आवाहनादिकं विधाय ।
द्वारपश्चिमशाखामूले—ओं हां अशोकासनाय नमः ।
ओं हां अशोकमूर्तये नमः ।

ध्यानम्—अशोको रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥
इति ध्यात्व, ओं हां अशोकाय नमः । आवाहनादिकं विधाय,
पूर्वशाखायाम्—ओं हां नर्मदायै नमः ।
पश्चिमशाखायाम्—ओं हां सरस्वत्यै नमः ।
पूर्वपश्चिमशाखयोः—क्रमेण ओं हां सुवर्लोकाय नमः ।
ओं हां महर्लोकाय नमः ।
ओं हां अजघन्याय नमः ।

ओं ह्रां जघन्याय नमः ।
ओं ह्रां भौमाय नमः ।
ओं ह्रां बुधाय नमः ।

इति सम्पूज्य, नैवेद्य-धूप-दीपादीन् दत्वा,

द्वारपूर्वकुम्भे—ओं ह्रां अनन्ताय नमः ... ओं ह्रां पद्माय नमः ।

पद्मस्योपरि—ओं ह्रां विद्याकलासनाय नमः ।

ओं ह्रां विद्याकलामूर्तये नमः ।

ध्यानम्—रक्तवर्णा कपर्देन्दु त्रिवक्त्रा च चतुर्भुजा ।
शक्त्याभयाक्षमालाब्जा विद्या ज्वलनसन्निभा ॥

ओं ह्रीं विद्याकलायै नमः । आवाहनादिपूजां विधाय, नैवेद्य-धूप-दीपार्घ्यं दत्वा,

विद्याकलशपूर्वकुम्भे—ओं ह्रां अनन्ताय नमः ... ओं ह्रां पद्माय नमः ।

पद्मस्योपरि—ओं ह्रां भृङ्ग्यासनाय नमः । ओं ह्रां भृङ्गिमूर्तये नमः ।

ध्यानम्—भृङ्गिणं रक्तवर्णं च निर्मांसंचास्थिरूपकम् ।
त्रिपादं च त्रिनेत्रं च जटामकुटमण्डितम् ॥

ओं भृङ्गिणे नमः । आवाहनादिकं विधाय, नैवेद्य-धूप-दीपादीन् दत्वा,

द्वारपूर्वशाखायाम्—ओं ह्रां सिन्धवे नमः ।

द्वारपश्चिमकुम्भे—षडुत्थासनं सम्पूज्य,

ओं ह्रां विनायकासनाय नमः । ओं ह्रां विनायकमूर्तये नमः ।

ध्यानम्—त्रिणेत्रो वामनाकारो गजवक्त्रो महोदरः ।
पाशाङ्कुशौ स्वदन्तं च पक्वमाम्रफलं वहन् ॥
शुण्डावामकराभ्यां च रक्ताङ्गः स्याद्विनायकः ।

इति ध्यात्वा, ओं ह्रां विनायकाय नमः : आवाहनादि-नैवेद्य-धूप-दीपादीन् दत्वा,

द्वारपश्चिमशाखायाम्—ओं ह्रीं सरस्वत्यै नमः ।

अथोदुम्बरे—ओं हः अस्त्राय द्वारपालकाय नमः ।

कवाटयोः—ओं हां चवर्गाय नमः । टवर्गाय नमः ।
अधिदेवतात्वेन
ओं ह्रूं रुद्राय कारणेश्वराय नमः ।
अधिष्ठातृत्वेन ओं हां अघोरहृदयाय नमः ।
द्वारोपरिस्थितध्वजे—ओं हां पुण्डरीकासनाय नमः ।
ओं हां पुण्डरीकमूर्तये नमः ।
ध्यानम्—भृङ्गाभं पुण्डरीकाख्यं दक्षिणस्यां दिशि ध्वजे ।
द्विलोचनमहं वन्दे दण्डाऽभयकरान्वितम् ॥
इति ध्यात्वा, ओं हां पुण्डरीकाय नमः । इति सम्पूज्य, सर्वेभ्यः
द्वारपालेभ्यः नवेद्य-धूप-दीपार्घ्यं दत्वा,
निर्ऋतिकोणध्वजे—ओं हां वामनासनाय नमः ।
ओं हां वामनमूर्तये नमः ।
ध्यानम्—वामनं नैर्ऋते देशे भिन्नाञ्जनसमप्रभम् ।
द्विलोचनं द्विबाहुं च दण्डाऽभयकरान्वितम् ॥
ओं हां वामनाय नमः । इति सम्पूज्य, नैवेद्य-धूप-दीपार्घ्यं दत्वा ।

पश्चिमद्वारपूजा

पश्चिमद्वारतोरणं अस्त्रेण सम्प्रोक्ष्य
कवचेनावकुण्ठ्य, तोरणमध्ये—
ओं हां बलतोरणासनाय नमः ।
ओं हां बलतोरणमूर्तये नमः ।
ध्यानम्—रक्तवर्णं द्विनेत्रं च नागयज्ञोपवीतिनम् ।
कृताञ्जलिपुटोपेतं ध्यायामि बलतोरणम् ॥
ओं हां बलतोरणाय नमः । बलतोरणाधिपतये वज्राय नमः ।
तोरणशाखयोः दक्षिणशाखोर्ध्वे—
ओं हां सामवेदासनाय नमः । ओं हां सामवेदमूर्तये नमः ।

ध्यानम्—श्वेतवर्णं द्विनेत्रं च हेमयज्ञोपवीतिनम् ।
ब्रह्मास्त्रगण्डिकायुक्तं सामवेदं कृताञ्जलिम् ॥

ओं हां सामवेदाय नमः ।

उत्तरशाखोर्ध्वे—

ओं हां द्वापरयुगासनाय नमः । ओं हां द्वापरयुगमूर्तये नमः ।

ध्यानम्—द्वापरं पीतवर्णाभं एकवक्त्रं द्विलोचनम् ।
सौम्यं प्रसन्नवदनं खड्गखेटधरं भजे ॥

ओं हां द्वापरयुगाय नमः ।

त्रिशूलेषु—ओं हां अर्यम्णे नमः । मित्राय नमः । त्वष्ट्रे नमः ।

दक्षिणोत्तरमध्ये—दक्षिणे-गणपतये नमः ।
उत्तरे-सरस्वत्यै नमः ।
मध्ये-महालक्ष्म्यै नमः ।

द्वारदक्षिणपताकायाम्—

ओं हां भूतसञ्जीवनाय नमः । ओं हां भूतसञ्जीवनमूर्तये नमः ।

ध्यानम्—भूतसञ्जीवनो रक्तः द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

ओं हां भूतसञ्जीवनाय नमः ।

उत्तरपताकायाम्—ओं हां अमृतसञ्जीवनासनाय नमः ।
ओं हां अमृतसञ्जीवनमूर्तये नमः ।

ध्यानम्—अमृतो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

ओं हां अमृतसञ्जीवनाय नमः । इति ध्यात्वा, सम्पूज्य,

शाखयोः—ओं हां जनोलोकाय नमः । ओं हां तपोलोकाय नमः ।
ओं हां विधात्रे नमः । धात्रे नमः । शुक्राय नमः ।
इत्यभ्यर्च्य,

द्वारदक्षिणकुम्भे—ओं हां निवृत्तिकलासनाय नमः ।
ओं हां निवृत्तिकलामूर्तये नमः ।

ध्यानम्—तप्तचामीकरच्छाया चतुर्वक्त्रेन्दुभूषिता ।
वज्राऽभयाक्षमाला च निवृत्तिः परिकीर्तिता ॥ ८
ओं हां निवृत्तिकलायै नमः ।
तद्दक्षिणकुम्भे—ओं हां वृषभासनाय नमः । ओं हां वृषभमूर्तये नमः ।
ध्यानम्—वृषो वृषाकृतिः त्र्यक्षः रुद्रैकगतमानसः । ९
साक्षाद्धर्मस्वरूपस्स्यात् शुद्धस्फटिकनिर्मलः ॥
ओं हां वृषभाय नमः । आ. कृत्वा,
द्वारोत्तरकुम्भे—ओं हां स्कन्दासनाय नमः । ओं हां स्कन्दमूर्तये नमः ।
ध्यानम्—चतुर्भुजो बालवेषः स्कन्दः कनकसप्रभः । १०
शक्तिकुक्कुटहस्तस्स्यात् वराभयकरान्वितः ॥
ओं ह्लां स्कन्दाय नमः । आवाहनादि कृत्वा,
अथोदुम्बरे—ओं ह्लां अस्त्राय द्वारपालाय नमः ।
कवाटयोः—तवर्गाय नमः । पवर्गाय नमः ।
अधिदेवतात्वेन—ओं हां ब्रह्मणे कारणेश्वराय नमः ।
अधिष्ठातृत्वेन—सद्योजातमूर्तये नमः । इति सम्पूज्य,
द्वारोर्ध्वध्वजे—ओं हां शङ्खकर्णासनाय नमः ।
ओं हां शङ्खकर्णमूर्तये नमः ।
ध्यानम्—वारुण्यां शङ्खकर्णं च दिशिनक्षत्रसन्निभम् ।
दण्डाभयकरान्वितम् ॥
द्विलोचनं द्विबाहुं च
ओं हां शङ्खकर्णाय नमः ।
वायुकोणध्वजे—ओं हां सर्वनेत्रासनाय नमः । ओं हां सर्वनेत्रमूर्तये नमः ।
ध्यानम्—वायव्यां सर्वनेत्रं च रक्तवर्णं महाबलम् ।
द्विलोचनं द्विबाहुं च दण्डाऽभयकरान्वितम् ॥
ओं हां सर्वनेत्राय नमः । एतेषां नैवेद्य-धूप-दीपार्घ्याणि दद्यात् ।
पश्चिमद्वारपालेभ्यः स्वाहा अर्घ्यं दत्वा,

उत्तरद्वारपूजा

उत्तरद्वारतोरणं अस्त्रेण सम्प्रोक्ष्य, कवचेनावकुण्ठ्य,

तोरणमध्ये—ओं ह्रां आरोग्यतोरणासनाय नमः ।

ओं ह्रां आरोग्यतोरणमूर्तये नमः ।

ध्यानम्—द्विभुजं च द्विनेत्रं च पार्श्वयोः लम्बकेशिनम् ।
दंष्ट्राकराळवदनं आरोग्यतोरणं भजेत् ॥

आरोग्यतोरणाय नमः । अधिपतये नीललोहिताय नमः ।

तोरणशाखयोः पूर्वशाखोर्ध्वे—

ओं ह्रां अथर्वणवेदासनाय नमः । ओं ह्रां अथर्वणवेदमूर्तये नमः ।

ध्यानम्—कृष्णं चतुर्भुजं त्र्यक्षं कमण्डल्वक्षसूत्रिणम् ।
अथर्ववेदं हस्ताभ्यां अञ्जलिं दधतं भजे ॥

ओं ह्रां अथर्वणवेदाय नमः ।

पश्चिमशाखोर्ध्वे—ओं ह्रां कलियुगासनाय नमः ।

ओं ह्रां कलियुगमूर्तये नमः ।

ध्यानम्—नीलवर्णं कलियुगं खड्गखेटकतोरगान् ।
धारिणं रौद्रवदनं धर्माधर्मविवर्जितम् ॥

ओं ह्रां कलियुगाय नमः ।

दक्षिणे—गणपतये नमः । उत्तरे—सरस्वत्यै नमः ।

मध्ये—महालक्ष्म्यै नमः ।

त्रिशूलेषु—विष्णवे नमः । सवित्रे नमः । अंशुमते नमः ।

द्वारपश्चिमपताकायाम्—धनदासनाय नमः । धनदमूर्तये नमः ।

ध्यानम्—धनदो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटश्चैव नानाभरणभूषितः ॥

धनदाय नमः ।

पूर्वपताकायाम्—श्रीप्रदासनाय नमः । श्रीप्रदमूर्तये नमः ।

ध्यानम्–श्रीप्रदो रक्तवर्णश्च द्विभुजश्च द्विलोचनः ।
कृताञ्जलिपुटोपेतः नानाभरणभूषितः ॥
श्रीप्रदाय नमः ।
पश्चिमपताकायाम्—कावेर्यै नमः । ओं सत्यलोकाय नमः । ध्रुव-
लोकाय नमः । आवाहाय नमः । विवाहाय नमः । प्रत्यूषाय नमः ।
प्रभासाय नमः । राहवे नमः । केतवे नमः । इत्यभ्यर्च्य,
द्वारपश्चिमकुम्भे—अनन्ताय नमः ... पद्माय नमः ।
तदुपरि—प्रतिष्ठाकलासनाय नमः । प्रतिष्ठाकलामूर्तये नमः ॥
ध्यानम्–शुद्धस्फटिकसङ्काशा चैकवक्त्रा चतुर्भुजा ।
वज्राभयाक्षमाला च प्रतिष्ठा रत्नभूषिता ॥
प्रतिष्ठाकलायै नमः ।
प्रतिष्ठापश्चिमकुम्भे – ओं अनन्ताय नमः... पद्माय नमः । १२
तदुपरि—देव्यासनाय नमः । देवीमूर्तये नमः ।
ध्यानम्–सिंहोपरिस्थिता पीता शूलादर्शकरद्वया ।
करण्डमकुटोपेता मुक्तादिभिरलंकृता ॥
देव्यै नमः । आवाहनादिकं कृत्वा ।
द्वारपूर्वकुम्भे—ओं अनन्ताय नमः ... पद्माय नमः । १३
तदुपरि–चण्डेश्वरासनाय नमः । चण्डेश्वरमूर्तये नमः ।
ध्यानम्–चण्डेश्वरं चतुर्बाहुं चतुर्वक्त्रं त्रिलोचनम् ।
विभ्रत्कमण्डलुं शूलं अक्षसूत्रं परश्वधम् ।
विभ्रत्कमण्डलुं शूलं अक्षसूत्रं परश्वधम् ॥
आसनं पद्मपीठञ्च हरपादाब्जसेविनम् ॥
आसनं पद्मपीठञ्च हरपादाब्जसेविनम्,
ओं हां चण्डेश्वराय नमः । आवाहनादिकं कृत्वा,
ओं हां भद्रायै नमः । अथोदुम्बरे—ओं हां अस्त्राय द्वारपालाय नमः ।
कवाटे—ओं हां यवर्गाय नमः । शवर्गाय नमः ।
अधिदेवतात्वेन—विष्णवे कारणेश्वराय नमः ।
अधिष्ठातृत्वेन—वामदेवगुह्याय नमः । इति सम्पूज्य,

द्वारोर्ध्वध्वजे—ओं हां सुमुखाय नमः ।

ध्यानम्—सुमुखं षट्पदप्रख्यं कौबेरे दिशि संस्थितम् ।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥

सुमुखाय नमः ।

ईशानकोणध्वजे—ओं हां सुप्रतिष्ठितासनाय नमः ।
ओं हां सुप्रतिष्ठितमूर्तये नमः ।

ध्यानम्—शशाङ्कधवलं ध्यायेत् ईशाने सुप्रतिष्ठितम् ।
द्विलोचनं द्विबाहुं च दण्डाऽभयकरान्वितम् ॥

सुप्रतिष्ठिताय नमः । एतेषां नैवेद्य-धूप-दीपार्घ्याणि कृत्वा,
'उत्तरद्वारपालेभ्यस्स्वाहा' भवद्भिः यज्ञरक्षकत्वेन स्थातव्यं आहितादरैः ।
इति विज्ञाप्य, अर्घ्यं दत्वा, पूर्वादिदिक्षु—ओं हां हेतुघ्नाय नमः ।
ओं हां त्रिपुरघ्नाय नमः । ओं हां वह्निचास्याय नमः । ओं हां यम-
जिह्वाय नमः । ओं हां काळाय नमः । ओं हां कराळिने नमः ।
ओं हां एकांघ्रये नमः । ओं हां भीमाय नमः । इति क्षेत्रपालान्
सम्पूज्य, सन्तुष्टान् परिभाव्य,

मध्याकाशोपरिध्वजे—ओं हौं शान्त्यतीतकलासनाय नमः ।
ओं हौं शान्त्यतीतकलामूर्तये नमः ।

ध्यानम्—शुद्धस्फटिकसङ्काशा पञ्चवक्त्रा चतुर्भुजा ।
पाशाभयाक्षमालाब्जा शान्त्यतीत वरप्रदा ॥ इति ध्यात्वा,

ओं हौं शान्त्यतीतकलायै नमः । इति सम्पूज्य,

पूर्वद्वारोत्तरस्तम्भमारभ्य—

ओं हां वैकर्तनाय नमः ।
" " विवस्वते नमः ।
" " मार्तण्डाय नमः ।
" " भास्कराय नमः ।
" " रवये नमः ।
" " लोकप्रकाशकाय नमः ।

ओं हां लोकसाक्षिणे नमः ।
" " त्रिविक्रमाय नमः ।
" " आदित्याय नमः ।
" " सूर्याय नमः ।
" " अंशुमालिने नमः ।
" " दिवाकराय नमः ।

इति सम्पूज्य ।

कम्पेषु—ओं हां पृथ्वीतत्वाय नमः ।

ओं हां पृथ्वीतत्वाधिपतये ब्रह्मणे नमः ।

तृणेषु—ओं हां अप्तत्वाय नमः । ओं हां अप्तत्वाधिपतये विष्णवे नमः ।

बन्धेषु—ओं हां तेजस्तत्वाय नमः ।

ओं हां तेजस्तत्वाधिपतये रुद्राय नमः ।

वंशेषु —ओं हां वायुतत्वाय नमः ।

ओं हां वायुतत्वाधिपतये ईश्वराय नमः ।

स्थूणासु—ओं हां आकाशतत्वाय नमः ।

ओं हां आकाशतत्वाधिपतये सदाशिवाय नमः ।

चूळिकायां—ओं हां शिवाय नमः । वितानेे—ओं हां चन्द्राय नमः ।
तरंगेषु-ओं हां गङ्गायै नमः । दर्भमालायां-ओं हां वासुकये नमः ।
अङ्गणेषु-ओं हां मुद्गरायै नमः । वेदिकामूले-ओं हां वास्तुब्रह्मणे नमः ।
उपवेदोपरितः दिशासु—ओं हां अघोरास्त्राय नमः । इति सम्पूज्य,

तत्वदृष्ट्या विलोक्य, शेषद्वाराणि घट्टयन् नित्यवत् द्वारपालान् पश्चिमद्वारे आराध्य, ऊर्ध्वोदुम्बरे दक्षिणे—गणपतये नमः । उत्तरे—सरस्वत्यै नमः । मध्ये—महालक्ष्म्यै नमः । दक्षिणशाखायां—नन्दिने नमः ... अस्त्रेण पुष्पं क्षिप्त्वा, अन्तरिक्षविघ्नान् निरस्य इत्यन्तं सम्पूज्य यागगृहात् उद्भाम्य प्रच्छन्नपटे ओं हां तिरस्करिणीमूर्तये नमः । अस्त्रेण घण्टां त्रिः सन्ताड्य, अधोदुम्बरे-ओं श्लीं पं शुं हुं फट् पाशुपतास्त्राय नमः इत्यभ्यर्च्य, किंचित् वामशाखां समाश्रयन्, दक्षिणपादपुरस्सरं सद्योजात-मन्त्रेण अन्तःप्रविश्य, द्वारोत्तरे ओं हां अस्त्रद्वारपालाय नमः इति सम्पूज्य प्रदक्षिणक्रमेण, गत्वा, नैऋते ओं हां वास्त्वधिपतये ब्रह्मणे नमः । इति सम्पूज्य,

पश्चात् उपवेद्यन्तराले प्रागाद्यष्टदिक्स्थित अष्टमङ्गलेषु,
ऊर्ध्वंशोधृतदर्पणे— दर्पणाधिपतये ओं हां सूर्याय नमः । उषादेव्यै नमः ।

मेनकाधृतपूर्णकुम्भे—पूर्णकुम्भाधिपतये ओं हां जलेश्वराय नमः ।
ओं हां जाह्नव्यै नमः ।
रम्भाधृतवृषभे—वृषभाधिपतये ओं हां स्थाणवे नमः ।
ओं हां सुधादेव्यै नमः ।
तिलोत्तमाधृतयुग्मचामरे—चामराधिपतये ओं हां वायवे नमः ।
ओं हां धारिण्यै नमः ।
सुमुखीधृतश्रीवत्से—श्रीवत्साधिपतये ओं हां विष्णवे नमः ।
महालक्ष्म्यै नमः ।
सुन्दरीधृतस्वस्तिके--स्वस्तिकाधिपतये ओं हां रुद्राय नमः ।
ओं हां रेवत्यै नमः ।
कामुकीधृतशंखे—शङ्खाधिपतये ओं हां चन्द्राय नमः ।
ओं हां रोहिण्यै नमः ।
कामवर्धनीधृतदीपे—दीपाधिपतये ओं हां ज्वलनाय नमः ।
ओं हां स्वाहादेव्यै नमः ।

इति सम्पूज्य, सदाशिवतत्वान्तव्याप्तिकमण्टपं विभाव्य, आचार्यः मूर्तिपैः सह नववस्त्रोत्तरीय-कटक-मकुटांगुलीय-हेमसूत्र-पीताम्बर-पट्ट-वस्त्र-भस्म-रुद्राक्ष-मालादिभिरलंकृत्य, वेदिकादक्षिणभागे नैरृतदेशे कूर्मासनोपरि सौम्यस्योपविश्य, भूतशुद्धि कृत्वा । उक्तविधिना नैरृत्यां पञ्चगव्यं साधयेत् ॥ ततः लाज-पुष्प-चन्दन-सिद्धार्थभस्म-कुशाक्षतान् सप्त वा शुद्धलाजान् वा विकिरान् हुं फडान्तास्त्रेण सप्तधाभिमन्त्र्य शुद्धपात्रे संगृह्य, ज्ञानखड्गं तदुपरि निक्षिप्य, पाशुपतास्त्रेण सप्तधा अभिमन्त्र्य, निरीक्षणादिभिः विशोध्य, संहितयाभिमन्त्र्य नैरृत्यां स्थित्वा निरीक्षणादि संस्कारान् कुर्यात्, तद्यथा, हृदयेन निरीक्षणं. ईशानेन प्रोक्षणम, हुंफडन्तास्त्रेण ताडनम, शिरोमन्त्रेण अभ्युक्षणम, अस्त्रेण खननम, अघोरेणावकीर्णं, वामदेवेन पूरणं सद्योजातेन समी-करणम्, शिखया सेचनम, कवचेन कुट्टनं, नेत्रमन्त्रेण सम्मार्जनम, पुरुषेण लेपनम, निवृत्यादिकलामन्त्रेण कलामय अभ्यर्चनम, वेदी त्रिसूत्रवेष्टनम. मूलेन मण्टपं सम्पूज्य, ईशानेन रेखात्रयम, अस्त्रेण वज्रीकरणम, मूलेन चतुष्पदान्यासम् इति अष्टादशसंस्कारान् कृत्वा,

पञ्चगव्यार्घ्यजलेन अस्त्रेण यागगृहं सम्प्रोक्ष्य, ज्ञानखड्गं गृहीत्वा, दक्षिणहस्त्यां धारयेत्, विकिरान् नानाप्रहरणाकारान् अन्तरिक्षविघ्न-प्रशमनार्थं विकीर्य । सकुशकूर्चं शिवगायत्र्या वर्धन्यासनान्तिके ईशान-कोण वेदिकायां संस्थापयेत् ।

निर्ऋतिपूर्वकुम्भे—ओं हां अनन्ताय नमः ... पद्माय नमः । 14

पद्मस्योपरि—ओं हां वास्त्वधिपतये ब्रह्मासनाय नमः ।

ओं हां वास्त्वधिपतये ब्रह्ममूर्तये नमः ।

ध्यानम्—हंसस्थं...स्रुक्कमण्डलुम् ॥ इति ध्यात्वा,

ओं हां वास्त्वधिपतये ब्रह्मणे नमः । आवाहनादिकं कृत्वा :

पद्ममुद्रां दर्शयित्वा, नै-धू-दी-दत्वा,

वायोः दक्षिणकुम्भे— षडुत्थासनं सम्पूज्य, तदुपरि— 15

ओं ह्रीं महालक्ष्म्यासनाय नमः ।

ओं ह्रीं महालक्ष्मीमूर्तये नमः ।

ध्यानम्—रक्तपद्मासनासीनां पीतवर्णां द्विलोचनाम् ।

वहन्तीमब्जयुगळं कराभ्यां कमलेक्षणाम् ॥

सर्वाभरणसम्युक्तां सर्वरत्नोपशोभिताम् ।

सर्वाभरणंधारिणीम् ॥

करण्डमकुटां देवीं कनकाम्बरधारिणीम् ॥

द्वारस्य सम्मुखीं श्यामां पुष्परत्नौघवर्षिणीम् ।

इति ध्यात्वा, आवाहनं कृत्वा, ओं ह्रीं महालक्ष्म्यै नमः ।

तां शक्तिमण्टपरूपिणीं अनुसन्धाय, ऐशान्यां वेदिकोपरि व्रीहि-तण्डुल-तिल-लाजैः मण्डलं परिकल्प्य, तदुपरि पाशुपतास्त्रकुम्भवर्धन्यौ च संस्थाप्य, वस्त्र-गन्ध-मालादिभिरलंकृत्य, स्थण्डिलोपरि चलासनं सम्पूज्य, ओं हां वृषभासनाय नमः । तदुपरि—

ओं हां हं हां पाशुपतास्त्रासनाय नमः ।

ओं हां हं हां पाशुपतास्त्रमूर्तये नमः ।

ध्यानम्—पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
विकृतं भास्वरं चोग्रं कृष्णपिङ्गोर्ध्वकेशकम् ॥
खड्गखेटकनाराचं धनुस्सूत्रं कमण्डलुम् ।
शक्ति त्रिशूलं परशुं ब्रह्मदण्डकरान्वितम् ॥
ध्यात्वा पाशुपतं देवं साङ्गं सम्पूजयेत् बुधः ।

इति ध्यात्वा, आवाहन ... धेनुमुद्रां प्रदर्श्य,

ओं श्लीं पं शुं हुं फट् पाशुपतास्त्राय हुं फण्णमः ।
ओं हां हौं पाशुपतास्त्र विद्यादेहाय नमः ।
ओं हां हौं पाशुपतास्त्र नेत्रेभ्यो नमः ।
ओं पाशुपतास्त्र हृदयाय नमः ।
ओं श्लीं पाशुपतास्त्र शिरसे नमः ।
ओं पं पाशुपतास्त्र शिखायै नमः ।
ओं शुं पाशुपतास्त्र कवचाय नमः ।
ओं हुं पाशुपतास्त्र नेत्रेभ्यो नमः ।
ओं फट् पाशुपतास्त्र अस्त्राय नमः ।

इति अङ्गानि विन्यस्य, रक्षावकुण्ठनं विधाय, अमृतीकृत्य, पाद्याचमनार्घ्याणि दद्यात् । तद्दक्षिणवर्धन्यां चलासनमभ्यर्च्य,

ओं हां सिंहासनाय नमः ।

तदुपरि—ओं ह्रीं पाशुपतास्त्रशक्त्यासनाय नमः ।
ओं ह्रीं पाशुपतास्त्रशक्तिमूर्तये नमः ।

ध्यानम्—रक्तवर्णां ज्वलत्केशां खड्गखेटकधारिणीम् ।
ध्यात्वा चास्त्रेश्वरीं देवीं गन्धपुष्पादिनार्चयेत् ॥

ओं ह्रीं पाशुपतास्त्रशक्तये हुं फण्णमः । इत्यावाह्य, आवाहन ... योनिमुद्राः प्रदर्श्य, नैवेद्य-धूप-दीपार्घ्याणि दत्वा,

पूर्वद्वारदक्षिणकुम्भस्य दक्षिणकुम्भे

षडुत्थासनं सम्पूज्य, तदुपरि ओं ह्रां इन्द्रासनाय नमः । ध्यानं कुर्यात् । मूलेन अभ्यर्च्य, भो भो इन्द्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये । सावधानेन यागान्तं यावत् स्थेयं शिवाज्ञया ॥ इति प्रार्थ्य, षडुत्थासनं अभ्यर्च्य, अग्निकोणे—अग्निं आसन-मूर्तिध्यानपुरस्सरं मूलेन अभ्यर्च्यं भो भो अग्ने ... शिवाज्ञया । इति प्रार्थ्य, षडुत्थासनमभ्यर्च्य,

दक्षिणद्वारपश्चिमकुम्भस्य पश्चिमकुम्भे—यमम् आसन-मूर्तिपुरस्सरं ध्यानं कुर्यात् । मूलेन अभ्यर्च्य, भो भो यम ... शिवाज्ञया । इति प्रार्थ्य,

निर्ऋतिकोणे—निर्ऋतिं आसन-मूर्तिध्यानपुरस्सरं मूलेन अभ्यर्च्य, भो भो निर्ऋते त्वया ... शिवाज्ञया । इति प्रार्थ्य,

पश्चिमद्वार उत्तरकुम्भस्य उत्तरकुम्भे—वरुणं आसन-मूर्तिध्यान-पुरस्सरं मूलेनाभ्यर्च्य,

वायुकोणकुम्भे—वायुं आसन-मूर्तिध्यानपुरस्सरं मूलेनाभ्यर्च्य, भो भो वायो त्वया ... शिवाज्ञया । इति प्रार्थ्य,

उत्तरद्वार पूर्वकुम्भस्य पूर्वकुम्भे—कुबेरं आसन-मूर्तिध्यानपुरस्सरं मूलेनाभ्यर्च्य, भो भो कुबेर ... शिवाज्ञया । इति प्रार्थ्य,

ईशानकोणकुम्भे—ईशानं आसन-मूर्तिध्यानपुरस्सरं मूलेनाभ्यर्च्य, भो भो ईशान ... शिवाज्ञया । इति प्रार्थ्य,

ईशानदक्षिणकुम्भे—ब्रह्माणं आसन-मूर्तिध्यानपुरस्सरं मूलेनाभ्यर्च्य, भो भो ब्रह्म ... शिवाज्ञया । इति प्रार्थ्य,

नैर्ऋत्युत्तरकुम्भे—विष्णुं आसन-मूर्तिध्यानपुरस्सरं मूलेनाभ्यर्च्य, भो भो विष्णो ... शिवाज्ञया । इति प्रार्थ्य,

इन्द्रादिदिक्षु दशायुधानि सम्पूज्य,

ओं हां वज्राय हुं फण्णमः । ओं हां अङ्कुशाय हुं फण्णमः ।
,, ,, शक्तये ,, ,, ,, गदाये ,,
,, ,, दण्डाय ,, ,, ,, त्रिशूलाय ,,
,, ,, खड्गाय ,, ,, ,, पद्माय ,,
,, ,, पाशाय ,, ,, ,, चक्राय ,,

ततः गुरुः स्वयं वर्धनीमादाय, अस्त्रकुम्भं शिष्येण वाहयित्वा, शिव-कलशाग्रगामिन्या वर्धन्या अविच्छिन्नपयोधारया ओं श्लीं पं शुं हुं फट् पाशुपतास्त्राय नमः । इति पाशुपतास्त्रमूलमन्त्रं जपन् अस्त्रदुर्गामनुस्मरन् प्रदक्षिणक्रमेण ईशानादीशानपर्यन्तं भ्रामयित्वा, पुनः स्वस्थाने पूर्वं कुम्भ पश्चात् वर्धनीं च संस्थाप्य, ततः कुम्भे नित्यवत् आधारशक्त्यादि शक्ति-पर्यन्तं सम्पूज्य,

ध्यानम्—पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
विकृतं भास्वरं चोग्रं कृष्णपिङ्गोर्ध्वकेशकम् ॥
खड्गखेटकनाराचं धनुस्सूत्रं कमण्डलुम् ।
शक्तिं त्रिशूलं परशुं ब्रह्मदण्डकरान्वितम् ॥
ध्यात्वा पाशुपतं देवं साङ्गं सम्पूजयेत् बुधः ।

इति ध्यात्वा,
वर्धन्यां—ओं ह्रीं पाशुपतास्त्रशक्त्यासनाय हुं फण्णमः ।
ओं ह्रीं पाशुपतास्त्रशक्तिमूर्तये हुं फण्णमः ।

ध्यानम्—रक्तवर्णां ज्वलत्केशां खड्गखेटकधारिणीम् ।
ध्यात्वा चास्त्रेश्वरीं देवीं गन्धपुष्पादिनार्चयेत् ॥

इति ध्यात्वा, ओं ह्रीं पाशुपतास्त्रशक्त्यै हुं फण्णमः । ओं श्लीं पं शुं हुं फण्णमः । इत्यावाह्य, ओं हां हृदयाय हुं फण्णमः । ओं श्लीं शिरसे हुं फण्णमः । फट् अस्त्राय हुं फण्णमः इत्यङ्गानि विन्यस्य तौ गन्धपुष्पा-

दिभिः अभ्यर्च्य, ओं ह्लां ह्लौं शिवशक्तिभ्यां नमः इति लयाङ्गमुद्रया अंगुष्ठेन कुम्भ संस्पृश्य, मुष्टिना वर्धनीं स्पृशेत् । (भुक्त्यै मुक्त्यै विपर्ययेण क्रमेण संस्पृश्य)

उमायै भगरूपिण्यै लिङ्गरूपधराय च ।
शङ्कराय नमस्तुभ्यं इति स्तुत्वानुमोद्य च ॥
यज्ञस्यास्य पतिस्त्वं हि मूर्तिरेषा तवाचल ।
एष ते ज्ञाननिस्त्रिंशः तत् गृहाण स्वमायुधम् ।
निजयागं जगन्नाथ रक्ष भक्तानुकम्पया ॥

निजयागं जगन्नाथ रक्ष भक्तानुकम्पया ॥ इति ज्ञानखड्गं समभ्यर्च्य, मूलमन्त्र रक्षार्थं देवस्य सव्यहस्ते अस्त्राय हुं फट् इति ज्ञानखड्गं संर्प्य, मूलमन्त्र अष्टोत्तरशतं जप्त्वा, समर्प्य नै-धू-दी.

मया प्रवर्तितश्चायं यज्वना भवतः क्रतुः ।
रक्षणीयस्त्वयैवं हि समाप्तिर्यावदस्य हि ॥

इति रक्षां विज्ञाप्य, अघोरेण निरोधार्घ्यं दत्वा, तत्रैव निश्चलं संस्थाप्य,

वायुपूर्वकुम्भे—ओं हां विनायकासनाय नमः । 26
ओं हां विनायकमूर्तये नमः ।

ध्यानम्—विघ्नेश्वरं महाकायं गजवक्त्रं गणाधिपम् ।
पाशांकुशधरं देवं दन्तलड्डुकधारिणम् ।
रक्ताभं शूर्पकर्णं च आखुवाहननायकम् ॥

इति ध्यात्वा, विनायकाय नमः । आ-कृत्वा प्रार्थ्य,

यत्सुरेशाध्वरोऽस्माभिः प्रतिष्ठाविधिहेतवे ।
प्रवर्तितः प्रयात्वन्तं निर्विघ्नं तव सन्निधौ ॥ 27

इति विज्ञाप्य,

ईशानपश्चिमकुम्भे—ओं हां अनन्ताय नमः । ओं हां पद्माय नमः ।
पद्मस्योपरि—ओं हां सदाशिवादि सप्तगुरुभ्यो नमः ।

ध्यानम्–सदाशिवं श्वेतवर्णं अनन्तं रक्तवर्णकम् ।
श्रीकण्ठं श्यामवर्णं च अम्बिकानीलवर्णकम् ॥
गुहं गोमेधवर्णं च विष्णुं कृष्ण समप्रभम् ।
धातारं रक्तवर्णं च गुरून् सप्तस्वरूपकम् ॥
सर्वाञ्जलिसमायुक्तान् भस्मरुद्राक्षधारिणः ।
इत्येवं सप्तरूपैः ध्यायेत् देवं गुरून् सदा ॥

इति ध्यात्वा, नैवेद्य-धूप-दीपादिकं दत्वा, प्रार्थ्य,

देवदेव जगन्नाथ जगदानन्दकारण ।
शिवाध्वरप्रवृत्तोऽहं अनुज्ञां कुरु ते नमः ॥

इति विज्ञाप्य, पश्चात् वेदिकादक्षिणपार्श्वे स्थित्वा, सकळीकृत्य, प्राणायामत्रयं विधाय,

वेदिकोपरि पूजामारभेत्

पूर्वोक्तवत् आधारशक्त्यादि शिवासनं शिवमूर्ति दण्डभङ्गी–मुण्डभङ्गी–(श्रीकण्ठ-वक्त्रभङ्गी – कलाभङ्गी – विद्यादेह-नेत्र-न्यासान्तं सम्पूज्य, आवरण–न्यासादिकं च विधाय) ततः मूलेन आवाहनादिसर्वोपचारैः पूजान्तं कृत्वा, ततः देवदेवं प्रार्थ्य,

देवदेव जगन्नाथ जगदानन्दकारण ।
अग्निकार्यं करोम्यादौ अनुज्ञां देहि मे प्रभो ॥

इति प्रार्थ्य
अग्निकार्यार्थं अध्येष्य इत्यारभ्य आज्यसंस्कारान्तं कृत्वा,
ओं बालाग्न्यासनाय नमः । ओं बालाग्निमूर्तये नमः ।

ध्यानम्–अनलरुचिसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतं खड्गखेटञ्च सव्ये ।
वरदमनलखेटं ह्यंकुशं स्रुक्च वामे
दधतमुदितरूपं शैवबालाग्निमीडे ॥

ओं हैं बालाग्नये नमः नामकरणार्थं ईशानेन सम्पूज्य, उपनिष्क्रामणाय हृदा अभ्यर्च्य, हृदा आहुतिपञ्चकं हुत्वा, अन्नप्राशनकर्मार्थं सद्योजातेन आहुतिपञ्चकं हुत्वा, चौळकर्मार्थं सद्योजातेन पञ्चाहुतीः हुत्वा, उपनयनार्थं वामदेवेन आहुतिपञ्चकं हुत्वा, व्रतकर्मार्थं अघोरेण आहुतिपञ्चकं हुत्वा, यौवनाग्निं ध्यात्वा,

यौवनाग्न्यासनाय नमः । यौवनाग्निमूर्तये नमः ।

मेषस्थं पञ्चवक्त्रं अरुणमणिनिभं सप्तजिह्वासमेतं
शूलं वज्रं च खड्गं परशुमभयदं सव्यभागे वहन्तम् ।
पाशं शक्तिं च खेटं सृणिमपि वरदं वामहस्तैर्दधानं
नानालङ्कारयुक्तं सुरुचिरवपुषं यौवनाग्निं प्रपद्ये ॥

इति ध्यात्वा,

ओं हां यौवनाग्नये नमः । आवाहनादिकं कृत्वा, समावर्तनार्थं तत्पुरुषेण आहुतिपञ्चकं हुत्वा, विवाहार्थं आहुतिपञ्चकं ईशानेन हुनेत् ।

(ओं हों ईशानाय स्वाहा)

ओं हां वृद्धाग्न्यासनाय नमः । ओं हां वृद्धाग्निमूर्तये नमः ।

पद्मस्थं पञ्चवक्त्रं दशभुजसहितं रक्तवर्णं त्रिणेत्रं
शूलं वज्रं च खड्गं परशुसृणिगता टङ्कपाशाब्जचक्रम् ।
बिभ्राणं दक्षवामैः करतलकमलैः सप्तजिह्वासुदीप्तं
ध्यायेत् स्वाहास्वधाभ्यां सकलपरिवृतं कुण्डमध्ये शिवाग्निम् ॥

इति ध्यात्वा, ओं हां हं हां शिवाग्नये नमः । इति आवाहनादिकं कृत्वा, पञ्चपञ्चाहुतिभिः सन्तर्प्य

ततः हृदयेन वागीशीवागीशौ अभ्यर्च्य, पञ्चपञ्चाहुतिभिः सन्तर्प्य तौ विसृज्य कुण्डमानं यथाभिलषितं वक्त्रं परिकल्प्य, मध्यजिह्वायाम् विवाहान्तसंस्करणपूरणार्थं वौषडन्तमूलेन पूर्णां दद्यात् । (सर्पिषा स्रुचमापूर्य, पुष्करपर्यधोमुखं स्रुवं कृत्वा, तदग्रे पुष्पं दत्त्वा वामदक्षिणहस्ताभ्यां शङ्खवत् संस्थाप्य, पुनस्सव्येन संलग्नौ तावुभावादाय समपादः समुत्थाय

ऊर्ध्वकायः नाभ्यां तिर्यग्विधाय स्रुगग्रदत्तदृष्टिः वौषडन्तमूलं उच्चरन् वामस्तनान्त स्रुङ्मूलमानीय अनुद्विग्नमत्रप्रमाणधारया समस्तमाज्यं वह्नौ क्षिपेत् । (इति पूर्णां विधाय) व्याहृतिभिः हुत्वा (भूस्स्वाहा, भुवस्स्वाहा, सुवस्स्वाहा, भूर्भुवस्सुवस्स्वाहा) अङ्गाहुतिभिः हुत्वा,

ओं हों शिवाग्नये ईशानमूर्धाय स्वाहा । इति मध्ये
ओं हें आहवनीयाय तत्पुरुषवक्त्राय स्वाहा । इति पूर्वे
ओं हुं दक्षिणाग्नये अघोरहृदयाय स्वाहा । इति दक्षिणे
ओं हिं केवलाग्नये वामदेवगुह्याय स्वाहा । इति उत्तरे
ओं हं सद्योजाताय गार्हपत्याय स्वाहा । इति पश्चिमे

(ओं हां हौं शिवाय नमः) ओं हां हौं शिवाग्नये नमः इति ध्यात्वा,

आवाहनादिकं कृत्वा, सम्पूज्य, प्रार्थ्य,

सितपद्मासनासीनं चतुर्वक्त्रं चतुर्भुजम् ।
लम्बकूर्चं ब्रह्ममूर्तिं जटामण्डितशेखरम् ॥
स्रुक्कमण्डलुदण्डाक्षमालाव्यग्रकराम्बुजम् ।
स च रक्ततनुस्त्र्यक्षः शिवायुधभुजान्वितः ॥
अग्ने त्वमैश्वरं तेजः पावनं परमं मतः ।
तस्मात् त्वदीयहृत्पद्मे संस्थाप्य तर्पयाम्यहम् ॥

इति प्राथ्यं,

अग्निहृत्पद्मे आधारशक्त्यादि शिवासनं शिवमूर्तिं दण्डभङ्गी-मुण्डभङ्गी-वक्त्रभङ्गी-कलाभङ्गी-विद्यादेहनेत्रन्यासान्तं सम्पूज्य, मूलेन आवाहनादि सर्वोपचारैः आवरणपूजान्तं कृत्वा, नाडीं सन्धाय, कुम्भ-यागाग्निशिवैः आत्मना सह नाडीसन्धानं कृत्वा,

ऊर्णातन्तुनिभां नाडीमुदितेन विनिर्गताम् ।
अनुदिते विशन्तीं तां निर्गतामुदितेन च ।
आत्मनोऽनुदितेनैन विशन्तीं चिन्तयेत् द्विजः ॥

एवं नाडीं सन्धाय तत्सन्धानार्थं मूलमन्त्रेण शतं हुत्वा तद्दशांशतो ब्रह्माङ्गानि हुत्वा पूर्णां दत्त्वा ओं हां सदाशिवाय नमः । पुनः, ओं हों ईशानाय नमः ।

ध्यानम्—स्फटिकाभं जगद्धेतुं त्रिणेत्रं चन्द्रमौळिनम् ।
सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ॥

इति ध्यात्वा, सम्पूज्य ईशानस्योत्तरे ओं हौं नेत्रेभ्यो नमः इति सम्पूज्य, ओं हः अस्त्राय नमः ।

दंष्ट्रिणं पिङ्गवर्णाभं ज्वलत्केशं भयानकम् ।
शक्तिशूलं दधत् भीमं अस्त्रं शस्त्रविमर्दनम् ॥

ओं हः अस्त्राय नमः इति ध्यात्वा आवाह्य, मूलेन आज्येन पलाश-समिधा च शतं हुत्वा, ईशाननेत्र-अस्त्रमन्त्रैः दशांशं हुत्वा पूर्णां हुत्वा, देशापादन कालापादन दुर्निमित्त शान्ति सुनिमित्त आपादन हेतवे मूलेन चतुश्शतं हुत्वा, यथाशक्ति वा हुत्वा, ततः मन्त्राणां तर्पणदीपने विदध्यात् ।

ओं हां हौं शिवाय स्वाहा ओं हों ईशानमूर्धाय स्वाहा ... ओं हः अस्त्राय स्वाहा इत्याहुति त्रयेण तर्पणम् ।

ओं हां वृद्धाग्नये हृदयाय स्वाहा इति ईशाने
„ हूं यौवनाग्नये शिखायै „ „ नैरृते
„ हैं बालाग्नये कवचाय „ „ वायौ
„ हौं सूक्ष्माग्नये नेत्रेभ्यः „ „ ईशानस्य दक्षिणे
„ हः कालाग्नये अस्त्राय „ „ नेत्रस्योत्तरे

इत्यङ्गाहुतिभिः हुनेत् । प्रधानकुण्डात् चर्वर्थं अग्निमुद्धृत्य स्थानान्तरे संरक्ष्य मध्यमांशं प्रज्वाल्य शिवाग्नेः आप्यायनाय अग्नये पुष्ट्यै च घृताक्तान् षोडशांगुलान् पलाशान् इध्मान् अकाराद्यैः स्वरैः जुहुयात् ।

ओं ह्रां अकाराय स्वाहा	ओं ह्रां ऌकाराय स्वहा
,, ,, आकाराय स्वाहा	,, ,, ॡकाराय स्वाहा
,, ,, इकाराय स्वाहा	,, ,, एकाराय स्वाहा
,, ,, ईकाराय स्वाहा	,, ,, ऐकाराय स्वाहा
,, ,, उकाराय स्वाहा	,, ,, ओकाराय स्वाहा
,, ,, ऊकाराय स्वाहा	,, ,, औकाराय स्वाहा
,, ,, ऋकाराय स्वाहा	,, ,, अंकाराय स्वाहा
,, ,, ॠकाराय स्वाहा	,, ,, अ: काराय स्वाहा इति हुत्वा

अग्निमध्ये — ओं ह्रां ह्रौं शिवाग्न्यासनाय नमः

ओं ह्रां ह्रौं शिवाग्निमूर्तये नमः

ध्यानम्–पञ्चवक्त्रयुतं रक्तं सप्तजिह्वाविराजितम् ।
दशहस्तं त्रिणेत्रं च सर्वाभरणभूषितम् ॥
रक्तवस्त्रपरीधानं पङ्कजोपरिसंस्थितम् ।
बद्धपद्मासनासीनं दशायुधसमन्वितम् ॥
शूलं वज्रं च खड्गं च शक्तिश्च सृणि दक्षिणे ।
गदादण्डश्च पाशं च पद्मं चक्रं च वामके ॥
ऊर्ध्ववक्त्रे त्रिजिह्वा च शेषाः प्रागादितः क्रमात् ।
स्वाहादेवी स्वधापत्नी दक्षवामे तु संस्थिते ॥
शिवाग्निं भावयेत् एवं सर्वाभीष्टार्थसिद्धये ।

	ओं ह्रूं ह्रां ह्रूं हृदयाय हुं फट्
ओं ह्रां ह्रौं शिवाय हुं फट्	,, ,, ह्रीं ,, शिरसे ,,
ओं ह्रूं ह्रों ह्रूं ईशानमूर्धाय हुं फट्	,, ,, ह्रूं ,, शिखायै ,,
,, ,, ह्रें ,, तत्पुरुषवक्त्राय ,,	,, ,, ह्रैं ,, कवचाय ,,
,, ,, ह्रुं ,, अघोरवक्त्राय ,,	,, ,, ह्रौं ,, नेत्रत्रयाय ,,
,, ,, ह्रिं ,, वामदेवगुह्याय ,,	,, ,, ह्रः ,, अस्त्राय ,,
,, ,, ह्रं ,, सद्योजातमूर्तये ,,	

इत्याहुति त्रयेण दीपनम् । ततः विशेषसर्वैः द्रव्यैश्च प्रत्येकं यथाशक्ति हुत्वा । ततः देवदेवं शिबिकायां आरोप्य यागमण्टपाग्रे सन्निधिं कृत्वा पूर्णां हुत्वा । प्रायश्चित्तादि जयादींश्च विधाय । व्याहृतिभिः हुत्वा, परिषिच्य, मूलमन्त्रं यथाशक्ति हुत्वा, दूर्वाक्षतसहितं पुष्पं अञ्जलौ गृहीत्वा ।

ओं हां हौं सर्वतत्वाधिपतये शिवाय नमः अस्त्ररक्षितं कवचेनावकुण्ठितं दक्षिणहस्ते गृहीत्वा सार्घ्यजलजपं उद्भवमुद्रया भूमिष्ठजानुः ।

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे येन त्वत्प्रसादात् मयि स्थिरा ॥

यत्किंचित्कर्म हे देव सदा सुकृतदुष्कृतम् ।
तन्मे शिवपदस्थस्य भुङ्क्ष्व क्षपय शङ्कर ॥

शिवो दाता शिवो भोक्ता शिवस्सर्वमिदं जगत् ।
शिवो यजति सर्वत्र यः शिवस्सोऽहमेव तु ॥

त्वं गतिः सर्वभूतानां संस्थितः त्वं चराचरे ।
अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वर ॥

कर्मणा मनसा वाचा त्वत्तो नान्यो गतिर्मम ।
मन्त्रहीनं क्रियाहीनं द्रव्यहीनं च यत्कृतम् ॥
जपहोमार्चनाहीनं कृतं नित्यं मया तव ।
अकृतं वाक्यहीनं च तत्पूरय महेश्वर ॥

गद्यं पद्यं न जानामि शब्दं शास्त्रं शिवागमम् ।
त्वत्स्वरूपं मया ज्ञातुं शक्यमेव न सर्वदा ॥

क्षन्तव्यं महता सर्वं विषवत् भवता खलु ।
क्षमाविषयभूतोस्मि नाथः पर निवेदनम् ॥

अज्ञानाद्वा प्रमादाद्वा वैकल्यात् साधकस्य च ।
न्यूनाधिकं च तत्सर्वं क्षमस्व परमेश्वर ॥

यत्कृतं यत्करिष्यामि तत्सर्वं सुकृतं तव ।
विश्वगोप्ता त्वमेवात्मा नान्यो नाथो हि मे शिवे ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोयमिति मां मत्वा क्षमस्व परमेश्वर ॥

इति विज्ञाप्य, देवस्य वामहस्ते जपसंख्यां समर्प्य ॥ षोडशोपचारादिकं विधाय द्राविडादिस्तोत्रगीतं विधाय । आशीर्वादं कुर्यात् ॥

— :0:—

श्रीकण्ठन्यासः

ओं हां अं श्रीकण्ठाय पूर्णोदर्यै नमः शिरसि
" " आं अनन्ताय विरजायै नमः मुखमण्डले
" " इ सूक्ष्माय शाल्मल्यै नमः दक्षिणनेत्रे
" " इं त्रिमूर्तये लोलाक्ष्यै नमः वामनेत्रे
" " उं अमरेश्वराय वर्तुलाक्ष्यै नमः दक्षिणकर्णे
" " ऊं अर्घीशाय दीर्घकोणायै नमः वामकर्णे
" " ऋं भारभूतये दीर्घमुख्यै नमः दक्षिणनासापुटे
" " ॠं अतिथये गोमुख्यै नमः वामनासापुटे
" " ऌं स्थाणुकाय दीर्घजिह्वायै नमः दक्षिणगण्डस्थले
" " ॡं हराय कुण्डोदर्यै नमः वामगण्डस्थले
" " एं चण्डीशाय ऊर्ध्वकेशिन्यै नमः उत्तरोष्ठे
" " ऐं भौतिकाय विकृतमुख्यै नमः अधरोष्ठे
" " ओं सद्योजाताय ज्वालामुख्यै नमः ऊर्ध्वदन्तपङ्क्तौ
" " औं अनुग्रहेश्वराय उल्कामुख्यै नमः अधोदन्तपङ्क्तौ
" " अं अक्रूराय श्रीमुख्यै नमः तालुमूले
" " अः महासेनाय विद्यामुख्यै नमः तालुमध्ये
" " कं क्रोधीशाय महाकाल्यै नमः दक्षिणबाहुसन्धौ
" " खं चण्डीशाय सरस्वत्यै नमः दक्षिणबाहुकूर्परे
" "

ओं ह्रां गं पञ्चान्तकाय सर्वसिद्धिकर्यै नमः दक्षिणबाहुमणिबन्धे
,, ,, घं शिवोत्तमाय त्रैलोक्यवन्द्यायै नमः दक्षिणपाण्यङ्गुळिमूलेषु
,, ,, ङं एकरुद्राय मन्त्रशक्त्यै नमः दक्षिणपाण्यङ्गुळिमूलेषु
,, ,, चं कूर्माय आत्मशक्त्यै नमः वामबाहुसन्धौ
,, ,, छं एकनेत्राय भूतमात्रे नमः वामबाहुकूर्परे
,, ,, जं चतुराननाय लम्बोदर्यै नमः वामबाहुमणिबन्धे
,, ,, झं अजेशाय द्राविण्यै नमः वामपाण्यङ्गुळिमूलेषु
,, ,, ञं शर्वाय नगर्यै नमः वामपाण्यङ्गुल्यग्रेषु
,, ,, टं सोमेशाय खेचर्यै नमः दक्षिणकट्यां
,, ,, ठं लाङ्गलये मञ्जर्यै नमः दक्षिणजानुनि
,, ,, डं दारुकाय विकृतरूपिण्यै नमः दक्षिणपादमूले
,, ,, ढं अर्धनारीश्वराय वृकोदर्यै नमः दक्षिणपादाङ्गुळिमूलेषु
,, ,, णं उमाकान्ताय पूतनायै नमः दक्षिणपादाङ्गुल्यग्रेषु
,, ,, तं आषाढिने भद्रकाल्यै नमः वामकट्यां
,, ,, थं दण्डिने भोगिन्यै नमः वामजानुनि
,, ,, दं अत्रये शङ्खिन्यै नमः वामपादमूले
,, ,, धं मीनाय गर्जिन्यै नमः वामपादाङ्गुळिमूलेषु
,, ,, नं मेषाय काळरात्र्यै नमः वामपादाङ्गुल्यग्रेषु
,, ,, पं लोहिताय कुब्जिन्यै नमः दक्षिणपार्श्वे
,, ,, फं शिखिने कपर्दिन्यै नमः वामपार्श्वे
,, ,, बं छगलाण्डाय जयायै नमः पृष्ठे
,, ,, भं द्विरण्डाय भद्रायै नमः नाभौ
,, ,, मं महाकाळाय विजयायै नमः जठरे
,, ,, यं पालिने सुमुखेश्वर्यै नमः वक्षसि
,, ,, रं भुजङ्गेशाय रेवत्यै नमः दक्षिणदोर्मूले
,, ,, लं पिनाकिने मालत्यै नमः वामदोर्मूले
,, ,, वं खड्गेशाय वारुण्यै नमः अपरगळे
,, ,, शं बकाय वायव्यै नमः दक्षिणकक्षे

ओं हां षं श्वेताय रक्षोपधारिण्यै नमः वामकक्षे
" " सं भृगवे सहजायै नमः अंसकोपरिमध्यभागे
" " हं लाङ्गुलीशाय लक्ष्म्यै नमः हृदये
" " ळ शिवाय व्यापिन्यै नमः गुदे
" " क्षं संवर्तकाय मायायै नमः गुह्ये

---

८ अग्निकार्यविधिः

परिधिविष्टरपरिस्तरणस्थानानि आह

परिस्तरं त्वधोभागे मध्यमे विष्टरं तथा ।
ऊर्ध्वे तु परिधिं न्यस्य अन्योन्यासक्तकां तथा ।
दर्भैश्चैव परिस्तीर्य प्रतिदिग्दशभिस्ततः ॥

परिधिलक्षणम्

तन्माना ऋजवस्सार्द्रास्तत् कुण्डसमिदुद्भवाः ।
निर्व्रणाश्च समच्छेदाः प्रोक्ता परिधयस्समाः ॥

आयामं हस्तमानेन कनिष्ठांगुळिनाहकम् ।
चतुः परिधयः प्रोक्तं मेखलायान्तु विन्यसेत् ॥

एकमेखलकुण्डञ्चेत् मेखलायां परिस्तरेत् ।
द्विमेखले द्वितीये च मध्यमे च त्रिमेखले ।
स्थण्डिले सैकताद्बाह्ये परिस्तरणमुच्यते ॥

विष्टरलक्षणम्

त्रिंशद्दर्भदळैश्चैव समग्रैर्ग्रन्थिरुच्यते ।
एकदर्भेण संवेष्ट्य विष्टरं परिकीर्तितम् ॥

परिस्तरणलक्षणम्

वेदिका दीर्घतन्मानं विष्टरं परिधिं तथा ।
परिस्तरणमेवोक्तं तावद्दीर्घं प्रकल्पयेत् ॥

धर्मदर्भसमायुक्तं ग्रन्थिवक्षांगुलं भवेत् ।
वेदांगुलं तदग्रं स्यात् षट्त्रिंशदङ्गुलायतम् ।
परिस्तरणमाख्यातं दर्भमालाविधिं शृणु ॥

तत्र प्रयोगः—ततः कुण्डसमीपं गत्वा ! सौम्यस्योपविश्य, सकळीकृत्य, सामान्यार्घ्यं साधयित्वा अग्निकार्यार्थम अभ्येष्य प्रदक्षिणं क्रमेण ससम्भारं यागोपकरणं दिव्यदृष्ट्या विलोक्य । कुण्डसकाशम एत्य, कुण्डयोनिं पुरस्कुर्वन् । तत्र अनामिकांगुष्ठाभ्यां न्यस्तमूलेन चक्षुषा कुण्डस्य निरीक्षणम् । इत्यष्टादशसंस्कारक्रमः (तत्र प्रयोगः)

निरीक्षणादि चतुष्टयम् । खननाद्यष्टकम् । कलान्यासं एकः वज्रोत्रयावृतसूत्रमेकम् कलामयपूजैका । रेखालाञ्छनमेकम । करणमेकम् । चतुष्पदन्यासम् एकम् ।

ओं हां नेत्राय नमः निरीक्षणम	ओं हुं फट् अस्त्राय नमः प्रोक्षणम्
,, ,, अस्त्राय नमः ताडनम	,, हैं कवचाय नमः अभ्युक्षणम्
,, ,, हुं फट् अस्त्राय नमः खननम	,, कवचाय नमः अवकीर्णम्
,, ,, हृदयाय नमः पूरणम	,, हां सद्योजाताय नमः समीकरणम्
,, ,, कवचाय नमः सेचनम्	,, ,, हुं फट अस्त्राय नमः कुट्टनम्
,, ,, कवचाय नमः सम्मार्जनम्	,, ,, विद्यायै नमः अनुलेपनम्

खड्गेन कुशेन विन्याय ऊर्ध्वमेखलायां मध्यपूर्वयाम्य-उत्तरपश्चिमेषु

मध्ये — ओं हौं शान्त्यतीतकलायै नमः
पूर्वे — ओं हैं शान्तिकलायै नमः
दक्षिणे - ओं हूं विद्याकलायै नमः
उत्तरे — ओं हीं प्रतिष्ठाकलायै नमः

पश्चिमे— ओं ह्लां निवृत्तिकलायै नमः

इति कलामयं न्यस्त्वा कलामयकुण्डं परिकल्प्य,

सीसेन तन्त्रं मनसा मनीषिणः ऊर्णासूत्रेण कवयो वयन्ति अश्विना
यज्ञं सविता सरस्वती इन्द्रस्य रूपं वरुणोभिषज्यन् इति त्रिसूत्रेण कुण्डं
संवेष्ट्य । अस्त्राय नमः ओं हां कलामयाय कुण्डाय नमः इत्यभ्यर्च्य ॥

प्राक्सूत्रं त्रिसूत्रं स्यात् उदक्सूत्रं तथैव च ।
प्रागायतमुदगायतं वा तिर्यग् रेखया सह रेखया ॥
ब्रह्मजज्ञानमन्त्रेण मध्यरेखां समालिखेत् ।
नाके सुपर्णमन्त्रेण दक्षिणे तु लिखेद्बुधः ॥
आप्यायस्वेति मन्त्रेण उत्तरे तु लिखेद्बुधः ।
यो रुद्रेति मन्त्रेण मध्यरेखां समालिखेत् ॥
इदं विष्णुरिति मन्त्रेण पश्चिमरेखां समालिखेत् ।
इन्द्रं विश्वेति मन्त्रेण पूर्वरेखां समालिखेत् ॥

मध्ये—ब्रह्मजज्ञानं ... विवः इति मध्यरेखां समालिख्य ।

दक्षिणे — नाके सुपर्णमुपयत्पतन्तं हृदातेनन्तो अभ्यचक्षतत्वा ।
हिरण्य पक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम ॥ इति दक्षिण-
रेखां समालिख्य ।

उत्तरे—आप्यायस्व समेतु ते विश्वतस्सोमवृष्णियम् । भवावाजस्य
सङ्गथे ॥ इति उत्तररेखां समालिख्य ।

मध्ये—यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना
विवेश तस्मै रुद्राय नमो अस्तु ॥ इति मध्यरेखां समालिख्य ।

पश्चिमे—इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम । समूढमस्य पांसुरे ।
इति पश्चिमरेखां समालिख्य ।

पूर्वे—इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः । रथीतमं रथीनां
वाजानां सत्पतिं पतिम् ॥ इति पूर्वरेखां समालिख्य ।

Shri Danebayudha Pani Swamitemple
B- block Budh Nagar
209 New Delhi-110012

लिखित षड्रेखाः सम्प्रोक्ष्य षड्रेखासु तत्तद्देवताः अभ्यर्च्य,

मध्ये — ओं हां ब्रह्मणे नमः । दक्षिणे—ओं हां अनन्ताय नमः ।
उत्तरे — ओं हां सोमाय नमः । मध्ये —ओं हां रुद्राय नमः ।
पश्चिमे — ओं हां विष्णवे नमः । पूर्वे —ओं हां इन्द्राय नमः ।

इत्यभ्यर्च्य, अप उपस्पृश्य ।

उभय त्रिशूलाकृतिना वज्रं शूलं विन्यस्य,
ओं हां शान्ताय नमः । ओं हां भवाय नमः । ओं हां स्वधायै नमः ।

इति वज्रिशूलमभ्यर्च्य,

पूर्वाग्र-उत्तराग्र-कुशद्वयेन चतुष्पथं कृत्वा, अस्त्रेण संप्रोक्ष्य,
ओं हों ईशानमूर्धाय नमः । ... ओं हः अस्त्राय नमः । इत्यभ्यर्च्य,
कुण्डस्याभ्यन्तरे समन्तात् उत्थितैः अक्षवाटं कवचेन विधाय ।
ओं हैं कवचाय नमः । इति कुण्डसंस्कारः ।

——

अथ अग्निसंस्कारः

कुण्डमध्ये कूर्चरूपं विष्टरं दत्वा, तस्मिन् कूर्चे

देवीमावाहयेद्विद्वान् विधिवत् विश्वमातरम् ।
श्यामाम् ऋतुमतीं ध्यात्वा सद्वासोमाल्यभूषणाम् ।
प्रसन्नवदनां पद्मपत्राभनयनत्रयाम् ॥

इति ध्यात्वा, तत वागीश्वरं च,

दशबाहुं सितं सौम्यं पञ्चवक्त्रं त्रिलोचनम् ।
नादरूपं तथा देवं देव्या विन्दुस्वरूपया ॥

ओं वागीश्वरीवागीश्वराभ्यां नमः । सन्निधोभवतं वह्निजननार्थं
युवां इति हृदा आवाह्य गन्धादिभिरभ्यर्च्य तयोः योगं भावयेत् ॥

अरणेः सूर्यकान्तात् द्विजगृहात् स्वगृहात् वा वह्निं मृत्पात्रे ताम्रपात्रे वा आनीय, ओं हः अस्त्राय हुं फट् इति आग्नेय्यामैशान्यां नैरृत्यां वा निधाय। अग्निशकलं क्रव्यादार्थं अस्त्रेण नैरृते निस्सार्य निरीक्षणादि-चतुर्भिः सम्स्कारैः सम्स्कृत्य। ओं हां हं हां वह्निमूर्तये नमः इति भूताग्नि पूरकेण गृहीत्वा, हृदयेन कुम्भकेन नाभ्यग्निना बिन्द्वग्निना च सम्योज्य। रेचकेन निस्सार्य। ओं हां वह्निचैतन्याय नमः इति पात्रस्थेऽग्नौ सम्योज्य। संहितया सम्पूज्य। संरक्ष्य। अवकुण्ठ्य प्रासादेन वौषडन्तेन धेनुमुद्रया अमृतीकृत्य। आदाय कुण्डोपरि प्रदक्षिणं त्रिः परिभ्राम्य। भूमिष्ठजानुमूलेन भूर्भुवस्सुवरोमिति अग्निं प्रतिष्ठाप्य ओं हां शिवबीजाय नमः शिवबीजमिति ध्यात्वा ईशदिग्गतं पितरं शिरसि ध्यात्वा। वागीश्वरीगर्भनाड्यां वागीश्वरेण क्षिप्यमाणं विधाय आत्मसम्मुखं क्षिपेत्। कवचेन सदिन्धनैः आच्छाद्य। अस्त्रेण प्रज्वाल्य। ओं हां गर्भाग्नये नमः इति गर्भाग्निं सम्पूज्य गर्भरक्षार्थं अस्त्रजप्तदर्भकङ्कणं देव्याः वामहस्ते त्र्यम्बकमन्त्रेण बध्वा त्र्यम्बकं ... अमृतात् ध्यात्वा,

दक्षिणमेखलोपरि निधाय गर्भाधानाय सद्योजातेन अभ्यर्च्य, हृदयेन आहुतित्रयं तिलैः हुत्वा (हृदयाय स्वाहा)

पुम्सवनार्थं तृतीये मासि वामदेवेन अभ्यर्च्य शिरसा आहुतित्रय तिलैर्दत्वा (शिरसे स्वाहा)

ओं पुर्यष्टकदेहाय नमः इति जीवभूतं जलबिन्दुं निक्षिप्य सीमन्तोन्नयननिमित्तं षष्ठे मासि अघोरेणाभ्यर्च्य। शिखया आहुतित्रयं तिलैः हुत्वा।

जननार्थं दशमे मासि पुरुषेण अभ्यर्च्य कवचेन तिलैस्तिस्र आहुतीः हुत्वा। जातकर्मार्थम् ईशानेन अभ्यर्च्य, अस्त्रेण तिलैः आहुतित्रयं हुत्वा। जाते गर्भमलापहस्नानार्थं वह्निं दर्भाद्यैः संधुक्ष्य देव्याः हस्तस्थित दर्भकङ्कणम् उन्मुच्य, स्वर्णकङ्कणं देव्याः कृतमिति ध्यात्वा हृदा अभ्यर्च्य। सद्यस्सूतकनिवृत्तये कुण्डम् अस्त्रेण सम्प्रोक्ष्य दर्भैः हुंफडन्तास्त्रेण सन्ताड्य। कवचेनाभ्युक्ष्य।

वह्निरक्षार्थं पूर्वादिमेखलासु उत्तरपूर्वाग्रान् दर्भान् आस्तीर्य । देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां, पूर्वे परिस्तृणामि । उद्वयन्तमसस्परि पश्यन्तो ज्योतिरुत्तरं देवन्ते वत्रा सूर्यमहन्मज्योतरुत्तमं, पश्चिमे परिस्तृणामि ।

अग्न आयाहि...बर्हिषि उत्तरे परिस्तृणामि ।

परिधिविष्टरान् अस्त्रेण सम्स्थाप्य : वक्त्राणां लालापनोदनाय अग्नेः पुष्टये च मूलाग्रयोः घृताक्ताः पञ्च समिधः खड्गेन हुत्वा ।

परिधिषु— पूर्वे—ओं हां ब्रह्मणे नमः पश्चिमे —ओं हां विष्णवे नमः
दक्षिणे–ओं हां रुद्राय नमः उत्तरे—ओं हां अनन्ताय नमः

विष्टरेषु — ओं हां इन्द्राय नमः ..विष्णवे नमः इति सम्पूज्य,

परिस्तरणेषु–ओं हां वज्राय नमः चक्राय नमः इति सम्पूज्य,

अर्घ्यं दत्वा तान् (पूर्वपूजितदेवान्) अग्नेः अभिमुखान् ध्यात्वा मेखलासु तत्तद्देवतास्थाने लाजपुष्पैः अलंकृत्य, विघ्नसङ्घातं निवार्य "बालकं पालयिष्यथ" इति शिवाज्ञां श्रावयेत् ॥

भो भो देवास्सुसन्नद्धाः बालमेनं शिवाज्ञया ।
रक्षतेति शिवाज्ञां च श्रावयेत् देशिकोत्तमः ॥

इत्यग्निसंस्कारः ।

स्रुक्स्रुवसंस्कारः

अथ स्रुक्स्रुवौ सकुशौ ऊर्ध्ववदनौ अधोमुखौ गृहीत्वा । मूलेन निरीक्ष्य अस्त्रेण सम्प्रोक्ष्य । कवचेनाभ्युक्ष्य । अवकुण्ठ्य । अग्नौ प्रताप्य परिभ्राम्य कुशाग्रेण तदग्रं संस्पृश्य, पुनः परिभ्राम्य, कुशमध्येन मध्यं संस्पृश्य, (स्रुक्स्रुवयोर्मध्यं इति ज्ञातव्यम्) । पुनः परिभ्राम्य, कुशमूलेन मूलं सस्पृश्य, तयोः कुशस्पृष्टप्रदेशेषु, ओं हां आत्मतत्वाय नमः । ओं हां विद्यातत्वाय नमः । ओं हां शिवतत्वाय नमः । इत्यभ्यर्च्य

हूं ह्रीं हां इति शम्बरैः विन्यस्य स्रुचं शक्तिं स्रुवं ईश्वरं ध्यात्वा ।
स्रुचि—ओं ह्रीं शक्तये नमः । स्रुवे—ओं हां हौं शिवाय नमः ।

ध्यानम्—उमशिवतनुयुग्मं ऊर्ध्वबाहुं त्रिणेत्रम्
चरणयुगविरिञ्चि शाश्वतं विष्णुमध्यम् ।
कमलरविशशाङ्कं नाळवत् स्रुङ्मुखाग्रे
सकलमनुमयाङ्गं स्रुक्स्रुवाख्यं भजेऽहम् ॥

इति ध्यात्वा, त्रिसूत्रीवेष्टितग्रीवौ आत्मनः सव्यभागे कुशोपरि मूलेन संस्थाप्य, हृदयाय नमः । इति सम्पूज्य,

इति स्रुक्स्रुवसंस्कारः

—

आज्यसंस्कारक्रमः

अथ आज्यस्थाल्यां गव्यमाज्यं आनीय, मूलेन निरीक्षणं च कृत्वा, हृदयाय नमः इति प्रोक्षणं, अस्त्राय नमः इति ताडनं, कवचाय नमः इत्यभ्युक्षणं, कुण्डस्य वामभागे किञ्चित् अङ्गारं क्रव्यादाम्शत्वेन भावयित्वा, तदूर्ध्वे घृतपात्रं न्यस्त्वा, दर्भोल्कं घृतमुखे दर्शयित्वा, ततः कुशं अग्नौ निक्षिप्य, ततः दर्भद्वयाभ्यां गृहीत्वा, प्रोक्षणीजलेन सम्प्रोक्ष्य, घृतमध्ये निक्षिप्य, पुनः दर्भद्वयं संगृह्य, अग्नौ प्रज्वाल्य, घृतपात्रं त्रिः-परिभ्राम्य, अग्नौ विसृज्य, घृतपात्रं वह्निदेशे स्थापयित्वा, स्वदेहं ब्रह्म-मयं ध्यात्वा, दर्भाग्रेण घृतबिन्दुं आदाय, ओं हां ब्रह्मणे स्वाहेति कुशा-ग्रेण आज्येन जुहुयात् । घृतं प्रदक्षिणक्रमेण ईशानकोणं आनीय स्वदेहं विष्णुमयं ध्यात्वा, दर्भाग्रेण घृतबिन्दुमादाय, ओं ह्रीं विष्णवे स्वाहेति हुत्वा, घृतं कुण्डयोनौ समुद्धृत्य स्वदेहं रुद्रमयं ध्यात्वा, ओं हां रुद्राय स्वाहेति कुशाग्रेण आज्येन जुहुयात् ॥

प्रादेशमात्रदर्भाग्रद्वयनिर्मितं मध्यग्रन्थिपवित्रं प्रणवेन घृतमध्ये न्यस्त्वा । अंगुष्ठानामिकाभ्यां गृहीत्वा । अस्त्रेण आज्यं अग्निसम्मुखं

त्रिधा उत्प्लावयेत् इति उत्प्लवनम् । तद्वत् आत्मसम्मुखं सम्प्लवनं हृन्मन्त्रेण कृत्वा । तत्पवित्रग्रन्थि उन्मुच्य अग्नौ क्षिपेत् ।

इति सम्प्लवनम्

प्रादेशमात्रं मध्यग्रन्थिपवित्रं प्रणवेन घृतमध्ये अग्निसम्मुखं न्यस्य स्वदक्षिणवामक्रमेण शुक्ल-कृष्णपक्षद्वयं विभाव्य । शुक्लपक्षे दक्षिण-वाम-मध्यभागेषु पिङ्गळेडासुषुम्नानाडीत्रयं च सङ्कल्प्य । सव्यभागात् स्रुवेण आज्यं आदाय । ओं हां अग्नये स्वाहा इत्यग्निदक्षिणनेत्रे हुत्वा । वामभागादाज्यं आदाय । ओं हां सोमाय स्वाहा इत्यग्निवामनेत्रे हुत्वा । मध्यादादाय । ओं हां अग्निसोमाभ्यां स्वाहा इत्यग्निमध्यनेत्रे

ओं हां अग्नये स्विष्टकृते स्वाहा ।

शेषमाज्यं आनीय संहितया अभिमन्त्र्य, संरक्ष्य, अवकुण्ठ्य, मूलेन अमृतीकृत्य । बिन्दुक्षोभात् अन्याज्यशोधनं कुर्यात् ॥

तदनु वक्त्रैकीकरणं विदध्यात् ।

ओं हं सद्योजाताय स्वाहा । ओं हिं वामदेवगुह्याय स्वाहा ।

ओं हुं अघोरहृदयाय स्वाहा । ओं हें तत्पुरुषवक्त्राय स्वाहा ।

ओं हों ईशानमूर्धाय स्वाहा । इत्येकैकया घृतं हुत्वा ।

अग्निवक्त्राणां आधारं—ओं हं हिं सद्योजातवामदेवाभ्यां स्वाहा ।

ओं हिं हुं वामदेवाघोराभ्यां स्वाहा ।

ओं हुं हें अघोरतत्पुरुषाभ्यां स्वाहा ।

ओं हें होम तत्पुरुष ईशानाभ्यां स्वाहा ॥ इति वक्त्रानुसन्धानम् ॥

ओं हं हिं हुं हें हों सद्योजातवामदेवाघोरतत्पुरुष ईशानेभ्यः स्वाहा ।

इति वक्त्रैकीकरणं कृत्वा ॥

जिह्वादापनम्

पश्चिमे—ओं यूं हिरण्यायै स्वाहा । मध्ये—ओं लूं कनकायै स्वाहा ।

उत्तरे —ओं वूं रक्तायै ,, दक्षिणे-ओं शूं कृष्णायै ,,

पूर्वे —ओं षूं सुप्रभायै ,, आग्नेयां-ओं सूं अतिरक्तायै स्वाहा ।

ऐशान्यां-ओं हूं बहुरूपायै स्वाहा ।

इत्येकैकेन आहुतिदानेन जिह्वादीपनं कृत्वा ।

ततः जिह्वानुसन्धानम्

ओं यूं लूं हिरण्या-कनकाभ्यां स्वाहा इति पश्चिमात् मध्यान्तम् ।
ओं लूं वूं कनकारक्ताभ्यां स्वाहा इति मध्यादुत्तरान्तम् ।
ओं वूं शूं रक्ताकृष्णाभ्यां स्वाहा इति उत्तराद्दक्षिणान्तम् ।
ओं शूं षूं कृष्णासुप्रभाभ्यां स्वाहा इति दक्षिणात्पूर्वान्तम् ।
ओं षूं सूं सुप्रभा अतिरक्ताभ्यां स्वाहा इति पूर्वादाग्नेयान्तम् ।
ओं सूं हूं अतिरक्ताबहुरूपाभ्यां स्वाहा इति आग्नेयादैशानान्तम् ।

जिह्वासन्धानं कृत्वा ।

ओं यूं लूं वूं शूं षूं सूं हूं हिरण्याकनकारक्ताकृष्णासुप्रभा अतिरिक्ता-बहुरूपाभ्यः स्वाहा ॥ इति जिह्वैकीकरणं विदध्यात् ।

ततः नामकरणार्थं ईशानेन सम्पूज्य, अर्घ्यं दत्वा, अस्त्रेण आहुति-पञ्चकं हुनेत् । शिवाग्निस्त्वं हुताशन इति नाम कृत्वा बालाग्निं ध्यात्वा,

ओं हैं बालाग्न्यासनाय नमः । ओं हैं बालाग्निमूर्तये नमः ।

ध्यानम्—अनलरुचिसहस्रं प्रोद्यतं पञ्चवक्त्रं
स्रुवपरशुमभीतिं खड्गखेटं च सव्ये ।
वरदमनलखेटं ह्यंकुशं स्रुक् च वामे
दधतमुदितरूपं शैवबालाग्निमीडे ॥

ओं हैं बालाग्नये नमः । आवाहनादिकं विधाय ।

ततः ईशानादि बलिपिञ्छान्तं वास्तुब्रह्माणं च समावाह्य, स्वाहान्तेन हुत्वा । यथाशक्ति मूलेन (ओं हां वास्त्वधिपतये ब्रह्मणे स्वाहा) हुत्वा । समिदाज्यहविर्भिः यवैः कृष्णतिलैः अन्यैश्च द्रव्यैश्च प्रत्येकं सहस्रं पञ्चशतं पञ्चाशद्वा हुत्वा अग्निस्थं नैवेद्य-धूप-दीपार्घ्यं दत्वा । ब्रह्माङ्गैः शिवाङ्गैः विद्याङ्गैश्च प्रत्येकं शतवारं हुत्वा । अघोरेण अष्टोत्तरशतं हुत्वा । स्विष्टकृतं हुत्वा ।

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान्थ्सर्वं स्विष्टं सुहुतं करोतु स्वाहा । अग्नये स्विष्टकृते सुहुत हुत ओषधीनां कामानां समर्थयित्रे स्वाहा ।

जयादिहोमं विधाय । ब्रह्मादिभ्यो बलिं दत्वा ।

पश्चात् कूश्माण्डबलिं समाचरेत् ॥

कूष्माण्डबलिः

कूष्माण्डहोमार्थं कूष्माण्डसाधनमाहृत्य, कूष्माण्डं प्रहरेत् । यथा—

अवक्रं भिन्नरहितं धूळियुक्तं बृहत्तथा ।
दीर्घं च वीर्तुलाकारं कूष्माण्डबलिमाचरेत् ॥

कूश्माण्डबलिहीने तु वास्तु होमन्तु निष्फलम् ।
अभावे नाळिकेरं वा संग्राह्य बलिकर्मणि ॥

तच्छिद्य, मांसं संगृह्य, चरक्यादीन् बलिं क्षिपेत् । अग्नेः पूर्वभागे कुश-पुष्पाक्षतोपेतमण्डले अस्त्रैः प्रोक्षिते तस्मिन् उक्तलक्षणं कूश्माण्डम् उत्तराग्र विन्यस्य, निरीक्षणादिभिः विशोध्य, कूश्माण्डं जगदण्डरूपं विभाव्य, खड्गं वा खनित्र वा प्रक्षाल्य, तैलादिभिरभिषिच्य, पश्चात् कूश्माण्डखननं कारयित्वा, बीजानि वर्जयित्वा, संहितया सम्पूज्य, तथैव सम्पातहोमं कृत्वा, अग्रखण्डांश्च मध्यप्रदेशात् बीजानि वर्जयित्वा, स्वल्पमात्रं गृहीत्वा, चरक्यादि चतुर्णां हुत्वा, अन्यखण्डाच्च मार्दवप्रदेशमादाय, स्कन्दादीनां तथैव हुत्वा, स्रुवं प्रक्षाल्य, अघोरास्त्रं, पाशुपतास्त्रं मृत्युञ्जयास्त्र प्रायश्चित्तार्थं जुहुयात्, पूर्णाहुतिं विधाय, जपं निवेद्य, वह्निस्थमूर्तिं स्थण्डिले सम्योज्य, मण्डलात् कुम्भे कुम्भात् शिवास्त्रे तदभावे आचार्यः स्वहृदि सम्योज्य, अग्निमुद्रास्य, औदुम्बरादि पर्णसहितं दर्भबन्धं अस्त्रेण सम्प्रोक्ष्य, आज्येन संसिच्य, तत्वत्रयमभ्यर्च्य, कुण्डाग्नेरस्त्रेण प्रज्वाल्य, ब्राह्मणेन ग्राहयित्वा. घण्टादिवाद्यपुरस्सरं पुण्याह—

पञ्चगव्योदकैः गर्भगृहादिवीथिपर्यन्तं अनेकदोषशान्त्यर्थं पर्यग्निकरणपूर्वकं प्रोक्षयेत, परिचारकः स्नानं विधाय, अस्त्रं यथास्थानं स्थापयित्वा, पुण्याहं कृत्वा प्रोक्षयेत् ॥

विशेषसन्धिः

अथ आचार्यः कृतस्नानः, कृतकृत्याह्निकद्वयः मूर्तिपैस्सह सपवित्र-पाणिः—शुक्लाम्बरधरं ... शान्तये ॥ प्राणानायम्य, शिवाभ्यान्नमः, शुभे शोभने ... शुभतिथौ, अस्य देवदेवस्य ... परमेश्वरस्य प्रतिष्ठामहा-यागाङ्गं विशेषसन्ध्यां करिष्ये । इति सङ्कल्प्य,

अंगुल्यग्रैः देवतीर्थेन सकुशाक्षततोयेन

ओं हां हौं शिवाय स्वाहा ।
ओं हों ईशानमूर्धाय ,,
ओं हें तत्पुरुषवक्त्राय स्वाहा ।
ओं हुं अघोरहृदयाय ,,
ओं हिं वामदेवगुह्याय ,,
ओं हं सद्योजातमूर्तये ,,
ओं ,, हृदयाय ,,
ओं हीं शिरसे ,,
ओं हूं शिखायै ,,
ओं हैं कवचाय ,,
ओं हौं नेत्रेभ्यस्वाहा ।
ओं हः अस्त्राय ,,
ओं हां अनन्ताय स्वाहा ।
ओं हां सूक्ष्माय ,,
ओं हां शिवोत्तमाय स्वाहा ।
ओं ,, एकनेत्राय ,,
ओं ,, एकरुद्राय ,,
ओं ,, त्रिमूर्तये ,,
ओं ,, श्रीकण्ठाय ,,
ओं ,, शिखण्डिने ,,

ओं हां शिवतत्वाय स्वाहा । ओं हां शिवतत्वाधिपतये शिवाय स्वाहा ।

ओं हां शक्तितत्वाय ,, । ,, ,, शक्तितत्वाधिपतये शक्तिमते स्वाहा ।

ओं हां सदाशिवतत्वाय स्वाहा । ओं हां सदाशिवतत्वाधिपतये ब्रह्मणे स्वाहा

ओं हां ईश्वरतत्वाय स्वाहा । ओं हां ईश्वरतत्वाधिपतये अनन्ताय स्वाहा
ओं हां शुद्धविद्यातत्वाय स्वाहा । ओं हां शुद्धविद्यातत्वाधिपतये
शम्बराय स्वाहा

ओं हां मायातत्वाय स्वाहा । ओं हां मायातत्वाधिपतये गहनेशाय स्वाहा
ओं हां कालतत्वाय स्वाहा । ओं हां कालतत्वाधिपतये कालनाम्ने स्वाहा
ओं हां नियतितत्वाय स्वाहा । ओं हां नियतितत्वाधिपतये नियमकाय ,,
ओं हां कलातत्वाय स्वाहा । ओं हां कलातत्वाधिपतये ज्ञानबिन्दवे स्वाहा
ओं हां विद्यातत्वाय स्वाहा । ओं हां विद्यातत्वाधिपतये वेदविज्ञानाय ,,
ओं हां रागतत्वाय स्वाहा । ओं हां रागतत्वाधिपतये कामदाय स्वाहा
ओं हां पुरुषतत्वाय स्वाहा । ओं हां पुरुषतत्वाधिपतये सूक्ष्मदेहाय स्वाहा
ओं हां प्रकृतितत्वाय स्वाहा । ओं हां प्रकृतितत्वाधिपतये प्रधानकाय ,,
ओं हां गुणतत्वाय स्वाहा । ओं हां गुणतत्वाधिपतये त्रिदेहाय स्वाहा
ओं हां बुद्धितत्वाय स्वाहा । ओं हां बुद्धितत्वाधिपतये बुद्धये स्वाहा
ओं हां अहङ्कारतत्वाय स्वाहा । ओं हां अहङ्कारतत्वाधिपतये!
अहंकृतिने स्वाहा

ओं हां मनस्तत्वाय स्वाहा । ओं हां मनस्तत्वाधिपतये सङ्कल्पाय स्वाहा
ओं हां श्रोत्रतत्वाय स्वाहा । ओं हां श्रोत्रतत्वाधिपतये व्योमचारिणे ,,
ओं हां त्वक्तत्वाय स्वाहा । ओं हां त्वक्तत्वाधिपतये सर्वाङ्गाय स्वाहा
ओं हां चक्षुस्तत्वाय स्वाहा । ओं हां चक्षुस्तत्वाधिपतये प्रकाशकाय ,,
ओं हां जिह्वातत्वाय स्वाहा । ओं हां जिह्वातत्वाधिपतये महावक्त्राय
स्वाहा

ओं हां नासातत्वाय स्वाहा । ओं हां नासातत्वाधिपतये विलुम्बकाय ,,
ओं हां वाक्तत्वाय स्वाहा । ओं हां वाक् तत्वाधिपतये दुन्दुभये स्वाहा
ओं हां पाणितत्वाय स्वाहा । ओं हां पाणितत्वाधिपतये सामदाय स्वाहा
ओं हां पादतत्वाय स्वाहा । ओं हां पादतत्वाधिपतये रमणाय स्वाहा
ओं हां पायुतत्वाय स्वाहा । ओं हां पायुतत्वाधिपतये तूर्णकृते स्वाहा
ओं हां उपस्थतत्वाय स्वाहा । ओं हां उपस्थतत्वाधिपतये घनानन्दाय
स्वाहा

ओं हां शब्दतत्वाय स्वाहा । ओं हां शब्दतत्वाधिपतये सूक्ष्मनादाय स्वाहा
ओं हां स्पर्शतत्वाय स्वाहा । ओं हां स्पर्शतत्वाधिपतये बलवत्तराय स्वाहा
ओं हां रूपतत्वाय स्वाहा । ओं हां रूपतत्वाधिपतये भानुमते स्वाहा
ओं हां रसतत्वाय स्वाहा । ओं हां रसतत्वाधिपतये जलदाय स्वाहा
ओं हां गन्धतत्वाय स्वाहा । ओं हां गन्धतत्वाधिपतये गन्धाङ्गाय स्वाहा
ओं हां व्योमतत्वाय स्वाहा । ओं हां व्योमतत्वाधिपतये सूक्ष्माय स्वाहा
ओं हां वायुतत्वाय स्वाहा । ओं हां वायुतत्वाधिपतये मातरिश्वने स्वाहा
ओं हां अग्नितत्वाय स्वाहा । ओं हां अग्नितत्वाधिपतये त्विषांनिधये ,,
ओं हां जलतत्वाय स्वाहा । ओं हां जलतत्वाधिपतये जलेशाय स्वाहा
ओं हां पृथिवीतत्वाय स्वाहा । ओं हां पृथिवीतत्वाधिपतये श्रीकण्ठाय स्वाहा

इति तत्वान्यधिपतींश्च सन्तर्प्य, तथैव देवतीर्थेन देवगणान् ।

ओं हां आदित्येभ्यस्स्वाहा । ओं हां साध्येभ्यः स्वाहा ।
,, ,, वसुभ्यः स्वाहा । ,, ,, मरुद्भ्यः ,,
,, ,, रुद्रेभ्यः ,, ,, ,, भृगुभ्यः ,,
,, ,, विश्वेभ्यः स्वाहा । ,, ,, अङ्गिरोभ्य, ,,

ततः कण्ठोपवीती अङ्गुळिपर्वसन्धिभिः आर्षतीर्थेन कुशमध्येन,

ओं हां अत्रये नमः । ओं हां विश्वामित्राय नमः ।
,, ,, वसिष्ठाय नमः । ,, ,, प्रचेतसे नमः ।
,, ,, पुलस्त्याय नमः । ,, ,, ऋच्छकाय नमः ।
,, ,, क्रतवे नमः । ,, ,, अगस्त्याय नमः ।
,, ,, भारद्वाजाय नमः । ,, ,, दधीचये नमः ।
,, ,, दुर्वाससे नमः । इति एकादशऋषीन् सन्तर्प्य,

कनिष्ठामूलाभ्यां मानवतीर्थेन

ओं हां सनकाय वषट् ओं हां कपिलाय वषट्
ओं हां सनन्दनाय वषट् ओं हां पञ्चशिवाय वषट्
ओं हां सनातनाय वषट् ओं हां ऋभवे वषट्
ओं हां सनत्कुमाराय वषट् इति सप्तमनुष्यान् सन्तर्प्य,

ओं हां सर्वेभ्यो भूतेभ्यो वौषट्

ओं ह्रां काश्यपाय नमः ओं ह्रां नैद्ध्रुवाय नमः
ओं ह्रां आवत्साराय नमः इति स्व स्व गोत्रप्रवराधिपान्,

अथ दक्षस्कन्धोपवीती—कुशमूलाग्रेण-सतिलवारिणा प्रदेशिन्यगुष्ठ-मूलाभ्यां पितृतीर्थेन,

ओं ह्रां कव्यवाहनाय स्वधा ओं ह्रां अनलाय स्वधा
,, ,, सोमाय स्वधा ,, ,, यमाय स्वधा
,, ,, अयम्णे स्वधा ,, ,, अग्निष्वात्ताय स्वधा
,, ,, बर्हिषद्भ्य स्वधा ,, ,, आज्यपाय स्वधा
,, ,, सोमपाय स्वधा इति देवपितॄन्,

ओं ह्रां ईशाय पित्रे स्वधा ओं ह्रां शान्ताय पितामहाय स्वधा
,, ,, सदाशिवाय पितामहाय स्वधा (इति विशेषपितॄन्)

ओं ह्रां पितृभ्यः स्वधा ओं ह्रां सर्वेभ्यस्सखिभ्यः स्वधा
,, ,, पितामहेभ्यः स्वधा ,, ,, सर्वेभ्यो मातृभ्यः स्वधा
,, ,, प्रपितामहेभ्यः स्वधा ,, ,, सर्वेभ्यो मातुलेभ्यः स्वधा
,, ,, मातृभ्यः स्वधा ,, ,, सर्वेभ्यश्चोदकेभ्यः स्वधा
,, ,, पितामहीभ्यः स्वधा ,, ,, सर्वेभ्यो बोधकेभ्यः स्वधा
,, ,, प्रपितामहीभ्यः स्वधा ,, ,, दिग्भ्यः स्वधा
,, ,, मातामहेभ्यः स्वधा ,, ,, दिक्पतिभ्यः स्वधा
,, ,, प्रमातामहेभ्यः स्वधा ,, ,, सिद्धेभ्यः स्वधा
,, ,, वृद्धप्रमातामहेभ्यः स्वधा ,, ,, मातृभ्यः स्वधा
,, ,, मातामहीभ्यः स्वधा ,, ,, गृहेभ्यः स्वधा
,, ,, प्रमातामहीभ्यः स्वधा ,, ,, नक्षत्रेभ्यः स्वधा
,, ,, वृद्धप्रमातामहीभ्यः स्वधा ,, ,, रक्षोभ्यः स्वधा
,, ,, सर्वेभ्यो ज्ञातिभ्यः स्वधा ,, ,, सर्वेभ्यः स्वधा
,, ,, सर्वेभ्य आचार्येभ्यः स्वधा ,, ,, सर्वाभ्यः स्वधा
,, ,, सर्वेभ्यो गुरुभ्यः स्वधा इति सन्तर्प्य,

ओं हः अस्त्राय हुं फट् इति सकुशं जलतीरे निक्षिपेत् ।

अथ उपवीती—

ओं हां गणपतये स्वाहा ओं हां सरस्वत्यै स्वाहा
,, ,, अम्बिकायै स्वाहा ,, ,, महालक्ष्म्यै स्वाहा
,, ,, दुर्गायै स्वाहा ,, ,, क्षेत्रपालकाय स्वाहा

कुशान् त्यक्त्वा, आचम्य, भस्म सन्धार्यं, सकलीकृत्य, अघोरं एकविंशतिवारं जपेत् ।

उक्तसन्ध्याकालभ्रंशे संहितामन्त्रं एकविंशतिवारं जपेत् ॥

---

१ महागणपतिध्यानम्

बिभ्राणोऽब्जकबीजपूरकगदादन्तेक्षुबाणैस्समम्,
बिभ्राणो मणिकुम्भशालिकिणिशं पाशं च वक्त्रान्वितम् ।
गौराङ्ग्या रुचिरारविन्दयुतया देव्या सनाथान्तिकः
शोणाङ्गश्शुभमातनोतु भवतां नित्यं गणेशो महान् ॥

२ नृत्तगणपतिध्यानम्

पाशाङ्कुशापूपकुठारदन्त-
चञ्चत्करं चारुकराङ्कुळीयकम् ।
पीतप्रभं कल्पतरोरधस्थं
भजामि नृत्तैकपदं गणेशम् ॥

३ श्रीगणेशध्यानम्

शिवतनयवरिष्ठं सर्वकल्याणमूर्तिं
परशुकमलहस्तं भूषितं मोदकेन ।
अरुणकुसुममालाव्याळलम्बोदरं तं
मम हृदयनिवासं श्रीगणेशं नमामि ॥

४ वल्लभागणपतिध्यानम्

वन्दे महागणपतिं मदनारिसूनुं
वामोरुसंस्थवनिताभुजवेष्टिताङ्गम् ।
वल्लीशपूर्वजमभीष्टदमाश्रितानां
वाणीपतिप्रमुखदेवगणार्चिताङ्घ्रिम् ॥

५ विनायकध्यानम्

सूर्याब्जानललोचनं मणिलसत्कोटीरहस्तं महा-
नागेन्द्राननसुन्दरं करयुगाम्भोजेङ्कुशं पाशकम् ।
दन्तं मञ्जुळलड्डुकं च दधतं हस्तद्वये मेखला-
मालालंकृतमध्यमं भुजमिळद् यज्ञोपवीतं भजे ॥

६ (अन्यत्)

ककुदधवळवर्णं पूर्णलक्ष्मीप्रसन्नं
मदगजमुखमीड्यं चञ्चलत्कर्णयुग्मम् ।
अभयवरदहस्तं वासुकीयज्ञसूत्रं
पशुपतिसुतमीशं विघ्नराजं नमामि ॥

७ (अन्यत्)

करस्फुरितमोदकं कलितशैलजामोदकं
कटस्फुटमदोदकं कठिनविघ्नविच्छेदकम् ।
समस्तफलदायकं सकलदेवतानायकं
नमामि गणनायकं नवकवित्वसन्दायकम् ॥

८ (अन्यत्)

गजाननं चन्द्रसमानवर्णं स्वदन्तपाशाङ्कुशलड्डुकं च ।
हस्तैर्दधानं कमलासनस्थं विघ्नेश्वरं नौमि सदा प्रसन्नम् ॥

९ मूषिकध्यानम्

धूम्रवर्णस्तथा चाखुः रक्तनेत्रः सुदंष्ट्रवान् ।
तीक्ष्णपुच्छः चतुष्पादः किङ्किणीदामभूषितः ।
ध्यातव्यो गुरुणा भक्त्या गणराड् वाहनोत्तमः ॥

१० कुम्भचण्डध्यानम्

कुम्भोदरश्चतुर्बाहुष्टङ्कशूलासिदण्डधृत् ।
रक्तवर्णो महादीप्तो भद्रपीठोपरिस्थितः ॥

११ स्कन्दस्वामिध्यानम्

कल्पद्रुमं प्रणमतां कमलारुणाभं
स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।
कात्यायनीसुतमहं कटिबद्धवामं
कौपीनदण्डधरदक्षिणहस्तमीडे ॥

१२ सुब्रह्मण्यस्वामिध्यानम्

सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभिः
दिव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

१३ षण्मुखस्वामिध्यानम्

वन्दे सिन्दूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवनाथं मधुरिपुतनयावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

S, Siva Kumar Gurukkal
ShriDandbayudha Pani Swamitemple
223 Block Budh Nagar
New Delhi-110012

१४ बालस्वामिध्यानम्

पद्मसव्यकटिसम्युतवामं पद्मकान्तिनिभमेकमुखं च ।
बालवृद्धिकरमीश्वरसूनुं बालमुन्नतभुजं प्रणतोऽस्मि ॥

१५ शिखिवाहनस्वामिध्यानम्

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिम् ।
देवलोकरिपुघ्नमविघ्नदं युग्मशक्तिसहितं शिखिवाहनम् ॥

१६ वल्लीध्यानम्

श्यामां पङ्कजसुस्थितां मणिलसत्ताटङ्ककर्णोज्वलां
सव्ये लम्बकरां किरीटमकुटां तुङ्गस्तनीं कञ्चुकीम् ।
वामे पङ्कजधारिणीं शरवणोद्भूतस्य सव्ये स्थितां
गुञ्जामाल्यधरां प्रवालवदनां वल्लीश्वरीं भावये ॥

१७ देवसेनाध्यानम्

पीतामुत्पलधारिणीं शशिनिभां दिव्याम्बरालंकृतां
वामे लम्बकरां महेन्द्रतनयां मन्दारमालान्विताम् ।
देवैरर्चितपादपद्मयुगलां सेनानिवामे स्थितां
दिव्यां दिव्यविभूषणां द्विनयनां देवीं त्रिभङ्गीं भजे ॥

१८ मयूरध्यानम्

चित्रवर्णं सुरारिघ्नं भुजङ्गोद्धतवक्त्रकम् ।
महाबलं महाकायं मयूरं प्रणमाम्यहम् ॥

१९ सुमित्रचण्डध्यानम्

एकवक्त्रं द्विनेत्रं च द्विपादं च द्विहस्तकम् ।
दक्षहस्तधरं शक्तिं वामहस्तोरुसंयुतम् ॥

जटामकुटसंयुक्तं सर्वाभरणभूषितम् ।
दक्षिणे लंबितं पादं कुञ्चितं वामपादकम् ॥

२० चन्द्रशेखरमूर्तिध्यानम्

अभयवरदहस्तं सौम्यश‍ृङ्गारभावं
विपुलवदननेत्रं चन्द्रबिम्बाङ्कमौळिम् ।
ऋजुतनुसमपादस्थानकं विद्रुमाभं
परशुहरिणपाणिं पद्मपीठोपरिस्थम् ॥

२१ आनन्दवल्लीध्यानम्

श्यामां त्रिणेत्रां द्विभुजां त्रिभङ्गीं
पीनोरुचारुस्थितिकुञ्चितांघ्रिम् ।
सव्यापसव्योत्पललम्बहस्तां
गौरीं भजे शङ्करवामसंस्थाम् ॥

२२ भिक्षाटनमूर्तिध्यानम्

शुक्लाभं शुभलोचनं डमरुकं दूर्वांकुरं दक्षिणे
वामे शूलकपालसंयुतकरं सत्पादुकं पादयोः ।
लम्बंत्पिङ्गजटाधरं शशिधरं दक्षे मृगं वामके
भिक्षापात्रधरं च कुण्डपिठरं भिक्षाटनेशं भजे ॥

२३ दक्षिणामूर्तिध्यानम्

पर्वतमुपरि शृङ्गे शम्भुयोगासनस्थं
धवळमनलवर्णं एकवक्त्रं त्रिणेत्रम् ।
करतलवह्निसर्पं पुस्तकं ज्ञानमुद्रां
मुनियुगपदवन्द्यं दक्षिणामूर्तिदेवम् ॥

२४ अन्यत्

पादेनाक्रम्य भूतं तदुपरि कुणितं पादमेकं निधाय
व्याकुर्वन् सर्वशब्दान् निजकटकमहीभागभाज मृषीणाम् ।
व्याळं व्याख्यानमुद्राहुतवहकलिकां पुस्तकं हस्तपद्मैः
बिभ्रद्दोर्भिः चतुर्भिः स्फुरतु मम गुरुः दक्षिणामूर्तिरीशः ॥

२५ नृत्तमूर्तिध्यानम्

एकास्यं तु चतुर्भुजं त्रिणयनं वामे तु दुर्धूरकं
चन्द्रं यत्र शिखिप्रसारितकरं चोर्ध्वं पदं कुञ्चितम् ।
सव्ये स्वस्तिककुण्डलं डमरुकं गङ्गाभये बिभ्रतं
वन्दे कीर्णजटं नटेशमनिशमपस्मारदेहे स्थितम् ॥

२६ शिवकामसुन्दरीध्यानम्

शक्तिं च द्विभुजां सुलम्बितकरां नीलोत्पलं बिभ्रतीं
श्यामाभां च द्विनेत्रचारुवदनां प्रत्यग्रपीनस्तनीम् ।
नानाभूषणहेमरत्नमकुटां केशेन युक्तां भजे
देवीं ताण्डवमूर्तिना च सहितां गौरीं सुपद्मस्थिताम् ॥

२७ लिङ्गोद्भवध्यानम्

देवं गर्भगृहस्य मानकलिते लिङ्गे जटाशेखरं
कट्यासक्तकरं परैश्च दधतं कृष्णं मृगं चाभयम् ।
सव्ये टङ्कममेयपादमकुटे ब्रह्माच्युताभ्यां युतम्
ऊर्ध्वाधस्थितहंसकोलममलं लिङ्गोद्भवं भावये ॥

२८ सोमास्कन्दमूर्तिध्यानम्

दक्षालम्बितवामनिद्रितपदं कृष्णं मृगं चाभयं
टङ्कं चादधतं वरं च कटकं बिभ्राणकं वामके ।

वामे लम्बितनिद्रितान्यपदया देव्यायुतं मध्यतः
स्कन्देनाब्जकरद्वयेन सहितं सोमागुहेशं भजे ॥

२९ ब्रह्मध्यानम्

ब्रह्मा चतुर्मुखोपेतः चतुर्दोर्दण्डमण्डितः ।
स्रग्दण्डाक्षकुशोपेतः किरीटी हंसवाहनः ॥

३० विष्णुध्यानम्

विष्णुश्चतुर्भुजो मौळी शङ्खचक्रगदाब्जधृक् ।
नीलाम्बुदप्रतीकाशो गरुडासनसंस्थितः ॥

३१ दुर्गादेवीध्यानम्

सुवस्त्रां नीलकेशां च नीलोत्पलदळाकृतिम् ।
सुस्तनीं चारुवदनीं सर्वाभरणभूषिताम् ॥

शङ्खं चक्रं च दधतीं दक्षिणेनाभयप्रदाम् ।
ऊरौ वामभुजां चैव दैत्यसंहारकारिणीम् ॥

कुचबन्धसमायुक्तां महिषस्य शिरःस्थिताम् ।
उत्तराभिमुखोपेतां दुर्गादेवीं नमाम्यहम् ॥

३२ सदाशिवमूर्तिध्यानम्

शान्तं पद्मासनस्थं शशिधरमकुटं पञ्चवक्त्रं त्रिणेत्रं
शूलं वज्रं च खड्गं परशुमभयदं सव्यभागे वहन्तम् ।
नागं पाशं च घण्टां प्रळयहुतवहं चाङ्कुशं वामभागे
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

३३ (अन्यत्)

इन्दुनिभपञ्चमुखहस्तदशयुक्तं
शूलवरटङ्कमसिवज्रमभयं स्यात् ।
पाशवरदाङ्कुशमणिर्दहन वामे
श्वेतकमलासन सदाशिवस्वरूपम् ॥

३४ मनोन्मनीध्यानम्

श्यामामुत्पलधारिणीं शशिमुखीं पीताम्बरालंकृतां
वामे लम्बकरां सुमेरुतनयां मन्दारमालाधराम् ।
देवैरर्चितपादुकां त्रिणयनां भागत्रयेणान्वितां
गौरीं दिव्यविभूषितां भयहरीं ईशस्य वामे स्थिताम् ॥

३५ (अन्यत्)

इन्दुनिभ वेदकर वह्निनयनं स्यात्
पङ्कजवराभयजपाक्षसरयुक्तम् ।
अङ्गहिमभूषणविचित्रनयनं स्यात्
तुङ्गमकुटोज्वल मनोन्मनीस्वरूपम् ॥

३६ वृषभध्यानम्

रजतगिरिशरीरं वेदपादं मुखोर्ध्वं
तरुणमुदितशृङ्गं चाग्निवर्णं त्रिनेत्रम् ।
चलमणिगळभूषं किङ्किणीदामभूषं
हरधरवररूपं चादिदेवं वृषेशम् ॥

३७ चण्डिकेश्वरध्यानम्

युग्मकररत्ननिभसव्यकरटङ्कं
वामकरमूरुपरिशान्तमुखमेकम् ।

श्वेतमयवस्त्रयुतभस्मधरदेहं
शम्भुपदध्यानमयभक्तध्वनिचण्डम् ॥

३८ अस्त्रदेवध्यानम्

असुरहरणशस्त्रं शूलमामण्डलाग्रं
सकलसुरमयं श्रीशम्भुहस्तावतंसम् ।
त्रिशिखममलमग्न्याकाशवायुस्वरूपं
हरिहरविधिरूपं चास्त्रराजं नमामि ॥

३९ भोगशक्तिध्यानम्

वामाङ्घ्रिलम्बितपदां वनजासनस्थां
दक्षाङ्घ्रिनिद्रितपदां द्विभुजां द्विनेत्राम् ।
पीठे निवेशितकरां शतपत्रहस्तां
शय्याङ्गनामीश्वरवामसंस्थाम् ॥

४० (अन्यत्)

श्यामां विचित्रां द्विभुजां त्रिभङ्गीं
सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम् ।
सव्योत्पलं वा कटकान्वितं वा
हस्तावलम्बां परमेश्वरीं ताम् ॥

४१ शास्तृध्यानम्

आश्यामकोमळविशालतनुं विचित्रं
वासो वसानमरुणोत्पलवामहस्तम् ।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

४२ पूर्णा–पुष्कळाध्यानम्

श्यामवर्णशरीरसुयौवने बद्धकञ्चुककुम्भकुचोन्नते ।
सन्ततं भज पद्मसुखासने शास्तृपार्श्वगत पूर्णपुष्कले ॥

४३ स्वामिविमानध्यानम्

द्विपादं च द्विनयनं भस्मकुण्ठितविग्रहम् ।
शूल-शक्ति-धनुर्घण्टा-पाश-चक्र-गदाब्जकम् ॥

अष्टहस्तसमोपेतं सुपद्मकुटं तथा ।
रक्तवर्णं विशालाक्षमुपानमङ्घ्रिरुच्यते ॥

कुमुदं जङ्घदेशं च व्याळान्तं कटिदेशकम् ।
कुक्षिं वै कुक्षिदेशं च पद्मान्तं मूर्ध्निरुच्यते ॥

मकुटं मकुटोपेतं द्विपार्श्वं करमुच्यते ।
एवं वै शिवरूपन्तु स्थूललिङ्गाकृतिर्भवेत् ॥

४४ अम्बाविमानध्यानम्

रुद्राणीं कुङ्कुमाभासां जटामकुटमण्डिताम् ।
भीमरूपसमायुक्तां एकवक्त्रां चतुर्भुजाम् ॥

दुकूलवसनोपेतां सर्वाभरणभूषिताम् ।
पाशाङ्कुशसमायुक्तां साभयां वरदान्विताम् ।
विमानाधिष्ठितां देवीं पूजयेत् सर्वसिद्धये ॥

४५ गोपुरध्यानम्

सहस्रबाहुसम्युक्तं सहस्रकिरणोज्वलम् ।
खण्डेन्दुमौळिं सर्वेशं प्रतिवक्त्रं त्रिलोचनम् ॥

स्फटिकाभं तनोः कान्त्या सहस्रपदसम्युतम् ।
एवं ध्यात्वा विशेषेण पूजयेत् कुम्भमध्यमे ॥

४६ वासुदेवध्यानम्

नीलाङ्गरूपं च मुखारविन्दं पीताम्बराभयकरोरुहस्तम् ।
चक्रायुधं शङ्खकिरीटमौळिं नमामि शान्तं परवासुदेवम् ॥

४७ स्कन्दध्यानम्

बालरूपस्थितं स्कन्दं द्विनेत्रं द्विभुजान्वितम् ।
सनाकाब्जधरं हस्ते सर्वाभरणभूषितम् ॥

४८ अम्बाध्यानम्

श्यामाभां च सुयौवनां त्रिणयनां संपूर्णचन्द्राननां
वामे गण्डिक ऊरुगौ तदितरे रुद्राक्षमालाभयौ ।
पीनोत्तुङ्गकुचां जटामकुटकां पीताम्बरालङ्कृतां
वामाद्यष्टसुशक्तिभिः परिवृतां वन्दे महाशाम्भवीम् ॥

४९ पादुकाध्यानम्

डाडिमीसुमसङ्काशं ऊर्ध्वकेशं त्रिणेत्रकम् ।
पाशांकुशधरं देवं हेमकल्हारभूषकम् ॥
श्वेतार्कमालिकाभूषं पीतवस्त्रधरं शुभम् ।
पादुकारूपमित्युक्तं ध्यात्वा देवं प्रपूजयेत् ॥

५० सूर्यध्यानम्

सूर्यं कुंकुमसंकाशं सर्वाभरणभूषितम् ।
द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम् ॥

चतुर्भुजसमोपेतं वरहस्ताम्बुजद्वयम् ।
अभीतिवरदोपेतं प्रभामण्डलमण्डितम् ।
उपवीतसमायुक्तं उषाप्रत्युषयान्वितम् ॥

५१ चन्द्रध्यानम्

सोमं चतुर्भुजं देवं केयूरमकुटान्वितम् ।
वरदाभयसंयुक्तं कुमुदद्वयहस्तकम् ।
वासुदेवस्य नयनं शङ्करप्रियभूषणम् ॥

५२ अङ्गारकध्यानम्

रक्तमाल्याम्बरधरः शूलशक्तिगदाधरः ।
चतुर्भुजो मेषवाहः वरदश्च धरासुतः ॥

५३ बुधध्यानम्

बुधः पुस्तकधारी च कुङ्कुमाभरणो हरिः ।
पीताम्बरधरः स्रग्वी पीतगन्धानुलेपनः ॥

५४ गुरुध्यानम्

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम् ।
सर्वकार्यार्थसिद्ध्यर्थं प्रार्थये देवमन्त्रिणम् ॥

५५ शुक्रध्यानम्

मृणाळधवळस्य समानगात्रं
श्वेताम्बरं श्वेतसुगन्धिपुष्पम् ।
सुश्वेतरत्नाभरणैर्विभूषितं
शुक्रं महादैत्यगुरुं प्रसन्नम् ॥

५६ शनैश्चरध्यानम्

कृष्णं कृष्णाम्बरं देवं द्विभुजं काकसंस्थितम् ।
सर्वपीडाहरं नृणां ग्रहाणामुत्तमोत्तमम् ॥

५७ राहुध्यानम्

धूम्रं कराळवदनं विकटाङ्गं भुजद्वयम् ।
धूम्रवस्त्रधरं राहुं कृताञ्जलिपुटं भजे ॥

५८ केतुध्यानम्

शङ्करे तु पदे केतुस्त्रिफणी खड्गखेटहृत् ।
नरनागार्धदेही च धूम्रो वाथ कृताञ्जलिः ॥

शिवागमप्रयोगचन्द्रिका समाप्ता ॥

Phone 659

Printed at

SARMA'S SANATORIUM PRESS,
GANESHNAGAR, PUDUKKOTTAI-622001

58/995

२० वास्तुशान्तिः (पक्षान्तरम्)

ईशानकोणार्धपदमारभ्य, अग्निकोणार्धपदपर्यन्तं, पूर्वाद्यष्टपदेषु—

ओं ह्रां ईशानासनाय नमः	ओं ह्रां ईशानमूर्तये नमः
,, ,, पर्जन्यासनाय ,,	,, ,, पर्जन्यमूर्तये ,,
,, ,, जयन्तासनाय ,,	,, ,, जयन्तमूर्तये ,,
,, ,, माहेन्द्रासनाय ,,	,, ,, माहेन्द्रमूर्तये ,,
,, ,, आदित्यासनाय ,,	,, ,, आदित्यमूर्तये ,,
,, ,, सत्यकासनाय ,,	,, ,, सत्यकमूर्तये ,,
,, ,, भृम्शासनाय ,,	,, ,, भृम्शमूर्तये ,,
,, ,, अन्तरिक्षासनाय,,	,, ,, अन्तरिक्षमूर्तये ,,

ध्यानम्—ईशानक्षीरवर्णं स्यात् पर्जन्यो जलकान्तिमान् ।
जयन्तः कृष्णवर्णं स्यात् माहेन्द्रश्यामवर्णकः ॥

आदित्यो रक्तवर्णं स्यात् चित्रवर्णश्च सत्यकः ।
भृम्शो बन्धूकपुष्पाभो कुन्दाभश्चान्तरिक्षकः ॥

जटाकेशं च मुण्डं च किरीटं रक्तकेशकम् ।
करण्डमकुटोपेतं ऊर्ध्वकेशं च तत्परम् ॥

कृष्णं परशुखड्गं च खेटकञ्चाञ्जलिप्रदम् ।
वज्रं शक्तिं च पद्मं च अक्षमालावराभयम् ॥

वाहने नृत्तपादे च कुञ्चिते च सुखासने ।
यथोक्तभूषणैर्युक्तान् ध्यायेत् पूर्वपदाधिपान् ॥

इति ध्यात्वा,

ओं ह्रां ईशानाय नमः	ओं ह्रां पर्जन्याय नमः
,, ,, जयन्ताय ,,	,, ,, माहेन्द्राय ,,
,, ,, आदित्याय ,,	,, ,, सत्यकाय ,,
,, ,, भृम्शाय ,,	,, ,, अन्तरिक्षाय ,,

ईशानाद्यन्तरिक्षान्तं पूर्वाष्टपददेवान् साङ्गान् सायुधान् सवाहन सशक्ति-सपरिवारान् एतानावाहयामि ! आवाहनाद्युपचाराणि विधाय, नैवेद्या-दिकं दद्यात् ॥

अग्निकोणार्धंपदमारभ्य निर्ऋतिकोणार्धपदपर्यन्तं दक्षिणाष्टपदेषु –

ओं ह्रां अग्न्यासनाय नमः ओं ह्रां अग्निमूर्तये नमः
„ „ पूषासनाय „ „ „ पूषमूर्तये „
„ „ वितथासनाय „ „ „ वितथमूर्तये „
„ „ ग्रहक्षतासनाय „ „ „ ग्रहक्षतमूर्तये „
„ „ यमासनाय „ „ „ यममूर्तये „
„ „ गन्धर्वासनाय „ „ „ गन्धर्वमूर्तये „
„ „ भृङ्गराजासनाय „ „ „ भृङ्गराजमूर्तये „
„ „ मृगराजासनाय „ „ „ मृगराजमूर्तये „

ध्यानम्–अग्निस्तेजःस्वरूपाभो पूषा रक्ताब्जसन्निभः ।
वितथश्चन्द्रबिम्बाभो विद्युद्वर्णोग्रहक्षतः ॥
यमः कृष्णाञ्जनाभस्तु गन्धर्वः पद्मरागवान् ।
भृङ्गराजश्च भृङ्गाभो मृगराजो घनप्रभः ॥
ज्वालाकेश करण्डं च किरीटं चोर्ध्वकेशकम् ।
पार्श्वयोर्ज्वालमौळी च वृत्तवेणी च लम्बकः ॥
मुण्डमस्तककेशाङ्गं तोमरञ्चाज्यपात्रकम् ।
कालदण्डाग्निपाशं च वीणावाद्यकराम्बुजम् ॥
ऊरुहस्ताक्षमालाञ्च उत्पलं चामरं करैः ।
वाहने यानपादे च सुखासीने च कुञ्चिते ।
नानाभरणसम्युक्तान् ध्यायेदष्टपदाधिपान् ॥

इति ध्यात्वा,

ओं ह्रां अग्नये नमः	ओं ह्रां पूष्णे नमः
„ „ वितथाय „	„ „ ग्रहक्षताय „
„ „ यमाय „	„ „ गन्धर्वाय „
„ „ भृङ्गराजाय „	„ „ मृगराजाय „

अग्न्यादि मृगराजान्त दक्षिणाष्टपददेवान् साङ्गान् सायुधान् सवाहन-सशक्ति सपरिवारान् एतानावाहयामि । आवाहनाद्युपचारा ण विधाय, नैवेद्यधूपदापाद्यं दद्यात् ॥

नैर्ऋति कोणार्धपदमारभ्य वायुकोणार्धपदपर्यन्तं पश्चिमाष्टपदेषु—

ओं ह्रां निर्ऋत्यासनाय नमः	ओं ह्रां निर्ऋतिमूर्तये नमः
„ „ दौवारिकासनाय „	„ „ दौवारिकमूर्तये „
„ „ सुग्रीवासनाय „	„ „ सुग्रीवमूर्तये „
„ „ पुष्पदन्तासनाय „	„ „ पुष्पदन्तमूर्तये „
„ „ वरुणासनाय „	„ „ वरुणमूर्तये „
„ „ असुरासनाय „	„ „ असुरमूर्तये „
„ „ शोषासनाय „	„ „ शोषमूर्तये „
„ „ रोगासनाय „	„ „ रोगमूर्तये „

ध्यानम्—निर्ऋतिः पावकाभश्च सितो दौवारिकस्तथा ।
सुग्रीवः शिखिवर्णाभः चन्द्राभः पुष्पदन्तकः ॥

श्वेताभो वरुणश्चैव कृष्णवर्णस्तथाऽसुरः ।
उत्पलाभस्तथा शोषः रोगश्चापोन्द्रनीलवत् ॥

लम्बकेशो जटालम्बो मकुटो बद्धकेशकः ।
करण्डमग्निकेशञ्च मुण्डमूर्ध्वजटाधरम् ॥

खड्गखेटधनुर्बाणं वरञ्चाभयान्वितम् ।
पाशपाणिसुधापात्रं सृणिनागञ्च स्वस्तिकम् ॥

टङ्कहस्तसमायुक्तान् सर्वालङ्कारभूषितान् ।

वाहने नृत्तपादे च कुञ्चिते च सुखासने ।
सर्वाभरणसम्युक्तान् ध्यायेदापस्थिताधिपान् ॥

इति ध्यात्वा,

ओं हां निर्ऋतये नमः	ओं हां दौवारिकाय नमः
,, ,, सुग्रीवाय ,,	,, ,, पुष्पदन्ताय ,,
,, ,, वरुणाय ,,	,, ,, असुराय ,,
,, ,, शोषाय ,,	,, ,, रोगाय ,,

निर्ऋत्यादि रोगान्तं पश्चिमाष्टपददेवान् साङ्गान् सायुधान् सवाहन सशक्तिसपरिवारान् एतानावाहयामि ।

आवाहनाद्युपचाराणि विधाय, नैवेद्यधूपदीपार्घ्यं दत्वा,

वायुकोणार्धपदमारभ्य ईशानकोणार्धपदपर्यन्तं उत्तराष्टपदेषु :—

ओं हां वाय्वासनाय नमः ।	ओं हां वायुमूर्तये नमः ।
,, ,, नागासनाय नमः ।	,, ,, नागमूर्तये नमः ।
,, ,, मुख्यासनाय नमः ।	,, ,, मुख्यमूर्तये नमः ।
,, ,, भल्लाटकासनाय नमः ।	,, , भल्लाटकमूर्तये नमः ।
,, ,, सोमासनाय नमः ।	,, ,, सोममूर्तये नमः ।
,, ,, ऋगासनाय नमः ।	,, ,, ऋगमूर्तये नमः ।
,, ,, अदित्यासनाय नमः ।	,, ,, अदितिमूर्तये नमः ।
,, ,, दित्यासनाय नमः ।	,, ,, दितिमूर्तये नमः ।

ध्यानम्—अनिलो धूम्रवर्णाभः कृष्णवर्णस्तथापि च ।
शङ्खवर्णस्तथा नागः मुख्यो मौक्तिकसन्निभः ॥
श्वेताब्जाभस्तु भल्लाटः कनकाभस्तु सोमकः ।
ऋगो रक्तोत्पलाभश्च कुमुदाभादितिस्तथा ॥
दितिस्तु कपिलाभा स्यात् सर्वे वर्णाः प्रकीर्तिताः ।
अंकुशं व्यजनञ्चैव ज्ञानमुद्राञ्जलिप्रदम् ॥

धूपदीपौ च ऊरुश्च गदाशङ्खं च चापकम् ।
मृदङ्गं ताळहस्तं च बद्धकेशोर्ध्वकेशकः ॥
किरीटं बकपुच्छं च सरत्नमकुटान्वितम् ।
वह्निकेशो जटामुण्डी पादं याने च कुञ्चिते ।
इत्येवं उत्तरे देशे पददेवान् प्रपूजयेत् ॥

इति ध्यात्वा

ओं हां वायवे नमः ।	ओं हां नागाय नमः ।
,, ,, मुख्याय नमः ।	ओं हां भल्लाटकाय नमः ।
,, ,, सोमाय नमः ।	,, ,, ऋगाय नमः ।
,, ,, अदितये नमः ।	,, ,, दितये नमः ।

वायव्यादित्यान्तः उत्तराष्टपददेवान् साङ्गान् सायुधान् सवाहन सशक्ति सपरिवारान् एतानावाहयामि ।

आवाहनाद्युपचाराणि विधाय, नैवेद्य-धूप-दीपार्घ्याणि दद्यात् ।

अथ तस्य अन्तर्गतदेवतापूजा

मध्यपदचतुष्टयबाह्ये ईशानकोणार्धद्विद्विपदे—

ओं हां आपासनाय नमः ।	ओं हां आपमूर्तये नमः ।
ओं हां आपवत्सासनाय नमः ।	ओं हां आपवत्समूतये नमः ।

अग्निकोणार्धपदद्वये वामदक्षिणार्धपदद्वयोः—

ओं हां सवित्रासनाय नमः ।	ओं हां सवितृमूर्तये नमः ।
ओं हां सावित्रकासनाय नमः ।	ओं हां सावित्रकमूर्तये नमः ।

निर्ऋतिकोणार्धपदद्वये वामदक्षिणार्धपदद्वयोः —

ओं हां इन्द्रासनाय नमः ।	ओं हां इन्द्रमूतये नमः ।
ओं हां इन्द्रजयासनाय नमः ।	ओं हां इन्द्रजयमूर्तये नमः ।

वायुकोणार्धपदद्वये वामदक्षिणार्धपदद्वयोः —

ओं हां रुद्रासनाय नमः ।	ओं हां रुद्रमूर्तये नमः ।
ओं हां रुद्रदासासनाय नमः ।	ओं हां रुद्रदासमूर्तये नमः ।

ध्यानम्—श्वेताभश्च जपाभश्च आपश्चाथापवत्सकः ।
श्यामाभः कालवर्णं च सविता सावित्रकस्तथा ॥

रक्ताभश्शुक्लवर्णश्च इन्द्र इन्द्रजयस्तथा ।
अग्न्याभश्चित्रवर्णश्च रुद्रो रुद्रस्य दासकः ॥

सर्पाग्निः मृगकेशश्च किरीटं बद्धवेणिकम् ।
उत्पलं पूर्णकुंभं च दर्पणं ताळवृन्तकम् ॥

पङ्कजं चाक्षमालां च ज्ञानमुद्रावराभयम् ।
कुलिशञ्चोरुहस्तं च इक्षुदण्डफलं तथा ।
युगं च मुसलं चैव लाङ्गलं बीजपात्रकम् ॥

इति ध्यात्वा,

ओं हां आपाय नमः ।	ओं हां आपवत्साय नमः ।
,, ,, सवित्रे नमः ।	,, ,, सावित्रकाय नमः ।
,, ,, इन्द्राय नमः ।	,, ,, इन्द्रजयाय नमः ।
,, ,, रुद्राय नमः ।	,, ,, रुद्रदासाय नमः ।

अर्धकोष्ठेषु आपादिरुद्रदासान्तं अष्टपददेवान् साङ्गान् सायुधान् सवाहन सशक्ति सपरिवारान् एतानावाहयामि । आवाहनाद्युपचाराणि विधाय,

नैवेद्य-धूप-दीपार्घ्याणि दत्वा,

षट्पदस्थानेषु पूर्वादि चतुर्दिक्षु—

पूर्वे	ओं हां मरीच्यासनाय नमः	ओं हां मरीचिमूर्तये नमः
दक्षिणे	,, ,, विवस्वतासनाय ,,	,, ,, विवस्वतमूर्तये ,,
उत्तरे	,, ,, मित्रासनाय ,,	,, ,, मित्रमूर्तये ,,
पश्चिमे	,, ,, धराधरासनाय ,,	,, ,, धराधरमूर्तये ,,

ध्यानम्—मरीचिश्शुभ्रवर्णाभा विवस्वान् रक्तवर्णकः ।
मित्रस्य कृष्णवर्णं स्यात् पीतवर्णो धराधरः ॥

एकवक्त्रो द्विवक्त्रश्च त्रिवक्त्रश्च उभावपि ।
दण्डः कमण्डलुश्चैव श्रीफलश्चाक्षमालिका ॥

पुस्तकं योगपट्टञ्च श्वेतश्छत्रश्च कुण्डिका ।

आसनं नृत्तयानं च कुञ्चितं च चतुर्विधम् ॥ इति घ्यात्वा

ओं हां मरीचये नमः ओं हां विवस्वते नमः

" " मित्राय " " " धराधराय "

मरीच्यादि धराधरान्तं षट्पददेवान् साङ्गान् सायुधान् सवाहन-सशक्ति सपरिवारान् एतानावाहयामि । आवाहनाद्युपचाराणि विधाय, नैवेद्यधूपदीपार्घ्याणि दद्यात् ।

पश्चात् चतुष्पदमध्ये ओं हां वास्तु ब्रह्मणे नमः । वास्तुब्रह्मस्वरूपं ईशाने शिरोग्र, निरृतिदेशे पादद्वयं, मरीचिस्थाने मुखं, अग्नौ शयनं, आपो वा आपवत्सकः वामहस्तं, सविता सावित्रकश्च दक्षिणहस्तं, इन्द्रो इन्द्रजयो दक्षिणपादं, रुद्रो रुद्रदासो वामपादं द्वात्रि-देवान् उपाङ्ग च चरक्यादि देवान् प्रत्यङ्ग, अधोमुखं शयनं वास्तुनाथं मण्डूकपदजालसूत्रेण सुमुखीकरणार्थं ओं ह्रीं खं ब्रह्मणे नमः । दशदर्भैः कूर्च निधाय. आधारशक्त्यादिपद्मासनान्तं सम्पूज्य, तन्मध्ये,

ओं हां ब्रह्मासनाय नमः । ओं हां ब्रह्मपूर्तये नमः ।

ब्रह्माणं च चतुर्बाहुं चतुर्मुखसमन्वितम् ।

प्रतिवक्त्रं जटाजूटं स्रग्दण्डं चाक्षमालकम् ॥

जटिलं च समायुक्तं भस्मरुद्राक्षभूषितम् ।

श्वेतवस्त्रोपवीताङ्गं श्वेतपद्मैरलंकृतम् ॥

हंसे चैव समारूढं सर्वाभरणभूषितम् ।

कर्णिकामध्यदेशे तु वास्तुब्रह्माणमर्चयेत् ॥ इति ध्यात्वा

ब्रह्मजज्ञानं ... विवः ॥ वेदात्मनाय विद्महे ... प्रचोदयात् ॥ आवाहनादिकं विधाय, नैवेद्यादिकं दद्यात् ॥ हृदयादिषडङ्गस्थानेषु

ओं हां चतुर्मुखाय हृदयाय नमः ।

ओं ह्रीं ब्रह्मणे शिरसे स्वाहा ।

ओं हूं स्रष्ट्रे शिखायै वषट् ।

ओं हैं पद्मयोनये कवचाय हुं ।

ओं हौं पद्माक्षाय नेत्रत्रयाय वौषट् ।

ओं हः वास्त्वधिपतये ब्रह्मणे अस्त्राय फट् इत्यभ्यर्च्य,

S. Siva Kumar

पूर्वाद्यष्टदलेषु ब्रह्माष्टकं पूजयेत् ।

ओं ह्रां त्रयीमयाय नमः । ओं ह्रां त्रिमूर्तये नमः ।
ओं ह्रां पद्माक्षाय नमः । ओं ह्रां पद्मयोनये नमः ।
ओं ह्रां चतुर्मुखाय नमः । ओं ह्रां धात्रे नमः ।
ओं ह्रां पितामहाय नमः । ओं ह्रां अजाय नमः ।

नैवेद्य-धूप-दीपाद्यं दत्वा,

दक्षिणे-ओं गं गायत्र्यै नमः । उत्तरे-ओं सां सावित्र्यै नमः

आवाहनादिकं विधाय,

मण्डलबाह्ये ईशानादिकोणशूलेषु—

ओं ह्लीं चरक्यै नमः । ओं ह्लीं विदार्यै नमः ।
ओं ह्लीं पूतनायै नमः । ओं ह्लीं पापराक्षस्यै नमः ।

पूर्वादिदिक्षु—ओं ह्रां स्कन्दाय नमः । ओं ह्रां अर्यम्णे नमः ।
ओं ह्रां जम्भाय नमः । ओं ह्रां बलिपिच्छाय नमः ।

इत्यभ्यर्च्य,

ध्यानम्—चरकी रक्तवर्णाभा शुक्लवर्णा विदारिका ।
मिश्रवर्णा पूतनारी कालवर्णा च राक्षसी ॥
स्कन्दश्च वायुवर्णाभः अर्यमा शुक्लभास्वरः ।
जम्भश्च श्यामवर्णाभो बलिपिंछश्च ताम्रकः ॥
केशाळकजटालम्बो मकुटोज्ज्वलकेशकः ।
किरीटं बद्धवेणी च मुण्डमौळी करण्डकम् ॥
सर्वाञ्जलिसमायुक्तान् सर्वाभरणभूषितान् ।
आसने यानपादे च नृत्तपादे च कुञ्चिते ॥
बद्धपद्ममहापद्मे कूर्मे मकरपङ्कजे ।
इत्येवं अष्टशूलेषु स्थानदेवान् प्रपूजयेत् ॥

इति ध्यात्वा, नैवेद्य-धूप-दीपाद्यं दत्वा,

भूवास्तुदेवतास्सर्वाः ब्रह्माद्याः पदसंस्थिताः ।
वास्तुपुरुष बाधां च नाशयन्तु शिवाज्ञया ॥ इति विज्ञाप्य